याज्ञवल्क्यशिक्षा

'शान्ति' संस्कृत-हिन्दी व्याख्याद्वयोपेता

डॉ. नरेश दत्त

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला

295

महर्षियाज्ञवल्क्य-प्रणीता

याज्ञवल्क्यशिक्षा

'शान्ति' संस्कृत-हिन्दीव्याख्याद्वयोपेता

व्याख्याकारः

डॉ० नरेश झा

प्राप्तावकाश प्रधानाचार्य

आदर्श रानी चन्द्रावती श्यामा महाविद्यालय, वाराणसी

चौखम्बा सुरभारती प्रकाशन

वाराणसी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

डा. सुबोध:

प्रकाशक
चौखम्बा सुरभारती प्रकाशन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के. 37/117 गोपालमन्दिर लेन
पो. बा. नं. 1129, वाराणसी 221001
दूरभाष : 0542-2335263; 2335264
email : csp_naveen@yahoo.co.in
website : www.chaukhamba.co.in

© सर्वाधिकार प्रकाशकाधीन

संस्करण 2014 ई०
मूल्य : ₹ 75.00

अन्य प्राप्तिस्थान
चौखम्बा पब्लिशिंग हाउस
4697/2, भू-तल (ग्राउण्ड फ्लोर)
गली नं. 21-ए, अंसारी रोड
दरियागंज, नई दिल्ली 110002
दूरभाष : 011-23286537
email : chaukhambapublishinghouse@gmail.com

•

चौखम्बा विद्याभवन
चौक (बैंक ऑफ बड़ौदा भवन के पीछे)
पो. बा. नं. 1069, वाराणसी 221001

•

चौखम्बा संस्कृत प्रतिष्ठान
38 यू. ए. बंगलो रोड, जवाहर नगर
पो. बा. नं. 2113, दिल्ली 110007

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूमिका-प्रस्तुतिः

नाविदितमस्ति तत्रभवतां प्रज्ञावतां भवतां विद्वज्जनानां यदिह मानव-जीवनस्य चरमं लक्ष्यमस्ति—धर्मार्थकाममोक्षाख्यस्य चतुर्विधपुरुषार्थस्य सम्प्राप्तिः। एषु चतुर्षु पुरुषार्थेषु द्वितीय-तृतीययोरर्थकामयोर्विशेषतः सेवमानाः सन्तः मानवजीवने पशुसादृश्यमेव प्राप्नुवन्ति जनाः। यतो हि उक्तमस्ति यत्—

आहारनिद्राभयमैथुनञ्च सामान्यमेतत्पशुभिर्नराणाम्।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥

इत्येतेन सुस्पष्टं भवति यत्—धर्म-मोक्षसाधनैकपरायणा एव मानव-जीवनं वस्तुतः सफलयन्ति, त्यजन्ति च पशुभावत्वम्। अस्यामवस्थायां श्रुति-र्निर्दिशति यत्—'नाऽवेदविन्मनुते ब्रह्म किञ्चित्' इति श्रौतीया प्रेरणाऽपि वेदाध्ययनाय प्रेरयति। यद्येवं न स्यात् तदा कथं तस्याधिकारित्वं ब्राह्मण्यत्वं सुरक्षितं भवेत्। यतो हि श्रीमता पतञ्जलिना स्वमहाभाष्ये उक्तमस्ति यत्—

तपः श्रुतञ्च योनिश्च त्रयं ब्राह्मणकारकम्।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः॥

एतन्मतं स्मृतयोऽपि समर्थयन्ति। अत एव साङ्गं वेदाध्ययनमावश्यकं भवति। तदा को नाम वेद इति जिज्ञासायामाह यास्काचार्यः—'मन्त्रब्राह्मण-योर्वेदनामधेयम्'। सोऽयं वेदः शब्दार्थोभयात्मको भवति। अपरञ्च पारस्कर-गृह्यसूत्रे उक्तमस्ति यत्—'विधिर्विधेयस्तर्कश्च वेदः'। अत्र विधिपदेन विधायक-वाक्यात्मकं ब्राह्मणम्, विधेया मन्त्राः, तर्कः अर्थवादरूपं ब्राह्मणं भवति। केषाञ्चित् विदुषां मते ब्राह्मणातिरिक्तमुपनिषदपि गृह्यते। एवं मन्त्रोपनिषद्रू-पयोः स्वरूपतो गृहीतत्वाच्च ब्राह्मणभाग एव शिष्टो वेदार्थः। एतादृशस्य महिमामण्डितस्य वेदस्य माहात्म्यं महाभारते शान्तिपर्वणि निर्दिष्टमस्ति यत्—

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी वाणी यतः सर्वाः प्रवृत्तयः॥

इत्येव नहि अस्या वेदमय्या वाण्याः दार्शनिकवैयाकरणा भर्तृहरिपादा अपि नितरां प्रशंसन्ति। तद्यथा—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥

अनेनोपर्युक्तप्रकारेण वाण्याः स्तवनं सञ्जायते । सैषा वाणी परोपकार-परायणैर्महर्षिभिर्यथा तथा आर्षपद्धत्या प्राप्ता संसारेऽवतारिता च । तदिदमवतरणमेव शब्दार्थोभयात्मको वेदराशिरेकोऽपि प्रतिपत्तॄणां प्रकृष्टबुद्धिह्रासमनुचिन्त्य शाखाभेदात् नानारूपैर्विभाजितो अधुनापि ग्रन्थरूपेणाऽभ्यस्यते । तथा चेयं वेदवाणी यथा विन्यस्तहस्तपादावयवविशेषैर्महर्षिभिः यत्र-यत्र शाखायां यादृक स्वरवर्णानुपूर्वी विशिष्टार्थेण चक्षुषा दृष्टा तथैव प्रादुर्भाविता, न च तत्र किञ्चिदपि परिवर्त्तिता । अस्मात्कारणादेव तेनैव प्रकारेणाभ्यासयोग्याऽपि भवति । विपरीताऽभ्यासे न केवलं वैफल्यमायाति किन्तु—

हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥

अन्यच्च—'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह' । इत्यादि निर्देशेन विपरीतार्थतापि समायाति । इति विमृश्य परमकारुणिकैर्महर्षिभिः वेदाङ्गप्राथम्येन शिक्षाग्रन्थानामाविष्कारोऽवतरणं वा कृतम् । एवञ्च वेदाङ्गेषु शिक्षाया अद्वितीयं महत्त्वपूर्णं व्यावहारिकञ्च स्थानमस्ति । इयञ्च वेदपुरुषस्य घ्राणमिति कथिता, तथा चोक्तम्—'शिक्षा घ्राणन्तु वेदस्ये'ति । यथा सर्वेषामङ्गानां यथास्थितिस्थिते परिपुष्टे सुन्दरे चापि संस्थितौ घ्राणेन विना पुरुषशरीरं नितान्तं गर्हणीयं विकृतमशोभनञ्च प्रतीयते तद्वत् 'शिक्षा'-नामकेन वेदाङ्गेन विरहिते वेदपुरुषस्य स्वरूपं नितान्तमसुन्दरं बीभत्सञ्च दरीदृश्यते । अत एतत् कुत्सितं बीभत्सं स्वरूपं यथा न भवेत् इत्यस्मात् हेतोः महामुनिभिर्याज्ञवल्क्यादिभिः शिक्षा छात्रकल्याणायोपदिष्टा ।

ऋग्वेदभाष्यभूमिकायां वेदभाष्यकर्तृभिः सायणाचार्यैरुक्तं यत्—'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते = उपदिश्यते सा शिक्षा' । भिन्नप्रकारेण च सुस्पष्टीकृतं यत्—'शिक्षानाम यया मन्त्राणां पदवर्णमात्रास्वरादिज्ञानं वर्णोच्चारणविधिपरिज्ञानपूर्वकस्थानादिपरिचयश्च भवति' । तैत्तिरीयोपनिषदि शिक्षाध्याये महनीये स्वरूपे उक्तमस्ति यत्—'शिक्षां व्याख्यास्यामः । वर्णः, स्वरः, मात्रा, बलं, साम, सन्तान इत्युक्तः' । एतेषां साङ्केतिकं स्वरूपं यथा—वर्णः = अक्षरम्, स्वरः = उदात्तादिः, मात्रा = स्वराणामुच्चारणकालिकः समयः = ह्रस्व-दीर्घ-प्लुताः, बलम् = स्थान-प्रयत्नं, साम = सामदोषेण रहितः, माधु-

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by

र्यादिगुणोपेतः, धैर्यं(धीरता)सम्पन्नः सन्तानः=संहिता, पदानामतिशयेन सन्निधिः ।

अन्यच्च शिक्षासंग्रहप्रस्तावनायां प्रतिपादितमस्ति यत्—'शिक्षयति या सा शिक्षा', 'शक्तुं शक्तो भवितुमिच्छा शिक्षा' इति द्वे व्युत्पत्ती शिक्षाशब्दस्य प्रदर्शिते । शब्दोऽयं योगरूढः । 'शिक्षयति या सा शिक्षा' इत्यपि सम्भवति ।

तदेवं गुणविशिष्टा 'याज्ञवल्क्यशिक्षा' शिक्षासंग्रहे प्राथम्येन निरूपिता विद्यते । सेयं शिक्षा महर्षिप्रवरेण योगीश्वरेण धर्मशास्त्रप्रणेत्रा विश्रुतेन याज्ञवल्क्येन भाषिता विरचिता वा विद्यते ।

इयञ्च प्रौढात्मिका शिक्षा परिमाणे महत्तमा विद्यते । अस्यां पद्यानां संख्या द्वात्रिंशदुत्तर-द्विशत(२३२)परिमिता विद्यते । सेयं शिक्षा शुक्लयजुर्वेदस्य वाजसनेयीसंहितायाः प्राणभूता । अस्यां शिक्षायां वैदिकस्वराणामुदाहरणेन सह विशिष्टं विस्तृतञ्च वर्णनं प्रस्तुतमस्ति । अपरञ्चात्र—लोप-आगम-विकार-प्रकृतिभावानां चतसृणां सन्धीनां विवेचनम्, वर्णानां विभेदः, स्वरूपम्, परस्परं साम्यं वैषम्यञ्चापि वर्णितमस्ति ।

अस्य महनीयस्य शिक्षाग्रन्थस्य विशेषतः शुक्लयजुर्वेदस्याध्ययनेऽध्यापने उपयोगः । तस्मादियं शिक्षा शुक्लयजुर्वेदीयेति प्रथिता विदुषां समाजे । बहूपयोगित्वात् अस्य शतकस्य प्रारम्भेऽस्य शिक्षाग्रन्थस्यानेकाष्टीकासम्पदः आसन् । तासु टीकासु (व्याख्यासु) वेदविद्यानिष्णातस्य पं० विश्वनाथशर्मणः 'शिक्षालोक'टीका, पण्डितप्रवरस्य ज्वालाप्रसादमिश्रस्य च भाषाटीका उपलभ्येते स्म । अनेके हस्तलेखग्रन्था अप्युपलब्धा आसन् । तदनु सुयोगेन १९९४ वैक्रमाब्दे महता समारोहेण 'शिक्षावल्ली' विवृतिसमलङ्कृता दीक्षितोपाह्व-श्रीअमरनाथशास्त्रि-सम्पादिता, व्याकरणाचार्य-ललिताप्रसादडबरालमहोदयेन संशोधिता च प्रकाशिता । वैदिकवाङ्मयसमर्थिता विद्वन्मनोरञ्जनीयं टीका बहुकालपर्यन्तं दुर्बोधस्थलस्फोटने प्रवीणाऽऽसीत् । परञ्चाधुना दुर्लभा अप्राप्ता च सञ्जाता । अन्या अपि तादृशी टीका नोपलभ्यते यया अध्ययनाध्यापनं सुचारुरूपेण भवेत् । अस्त्येका लघुकाया भाषाटीका, यया संस्कृतमाध्यमेनाध्येतॄणां ग्रन्थ-ग्रन्थिस्फोटनं न भवति । एनां दुःस्थितिमवलोक्य चौखम्बासुरभारतीप्रकाशनान्यतमाध्यक्षेण श्रीमता नवनीतदासमहोदयेन निवेदितोऽहमस्मिन् दुरूहे कार्ये संलग्नोऽभवम् । अस्मिन् क्रमे मयाऽनुभूतो यत्—साम्प्रतं संस्कृत-हिन्दी द्वयीभाषयाव्याख्येऽपेक्षित । संस्कृते 'शान्ति व्याख्यालेखने कथं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

कथमपि दुष्प्राप्यां, समादरणीयेन श्रौत-स्मार्तविधिज्ञेन श्रीमता दीक्षितेन अमरनाथ-शास्त्रिणा सम्पादितां शिक्षावल्लीविभूषितां याज्ञवल्क्यशिक्षां सम्प्राप्य कृतकार्योऽहमभवम् । अतस्तान् प्रति विनतेन भावेन श्रद्धाञ्जलिं समर्प्य मुहुर्मुहुः स्मरामि तत्पाण्डित्यम् ।

कृतज्ञताज्ञापनं भारतीयसंस्कृतेश्चिरन्तनं तथ्यमिति दिशा परमादरणीयानां पद्मविभूषणानामाचार्यपण्डितबलदेवउपाध्यायानां गुरुवराणां संस्मरणं प्रणमनं नतेन मूर्ध्ना विनिवेदयामि, यैः समये समये प्रबोधितोऽहमस्मिन् कार्ये प्रवृत्तः । तेषां शुभाशिषा एवैतत्कार्यं सम्पन्नम् ।

अस्मिन् काशीस्थ-सुविख्याते विश्वनाथपुस्तकालयेऽध्यक्षाणां श्रीमतां पं० देवमणियाज्ञिकानां संस्मरणमावश्यकम्, यैः दुर्लभपुस्तकादिप्रदानेन साहाय्यं कृतम् ।

अपरञ्च—सम्पूर्णानन्दसंस्कृतविश्वविद्यालये, वेदविभागे निवृत्तोपाचार्याणां पण्डितप्रवराणां श्रीमतां सूर्यकान्तमिश्रमहाशयानां शिक्षाविमर्शे कृतं साहाय्यं कदापि न विस्मरिष्यामि ।

तथैव ज्यौतिष-वेदाचार्यमायुष्मन्तं कर्मकाण्डनिपुणं पण्डितं मदनझा-सहयोगिनं शुभाशिषा योजयामि । पर्यन्ते भगवन्तं भवानीपतिं विश्वनाथं प्रणम्य विरमामि ।

सर्वे कुशलिनः सन्तु सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत् ॥

मञ्जनि मातृस्मृति भवन,
चकौती
दिनाङ्क—श्रावणी पूर्णिमा
सं० २०५४ वै०

विदुषां वशंवदः
(डॉ०) नरेश झा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगीश्वरो महर्षिः याज्ञवल्क्यः

सुविदितमस्त्येतद् विदुषां समवाये यत् महर्षिर्याज्ञवल्क्यो महान् धर्मचिन्तकोऽध्यात्मविद्योगी ज्ञानी श्रीरामकथायाः प्रवक्ता चासीत्, इति विद्वांसो विदन्ति। अपरञ्च पुराणेषु ब्रह्मण अवताररूपेण चर्चितोऽस्ति। महनीयकीर्तिरयं श्रीमद्भागवते देवरातस्य पुत्रो महर्षेर्वैशम्पायनस्य च शिष्यः कथितः। पूर्वं वैशम्पायनादेव वेदानां विशेषतो यजुर्वेदस्याखिलं ज्ञानमधिगतम्। एकदा गुरुणा वैशम्पायनेन सह विवादे सञ्जाते गुरुः रुष्टोऽभवत्, कथितश्च तेन मत्सकाशात् पठितां विद्यां प्रत्यावर्त्तयेति। गुरोराज्ञा गरीयसीति मत्वा याज्ञवल्क्येन सर्वा ऋचा वमिताः याश्च तदपरशिष्यैर्तित्तिररूपेण गृहीताः। यजुर्वेदस्य सैव शाखा 'तैत्तिरीयशाखा' इति नाम्न्या जगति प्रसिद्धा बभूव।

पुनश्च खिन्नमानसो याज्ञवल्क्यः वेदविद्याप्राप्त्यर्थं भगवतः सूर्यस्योपासनां सम्यक् चकार। तदनु प्रार्थयामास यद् देव ! यदि प्रसन्नोऽसि तदा पूर्वं केनाप्यप्राप्ता यजुर्वेदविद्या यथा मह्यं प्राप्ता भवेत्तथा कुरु।

महर्षेर्याज्ञवल्क्यस्य स्तुत्युपासनया प्रसन्नो भगवान् सूर्यस्तदग्रेऽश्वरूपेण प्रकटितो भूत्वा तस्मै तान् मन्त्रान् उपदिदेश ये मन्त्राः कमपि इतः पूर्वम् अप्राप्ता आसन्। तथा चोक्तं श्रीमद्भागवते—

एवं स्तुतः स भगवान् वाजिरूपधरो हरिः।
यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः॥ (१२।६।७३)

अश्वरूपात् सूर्यात् सम्प्राप्तत्वात् शुक्लयजुर्वेदस्येयं शाखा 'वाजसनेय' 'माध्यन्दिनो' वेति संज्ञया सुप्रसिद्धा, अस्याः शाखायाश्च मुख्यद्रष्टा महर्षिर्याज्ञवल्क्य एव। 'वाजसनेयीसंहितायाः' आचार्यत्वात् 'वाजसनेय' इत्यपि कथयन्ति विद्वांसः। इत्थं महर्षिर्याज्ञवल्क्यः वेदानां मुख्य आचार्यः उपदेशकश्च। सहैवैते शतपथब्राह्मणस्य बृहदारण्यकोपनिषदश्च द्रष्टारोऽपि सन्ति। इत्येव नहि—गार्गी-मैत्रेयी-कात्यायन्यादिभिः सह ज्ञान-विज्ञानयुतो विचारविमर्शोऽप्यभूत्, स चात्यधिको मार्मिकः कल्याणकृदपूर्वश्चासीत्। एतत्सर्वमुपनिषत्सु पुराणेषु चोल्लिखितमस्ति। अन्यच्च—

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

इमे विदेहराजस्य महाराजस्य जनकस्य गुरवः आसन्।

एकदा विदेहस्य जनकस्य हृदि एषा भावना जागृता यदहं कस्यापि ब्रह्मनिष्ठस्य गुरोः सकाशात् ब्रह्मविद्यालाभङ्करिष्ये। इति निश्चित्य सर्वोत्तमस्य ब्रह्मनिष्ठस्य ऋषेः परीक्षणायैका सभा आयोजिता। तस्यां सभायां तैः घोषणा कृता—'ये केचन ब्रह्मनिष्ठाः स्युस्ते स्वतपोबलेनैताः सुवर्णभूताः सहस्रसंख्यका गाः सजीवाः विधाय नयन्तु'। सर्वेषामिच्छाऽभूद्यत्—वयं ग्रहीष्यामः किन्तु पूर्वमुत्थाय यदि वयमेवं कुर्मस्तदा सभ्या जना ज्ञास्यन्ति यदिमे तु स्वयमेव ब्रह्मनिष्ठाः कल्पयन्ति। इति विमृश्य शिष्टाचारस्य लोकापवादस्य च भयेन न कोऽप्युत्थितः। सुयोगेन सशिष्या याज्ञवल्क्या अपि तत्रैवासन्। तैरेकः शिष्यः प्रबोधितो यत्—'समस्ताः गाः नयतु'। तदा तेषां ऋषिभिः गार्ग्या च शास्त्रार्थोऽभूत्। सर्वेषां प्रश्नानां समुचितोत्तरं प्रदत्तम्। सर्वे सन्तुष्टा जाताः, गावश्च सजीवाः सञ्जाताः। सर्वे महर्षेर्याज्ञवल्क्यस्य प्रातिभज्ञानेन, विद्याशक्त्या दिव्ययोगबलेन च पराभूताः। तदा महाराजेन जनकेन तेभ्यो ब्रह्मविद्याऽधिगता।

महनीयकीर्तयः स्मृतिकारा इमे बहुकालपर्यन्तं मिथिलायामधिवासं चक्रुस्तेन अधिसंख्यका विद्वांसः एतान् मैथिला इमे इत्यामनन्ति। प्रमाणानि च बहूनि सन्ति। याज्ञवल्क्यस्मृतौ—'मिथिलास्थः स योगीन्द्रः' इत्यस्यैव प्रमाणं विद्यते। अपि च मध्यमिथिलायां द्वारवङ्गमण्डले योगिवन (जगवन) योगिआरा (जोगियारा) ग्रामावधुनापि विद्यमानौ स्तः। पराम्पराप्राप्तजनश्रुत्या 'एते ग्रामस्यास्य निवासिन आसन्' इत्येवाप्तमुखेभ्यः श्रूयते। तथा च सुप्रसिद्धे कृत्यसारसमुच्चये महानिबन्धे मिथिलाप्रसङ्गे लिखितमस्ति यत्—

श्रीजानकीजानिपवित्रगोत्रा या याज्ञवल्क्यमुनिगौतमजन्मदात्री।
स्वर्गात्मिकाऽवनिगताऽपि पुराणतन्त्रविख्यातकीर्तिलसिता मिथिलापुरीयम्॥

योगीश्वराणां विषये जन्मभूमेर्विचिकित्सा न कर्त्तव्या, ते नैकदेशिनो भवन्ति। अन्यच्च—'विद्वान् सर्वत्र पूज्यते' ते सार्वदैशिका भवन्ति।

इमे योगीश्वराः ब्रह्मविद्याया धर्मशास्त्रस्य च न केवलं तत्त्वदर्शिनोऽपि तु भक्तशिरोमणयोऽप्यासन्। तीर्थराजे प्रयागे ऋषीणां समवाये विशेषतो महर्षिप्रवरं भरद्वाजमेभिः दिव्या रामकथा श्राविता। तथा चोक्तं रामचरितमानसे—

तेहि सन जागबलिक पुनि पावा।
तिन्ह पुनि भरद्वाज प्रति गावा॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

तात सुनहु सादर मनुलाई।
कहऊँ राम के कथा सुहाई॥

इत्येव नहि—योगोपदेष्टृष्वाचार्येषु स्मृतिकारेषु च महर्षेर्याज्ञवल्क्यस्य स्थानं सर्वोत्तममस्ति। याज्ञवल्क्यस्मृत्या सहैव ब्रह्मोक्तयोगियाज्ञवल्क्यः बृहद्योगियाज्ञवल्क्यादि स्मृतयोऽपि तन्नाम्ना प्रथिताः सन्ति। एतदतिरिक्तं याज्ञवल्क्यगीता, याज्ञवल्क्योपनिषद्, याज्ञवल्क्यशिक्षादयो ग्रन्था अपि सुप्रसिद्धाः सन्ति। एभिर्गायत्रीभाष्यस्य सर्वप्रथमं प्रणयनं कृतम्। इत्येव नहि—क्रमसन्तान-गलदृक्-मनस्वाराख्याः तिस्रः शिक्षा अपि प्रणीताः सन्ति।

इत्थं महर्षेर्याज्ञवल्क्यस्य त्यागस्य, तपसः सदाचारमयजीवनस्य च प्रेरणया मानवाः सर्वोत्कर्षं प्राप्तुं शक्नुवन्ति। किम्बहुना योगीश्वरस्य महर्षेर्याज्ञवल्क्यस्य वचनानि भाषितानि सर्वाधिकानि प्रामाणिकानि सर्वोपरि मान्यानि च सन्ति। इत्यलं पल्लवितेन।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषय-सूची

विषयः	पृ०
अथातः त्रैस्वर्यलक्षणं व्याख्यास्यामः	१
स्वराणां भेदास्तेषां लक्षणादीनां वर्णनप्रतिज्ञा	३
तत्रादावाचार्यो याज्ञवल्क्यः स्वराणां वर्णविशेषानाह	४
दैवतानां जातीनाञ्च विचारः	५
अथ गोत्रविचारः	६
अथ स्वराणां छन्दांसि	६
स्वराणां साप्तविध्ये सति अत्र त्रैविध्यं कथं सिद्धयति	७
उदात्तादि त्रिस्वरेषु कथमन्तर्भुक्ताः सप्त स्वराः इत्याह	८
षड्जादि स्वराणामुच्चारणप्रकारमाह	९
अथ मात्राकालः	११
सर्वसम्मतो मात्राकालः	११
चतुराणवत्वं मात्रायां कथमिति प्रतिपादनम्	१२
मन्त्रोच्चारणं कियता कालेन कर्त्तव्यमित्याह	१३
मन्त्राणां मध्येऽवसाने च कः कालनियमः	१४
शून्यहस्तं कुत्र कुत्र विधीयते	१५
साम्प्रतं तमेवानुसरन् ह्रस्वादिस्थितौ मात्रास्वरूपमाह	१६
प्रणवादौ मात्राविशेषः, मात्राणाञ्च संस्थितिः	१७
अथातोऽध्ययनप्रकारमाह, तत्रादौ शरीराङ्गविन्यासः	१९
करसंयोजनं विधाय शरीरस्यान्यतराङ्गनिवेशप्रकारमाह	२१
वेदार्थानुचिन्तनस्यानुक्रमः	२१
वेदाध्ययनस्य सामान्यविधिं प्रतिपाद्याधुना वर्णोच्चारविधिं निर्दिशति	२३
अक्षरोच्चारणे ये दोषाः समापतन्ति तान् निषेधमुखेन प्रतिपादयत्याचार्यः	२४
मन्त्राक्षराणि येन स्वरेणोच्चारितानि तथैव समापनीयानि	२५
वर्णोच्चारणसमये मुखहस्तयोः सामञ्जस्यमावश्यकम्	२५
कः वेदाध्ययनफलं न अश्नुते	२६
तत्र कीदृशाः पुरुषाः वर्णानां समुचितोच्चारणे असमर्थाः भवन्ति	२७
तदा कीदृशो नरः वर्णोच्चारणे समर्थः स्यादिति निर्देशः	२८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः

पृ०
यथाविहितवर्णोच्चारणे के चतुर्दश दोषाः समापतन्तीत्याह २८
संहिताध्ययनं मन्त्रसमुद्र इव दुस्तरम् ३०
साम्प्रतं वेदाध्ययनस्य फलनिर्वचनम्—सर्वपापविनिर्मुक्तिः ३०
संहिता-पद-क्रमपाठानां विशिष्टं फलं किम् ३२
संहितादीनां पाठेन त्रिवेणीस्नानफलम् ३२
उपर्युक्तमाशयमुदाहरणमुखेन प्रतिपादनम् ३३
खदिरादिवृक्षाणां दन्तधावने ग्राह्यतानिरूपणम् ३५
मेधाशक्त्युत्पादनाय (शिष्यम्) किं भक्षणीयम् ३६
हस्तसञ्चालनेन विना वेदाध्ययनं निषिद्धम् ३७
हस्तहीनवेदपाठेन अवैदिकत्वं सिद्धयति ३७
हस्तहीनपठनस्यादृष्टं फलं किं भवति ३८
वेदाऽध्ययने दृष्टादृष्टफलकमर्थज्ञानमपेक्षितम् ३९
अपपाठदूरीकरणाय शिष्यायोपदेशः ४०
सप्त हस्तदोषाः के, दोषरहितपाठेन कस्य लोकस्यावाप्तिः ४१
वर्णोच्चारणविधिं निर्दिश्य पदोच्चारणविधिमाह ४२
दृष्टान्तमुखेन मुख—हस्तयोः साम्यप्रतिपादनम् ४४
कां वृत्तिं कदा प्रयोक्तव्या ४४
दैवतमभिलक्ष्य 'द्रुता' वृत्तिः सर्वत्र न प्रयोगार्हेति निन्दिता ४५

अथ हस्तसञ्चालनविधिः

हस्तसन्निवेशं कथं कुर्यादिति विवेकः ४६
कस्तावत् प्रादेशोद्देशः ४७
पुनश्च प्रादेशमानं विशेषेण ४८
स्वारस्य लक्षणं किम् (हस्तचालने कुत्र कियदन्तरं स्यात्) ४९
उदात्तादीनां कानि स्थितिस्थानानि ५०
चतुर्णां जात्यादीनां हस्तचालने कियदन्तरं स्यात् ५१
उदात्तादीनां हस्तप्रदर्शने वाम-दक्षिणविन्यासप्रकारमाह ५३
अनुदात्तानामनुदात्ते परे हस्तदर्शने किं वैशिष्ट्यमित्याह ५४
किन्तावद् स्वरितवैशिष्ट्यम्, प्रचयविधिश्च का ५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः पृ०
प्रचये स्वरितविधानं, केवले स्वरिते च मृदुत्वं कुर्यात् ५५
ककारादौ हस्तप्रदर्शने कथं कुत्र वा नमनं स्यात् ५६
ऊष्मा(विसर्ग)स्थले अङ्गुलि-निक्षेपप्रकारमाह ५७
अथापि तत्र अनुस्वारस्थले अङ्गुलिक्षेपमाह ५८
याजुषीशिक्षायां सामवेदीयस्वरप्रदर्शनार्थमङ्गुलिचालननिर्देशः ५९
स्वरिते तूभयं क्षिपेदित्यस्य विवरणम् ६०
वकाररहिते ऊष्मासहिते स्वरितत्वविशिष्टे दीर्घे विशेषेणाह ह्रस्वे च ६१
जात्याख्यं नीचपूर्वं न्युब्जापरपर्यायं समवकारमेवोभयक्षेपे प्रयोजकमित्याहाचार्यः ६२
प्रक्रान्तमुभयक्षेपं लक्षयन्नाह ६३
उभयक्षेपे स्वरस्थलं निष्कृष्य दर्शयति ६४
कतिविधा ऊष्मा भवति, तासां प्रचितादीनां कुत्र कुत्रोपयोगः ६४
ऊष्मणः (विसर्गस्य) स्वरूपभेदाः ६५
ऊष्मणः उच्चारणानुसारेण ऊष्मप्रदायित्वं प्रकटयति आचार्यः ६६
अथोष्माणं समानजातिकामाहुः आचार्याः ६७

अथ स्वरसंहिताविधिः

कतिविधाः स्वरित(स्वर)भेदाः, के च ते, कानि च लक्षणानि ६८
तेषां स्वराणामुदाहरणसहितानि लक्षणानि यथा ६९
अभिनिहित-क्षैप्रस्वरयोर्लक्षणे ७०
चतुर्थभेदस्य स्वरितस्य प्रश्लिष्टस्य लक्षणोदाहरणे ७१
स्वरितस्य पञ्चम-षष्ठभेदयोः तैरोव्यञ्जन-तैरोविरामयोर्लक्षणोदाहरणे ७२
स्वरितस्य सप्तमाष्टमभेदयोः पादवृत्त-ताथाभाष्ययोर्लक्षणोदाहरणे ७३
माध्यन्दिनविरुद्धत्वात् स्वरितो न ताथाभाष्यः, व्यञ्जनव्यवधानेऽपि संहितायां स्वरितविधिं तदपवादश्च यथा ७५
निहितः (अनुदात्तत्वविशिष्टः स्वरः) कुत्र कथं वा भवति ७६
स्वरित-प्रचययोः स्थलं कुत्र भवति ७७
प्रचये स्वरितसमत्वस्य कथमुपपादनम् ७७
स्वरितसमत्वे (उच्च-नीचयोगोत्पन्ने) स्वरितस्य कस्मिन् अंशे उदात्तत्वं कुत्र वा अनुदात्तत्वम् ७८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः

पृ०

नीचोच्चसम्पन्ने स्वरिते ऊर्ध्वं हस्तचालनं किं वा अधोमुखम् ७९

वर्णप्रकरणम्

वर्णानां विवरणम्, ते किं वर्ण-दैवत-लिङ्गाः इत्युपपादनम् ८०
स्वरादीनां वर्णादिविचारः ८१
वर्णानां कानि दैवतानि ८२
अक्षराणां के जातिविशेषाः ८३
पदानां रूपाणि ८४
पदानां गोत्राणि दैवतानि च ८४
अक्षराणां दैवत्यं लिङ्गानि च ८५
वर्णानां संस्कारप्रदर्शनार्थं सन्धिभेदानाह ८६
विवृत्तेः उच्चारणप्रकारं तत्स्वरूपञ्च ८७
विवृत्तेः कति भेदाः भवन्ति ८९
चतसृणां विवृत्तीनां सदृष्टान्तानि लक्षणानि ८९
कतिविधाः स्वरभक्तयः ९१
उपर्युक्तानां पञ्चानां स्वरभक्तीनां मध्ये कुत्र का प्रसक्ता भवति ९१
आसामुदाहरणानि यथाक्रमेण ९२
स्वरभक्तिः कुत्र भवति ९३
स्वरभक्तेः प्रयोक्तारः कान् दोषान् परिवर्जयेत् ९३
स्वरभक्तेः लक्षणं केन आख्यातम् ९४
ऋलृवर्णयोरप्युच्चारणविधिमाह ९४
एकारौकारयोः मात्राविधानं किम् ९५
ओङ्कारस्य कति प्लुतस्थानानि ९६
लृकारस्य दीर्घत्वनिवारणम् ९७
यद्यनेकत्र स्वरिताभावस्तदा कथं स्वारो विधीयते ९७
विचक्षणः स्वारं कुत्र कुर्यात् ९८
स्वरेण सन्धौ व्यञ्जनस्य कथमङ्गता भवति ९९
व्यञ्जने परं कथं स्वार्यम् १००
व्यञ्जनानां स्वराङ्गता कथं भवति १०१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषय।	पृ०
व्यञ्जनस्य सस्वरत्वं कथं कुत्र जायते	१०१
स्वर-व्यञ्जनयोः सामानाधिकरण्यम्	१०२
विस्वरं कं विजानीयात्	१०३
व्यञ्जनबाहुल्येषु पदेषु कथं स्वरनियमनम्	१०३
रेफविशिष्टाक्षरे स्वरितविशिष्टत्वनियमस्य कुत्र कुत्रापवादः	१०४
स्वरितानां विविधरूपाणि	१०५
मोक्षं कुत्र न कारयेत् (स्थानादिनिर्दिष्टनियमानां त्यागः)	१०६
'स्पर्शान्तिस्य स्थानकरणविमोक्षः' इति प्रातिशाख्योक्तप्राप्तं पदान्त-विच्छेदं मोक्षं कुत्र न कुर्वीत	१०६
यत्तु केषाञ्चिन्मते शरि प्रथमाः स्वद्वितीयत्वं प्राप्नुवन्ति तन्निवारणं यथा	१०७
साम्प्रतं सस्थानेऽपि मुदि आपस्तम्बमुनिमतेन या द्वितीयापत्तिस्तस्याः निरसनम्	१०९
कसवर्णं तसवर्णञ्च कदा विजानीयात्	१०९
पाणिनिप्रोक्तस्य पाक्षिकस्य तुगागमस्य वारणम्	११०
नकारविकारस्य प्रतिषेधः	१११
अनुस्वारस्य दीर्घलघुभेदांश्च आह	११२
अधुना संयोगाद्यनुस्वारमेव आधृत्य पुनः स्पष्टीकरणम्	११३
अपवादरूपेणानुस्वारस्य द्विमात्रिकत्वमपि भवतीति व्यवस्थापनम्	११३
मन्त्रेषु अनुस्वारस्य सर्वत्र ह्रस्वत्वविधानम्	११४
कतिविधाः ऊष्मणः (विसर्गस्य) गतयः	११५
कुत्र विसर्गविकृतित्वम् ओभावस्य	११५
अष्टविधोष्मणः नामग्रहणपूर्वकमुच्चारणविधानप्रतिपादनम्	११६
अन्तस्थवर्णयोः वकार-यकारयोः उच्चारणवैशिष्ट्यमाह	११७
कतिविधो वकारस्तद्वैशिष्ट्यञ्च किम्	११९
यकार-वकारयोः सर्वत्र सुसंस्पृष्टत्वे प्राप्ते पुनर्व्यवस्थापनम्	११९
पदविच्छेदे यकार-वकारयोः वैशिष्ट्यप्रदर्शनम्	१२०
यकारस्य सुस्पृष्टवं कदा भवति	१२१
पूर्वोक्त उपसर्गपरावित्यस्य विशेषेण व्याख्यानम्	१२२
वकारस्य अन्यद्वैशिष्ट्यम्	१२४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः

पृ०
तत्र के के वकाराः ईषत्स्पृष्टाः स्मृताः १२४
वेदाध्येतॄणां विशेषाः धर्माः समाचरणीयाः १२५
हकारस्य स्थानविशेषे वैशिष्ट्यम्, कुत्र औरसत्वं कुत्र वा कण्ठ्यत्वम् १२६

अथ वर्णोच्चारविधिः

तत्रादौ—औरसहकारस्योच्चारणे ध्वनिः कीदृशी कर्त्तव्या १२८
पुनश्च प्रकारान्तरेणोद्भावयति १२९
कथं वर्णाः प्रयोक्तव्याः १२९
पुनः संयोगाद्यक्षरे कथं वर्णाः प्रयोक्तव्याः १३०
चवर्गपञ्चमाक्षरस्य ञकारस्योच्चारणविधिमाह १३१
तवर्गपञ्चमाक्षरस्य तुल्याक्षरयोगे कथं वर्णाः प्रयोक्तव्याः १३२
तुल्याक्षरयोगे सति पवर्गपञ्चमस्यापि उच्चारणे वैलक्षण्यम् १३३
अग्रे विसर्गे प्राप्ते तत्पूर्वाक्षरस्य गुरुत्वं विसर्गे चेषद्विरामः १३३
तथैवानुस्वारे परे पूर्वाक्षरस्य गुरुत्वम् १३४
ह्रस्वाक्षरस्य गुरुत्वव्यञ्जनानन्तरमधुना दीर्घस्यापि गुरुत्वबोधनम् १३५
रङ्गस्वरोच्चारणं कथं कर्त्तव्यम् १३६
पुनः कथं रङ्गः प्रयोक्तव्यः १३६
रङ्गस्य अनुस्वारत्वं कथं भवति १३७
रङ्गः उपधानिका कदा भवति १३८
तदा के उपधानिनः कति संख्यकाश्च १३८
नासिकाग्रभागादुत्पन्नस्य रङ्गस्य कीदृशं स्वरूपमुदाहरणञ्च १३९
उपधानिका कथम् उच्चार्या १४०
आनुनासिक्यस्य स्वरपरत्वाभावात् कथं रङ्गत्वम् १४०
लुप्ते नकारे स्वरस्य कथं रङ्गत्वम् १४१
कति रङ्गाः प्रवर्त्तन्ते, के च ते १४२
केन प्रकारेण वर्णान् प्रयोजयेत् १४३
साङ्कर्यरहिताः वर्णाः समुच्चारणीयाः १४३

अथ पदाधिकारः

तत्र पदोच्चारणे विशेषाः १४४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः पृ०

पाठकाधमाः कतिसंख्यकाः भवन्ति, के च ते १४५
पाठके कति गुणाः भवन्ति, के च ते १४६
पाठकाले के (आचार्यादयः) किमिच्छन्ति १४७
आम्रेडितत्वं कुत्र कथं भवति १४८
उपचारः कुत्र विज्ञेयः १४९
उपचरितषत्वस्य किमुदाहरणम् १४९
उपचरितषत्वस्य नैमित्तिकं कार्यं चोदाहरति १५०
उपचरितणत्वस्य प्राविधानमाह १५१
उपचरित उपधा आनुनासिक्यं प्रदर्श्यते १५१

अथ प्रकीर्णकानि

पदे व्यञ्जनानां संयोगविशेषादुच्चारणविशेषे कतिविधाः संयोगपिण्डाः भवन्ति १५२
तत्र अयःपिण्डादि विवेचनं यथाक्रमेण १५३
दारुपिण्डान् आह १५३
ऊर्णापिण्डम् आह १५४
विशेषरूपेण दारुपिण्डता कुत्र भवति १५४
अवशिष्टाः ज्वाला-मृत्-वायु-वज्रपिण्डान् आह १५५
पिण्डानामुदाहरणानि १५६
स्वराणां नानादैवत्यत्वं पूर्वमेव निर्दिष्टमधुना स्पर्शादीनां दैवत्यमाह १५७
संयोगपिण्डविशेषे आदौ करणानि निरूप्यन्ते १५८
वर्णानां स्थानानि कतिविधानि भवन्ति १५९
साम्प्रतं केषां वर्णानां किं स्थानमिति निर्दिशति १६०
कण्ठस्थानीयाः वर्णाः के १६०
मूर्धन्याः वर्णाः कतिविधाः भवन्ति १६१
तालव्याः कतिविधाः भवन्ति १६१
दन्त्याः कियत्संख्यकाः भवन्ति १६२
ओष्ठ्याः वर्णाः कतिसंख्यकाः भवन्ति १६२
जिह्वामूलीयाः कतिसंख्यकाः भवन्ति १६३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विषयः

पृ०
यमाः कतिविधाः भवन्ति, के च ते १६४
यमानां कतिसंख्यकान्युदाहरणानि १६५
प्रसङ्गप्राप्तं यमस्थलमाह १६५
यमस्य प्रतिप्रसवस्थलानि यथा १६६
कं वर्णं केनाभिपीडयेत् आद्यं मध्यम् अन्त्यञ्च कथमभिपीडयेत १६७
कं स्वरं स्वरितं प्राहुः १६८
द्विर्वचनोत्पन्नस्यान्यस्य वा वर्गाद्यस्य वर्णविशेषे परे वैशिष्ट्यं प्रदर्शयेति १६९

अथाऽध्येतृधर्माः

वेदपाठकाले दुष्टोच्चारणं त्याज्यमित्युपदिशति आचार्यः १७०
कीदृशाश्छात्राः नराश्च विद्यां न गृह्णन्ति १७१
कः पुनः विद्यामधिगच्छति, के पुनः अधिकारिणः १७२
तदा कः पुनः विद्याधिकारी भवितुमर्हति १७२
विद्याग्रहणे महत्कष्टम्, विद्यार्थिनां सुखस्याभावः १७३
विद्या जिह्वाग्रे कदा आगच्छति १७४
विद्या कदा दार्ढ्यं धारयति १७४
विद्याऽध्ययने अभ्यास एव परं बलम्, अभ्यासात् किन्न साध्यते १७५
विद्याधिगमे उद्यम एव कारणम्, न तु बलवत्ता १७६
दानाऽध्ययनकर्मसु अवन्ध्यं दिवसं कुर्यात् १७६
छात्रैः अल्पीयसी निद्रा विधेया १७७
किञ्च छात्राणामल्पाहारित्वमप्यपेक्षते १७८
गुरुशुश्रूषैव विद्याधिगमे परमोत्कृष्टं साधनम् १७९
गुरुसेवयैव प्राप्ता विद्या फलवती भवति १७९
विद्याप्राप्तेर्नानाविधाः उपायाः १८०
अधुना गुरोः कियत्सामर्थ्यमित्याह १८१
कथं गुरुः ब्रह्ममयो भवति १८२
अयोग्यगुरुकरणे दोषमाह १८२
सुयोग्यगुरोरपि युक्तियुक्तं वचो ग्राह्यम् १८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्रीः ॥

याज्ञवल्क्यप्रणीता

याज्ञवल्क्यशिक्षा

(यजुर्वेदीया)

'शान्ति' संस्कृत-हिन्दी-व्याख्याद्वयोपेता

अथाऽतस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ।

व्याख्याकर्तुं मङ्गलाचरणम्

वन्दे समस्तजगतां परिपालयित्रीं
दात्रीं सदा मधुरमञ्जुलमङ्गलानाम् ।
पूज्यां दयार्द्रहृदयां परितोषयित्रीं
चक्रेश्वरीं भगवतीं शिवशक्तिरूपाम् ॥ १ ॥

प्रणम्य जानकीजानिं याज्ञवल्क्यं तथैव च ।
तनोमि याजुषीं शिक्षां छात्रकल्याणहेतवे ॥ २ ॥
क्वेयं पुरातनी शिक्षा क्व च स्वल्पा मतिर्मम ।
तर्त्तुमिच्छाम्यहं पारमुडुपेनैव सागरम् ॥ ३ ॥
यजुर्वेदो हि यज्ञानां कर्मकाण्डप्रदीपकः ।
कथं वा केन रूपेण कर्तव्यो मन्त्रसंग्रहः ॥ ४ ॥
स्वराणां चैव वर्णानां सुप्रयोगो कथं भवेत् ।
इत्येषा वर्णिता शिक्षा याज्ञवल्क्येन धीमता ॥ ५ ॥
एनां शिक्षामधीत्यैव यागं कुर्वन्ति ये पुनः ।
वैदिकास्ते महीयन्ते स्वर्गे लोके च वै ध्रुवम् ॥ ६ ॥
स्वराणां कीदृशा वर्णा दैवतानि च कानि च ।
जातयश्चाथ मन्त्राणि छन्दांसि विविधानि च ॥ ७ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

एतेषां वर्णनं कृत्वा शिक्षाशास्त्रं प्रवर्त्तितम् ।
विधिमध्ययनस्यापि हस्तसञ्चालनस्य च ॥ ८ ॥
शान्तिशिक्षा-समोपेतां सारतत्त्वप्रदायिनीम् ।
नवीनां कामपि व्याख्यां प्रस्तौमि बुधसंसदि ॥ ९ ॥
योगिना याज्ञवल्क्येन महर्षिप्रवरेण च ।
भाषितेयं यजुश्शिक्षा भव्या भवतु भूतये ॥ १० ॥
सैषा शान्तिसमोपेता व्याख्याद्वयविभूषिता ।
प्रीतयेऽस्तु सरस्वत्याः श्रीनरेशेन टीकिता ॥ ११ ॥

अन्वयः—अथ अतः त्रैस्वर्यलक्षणं व्याख्यास्यामः (वयमिति) ।

शान्ति-व्याख्या—**अथ**=गुरुपरम्परया वेदाध्ययनस्यानुमतिप्राप्त्यनन्तरम् । अत्र 'अथ' शब्दः सप्रयोजनीयः ऐतिहासिकश्च, वेद-वेदाङ्गेतिहासावलोकनेन ज्ञायते यदयं शब्दः ओङ्कारश्च साक्षात् ब्रह्मणो मुखात् कण्ठं भित्वा विनिर्गतावास्ताम् । इति स्मृतौ कोशेषु चोक्तमस्ति । तथा हि—'ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्वा विनिर्यातौ तेन माङ्गलिकावुभावि'ति । एतेनेदमपि सूच्यते यन्माङ्गलिकोऽयं शब्दः ग्रन्थकर्तुः मङ्गलाचरणमपि व्यनक्ति । यतो हि प्राचीनशिष्टाचारानुरोधात् निर्विघ्नग्रन्थसमाप्त्यर्थं मङ्गलाचरणमावश्यकं भवति । अन्यान्यपि कारणानि सन्ति तद्विमर्शेऽवलोकनीयम् । **अतः**=अस्मात् कारणात् । यतो हि वेद-वेदाङ्गयोरध्ययने स्वराणां समुचितविनियोगस्य महती आवश्यकता भवति । पाणिनीय-शिक्षायां कथितमस्ति यत्—'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' । अनेन पाणिन्यनुशासनेन सुतरां सिद्ध्यति यत् स्वर-वर्णाभ्यां विरहितस्य मिथ्याप्रयुक्तस्य वा वेदस्य कर्मवैगुण्येन च विरुद्धफलकथनेन वेद-वेदाङ्गयोः समुचितस्वर-वर्णसंस्कारयोर्विनियोग आवश्यक इति । तस्मात् **त्रयाणाम्**=उदात्तानुदात्तस्वरितानाम् (अन्तर्वर्त्तिविविधभेदसहितानाम्), **स्वराणां**=अज्विशिष्टवर्णानां समूहः त्रिस्वरी, त्रिस्वरी एव त्रैस्वर्यम्, त्रैस्वर्यस्य **लक्षणम्**=लक्ष्यसमुपेतं स्वरूपं तत् । **व्याख्यास्यामः**=सर्वतोभावेन व्याख्यानं करिष्यामः वर्णयिष्यामो वा (वयमित्यत्राध्याहारः) । वयमिति पदेन सर्वनामद्योतकेन महर्षेः योगिनो याज्ञवल्क्यस्य ग्रहणं भवति ।

अत्रायमाशयो विद्यते यत्—वेद-विद्याग्रहणाय येषामुदात्तानुदात्तस्वरितानां स्वराणां समुचितोच्चारण आवश्यकता भवति तानेव प्रथमं वयियिष्याम इति ।

CC-0. Nepal Sanskrit Academy. Kathmandu. Collection

हिन्दी—यह सुनिश्चित है कि वेद-वेदाङ्ग के अध्ययन में प्रवीणता हेतु तथा उससे अभीष्ट फलप्राप्ति के लिए उनका अध्ययन शिक्षाशास्त्रोक्त विधि से हो। वेदाध्ययन में स्वर तथा वर्ण के विपरीत उच्चारण से विपरीत फल होता है—यह सर्वविदित है। अतः उपनीत बटु जब गुरु के पास वेदाध्ययन के लिए जाता है तो उसे सर्वप्रथम शिक्षा-ग्रहण करने की परिपाटी बतायी जाती है। उसी क्रम में महर्षि याज्ञवल्क्य अपनी शिक्षा द्वारा वेदाध्येताओं का मार्ग प्रशस्त करते हैं—यहाँ 'अथ' शब्द मांगलिक भी है, जो कि मंगलाचरण का द्योतक है, जिसे विद्वानों ने शिष्टाचार कहा है। यतः वेदाध्ययन में उदात्त-अनुदात्त-स्वरित का तथा वर्णों का समुचित विनियोग होता है, अतः उन्हीं त्रिस्वर स्वरूप की यथार्थ व्याख्या यहाँ ग्रन्थकार प्रथमतः करते हैं। व्याख्या से तात्पर्य तीनों स्वरों के यथार्थ परिचय, उनके लक्षण, देवता, जाति, गोत्र, छन्द आदि से है।

विमर्श—अमरकोश के नानार्थवर्ग (तृतीय) में 'अथ' शब्द के विभिन्न अर्थ किये गये हैं, जो यथास्थान व्यवहृत हैं। वहाँ कहा गया है कि 'मङ्गलानन्तरारम्भप्रश्नकात्स्न्र्येष्वथो अथ'। यहाँ यह स्पष्ट है कि 'अथ' और 'अथो' दोनों ही समानार्थक हैं। अर्थात् मङ्गल, अनन्तर, आरम्भ, प्रश्न, कात्स्न्र्य (कठिनता), अधिकार, प्रतिज्ञा और अन्वादेश (एक बार कहे हुए को फिर कहना) ये सभी अर्थ दोनों के हैं। अतः याज्ञवल्क्यजी ने इस 'अथ' शब्द का प्रयोग करके सर्वार्थसिद्धि की कल्पना की है। अब इन अर्थों के क्रमानुसार उदाहरण ये हैं—'अथ परस्मैपदानि', 'अथातो ब्रह्मजिज्ञासा' (ब्रह्मसू० १।१।१।१), 'स्नानं कृत्वाथ भुञ्जीत', 'अथ शब्दानुशासनम्' (पात० भा० १।१), 'अथ वक्तुं समर्थस्त्वम्', 'अथ क्रतून् ब्रूमः', 'अथ स्नानविधिः', 'गौडो भवानथेति ब्रूमः', 'अथो इमं वेदमध्यापय', 'अथो एनं छन्दोऽपि', 'अथो खल्वाहुः भीमोऽथार्जुनः'।

त्रिस्वर—उदात्त = 'उच्चैरुदात्तः' (अष्टा० १।२।२९), अनुदात्त = 'नीचैरनुदात्तः' (१।२।३०), स्वरित = 'समाहारः स्वरितः' (१।२।३१)। स्वर = 'अचः स्वराः', अच् = अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ—ये वर्ण हैं।

स्वराणां भेदास्तेषां लक्षणादीनां वर्णन-प्रतिज्ञा—

उदात्तश्चानुदात्तश्च स्वरितश्च तथैव तत्।
लक्षणं वर्णयिष्यामि देवतं स्थानमेव च॥१॥

CC-0. Nanaji Deshmukh Academy, Kaladi. Collection

अन्वयः—उदात्तः च अनुदात्तः च स्वरितः च तत् लक्षणं दैवतं स्थानं च वर्णयिष्यामि ।

व्याख्या—उदात्तः (वि० उद् + आ + दा + क्त) = उच्चस्वरे उच्चरितः, च = पुनः, अनुदात्तः = गुरुस्वरः, ताल्वादिषु स्थानेषु = ऊर्ध्वभागे निष्पन्नोऽनुदात्तः—सिद्धान्त०, च = अपि च, स्वरितः = (स्वरो जातोऽस्य इतच्) उदात्तानुदात्तयोर्मध्यस्थितः स्वरसमाहारः, एते स्वराः मुख्यरूपेण वर्णनीयाः सन्ति, च = तथा च तेषामवान्तरभेदाश्चापि व्याख्यातुं योग्याः भविष्यन्ति। तत् = तेषां स्वराणां, लक्षणं = स्वरूपम्, दैवतं = देवदिव्यताम्, स्थानं = स्थितिः, वर्णस्य कुत्र स्थानमस्ति, यथा—अकुहविसर्जनीयानां कण्ठ इति। च = एवमेव चकारात् वर्णगोत्रादिकं, वर्णयिष्यामि = वर्णनं करिष्यामि, सर्वतोभावेन प्रकाशयिष्यामि (अहं योगियाज्ञवल्क्यः) ।

हिन्दी—वेदाध्ययन में स्वर और वर्ण की विशेष प्रधानता मानी गयी है। इस क्रम में स्वर के उदात्त, अनुदात्त और स्वरित ये तीन भेद हैं, आनुषंगिक रूप से उनके लक्षण, देवता, स्थान आदि का क्रम से वर्णन किया जायेगा। स्वरों के आरोहावरोह से ये तीन भेद होते हैं। जैसा कि उदात्त में स्वरारोह को ऊपर ले जाना, उसे कम करके अनुदात्त में नीचे ले आना तथा स्वरित में सम स्वर का रहना ही कहा गया है।

तत्रादावाचार्यो याज्ञवल्क्यः स्वराणां वर्णविशेषानाह—

शुक्लमुच्चं विजानीयान्नीचं लोहितमेव च ।
श्यामन्तु स्वरितं विद्यादग्निमुच्चस्य दैवतम् ॥ २ ॥

अन्वयः—उच्चं शुक्लं विजानीयात्, नीचं लोहितम् एव च स्वरितं तु श्यामं विद्यात् (दैवतानि च क्रमेण) उच्चस्य अग्निं दैवतम् ।

व्याख्या—उच्चम् = उच्चस्वरेणोच्चरितमुदात्तम्, वर्णस्वरूपेण शुक्लं = श्वेतवर्णयुक्तम्, विजानीयात् = विशेषेण विद्यात् । नीचम् = निम्नस्वरयुक्तमनुदात्तम्, लोहितं = रक्तवर्णम्, तथा चामरः—'लोहितो रोहितो रक्तः शोणः कोकनदच्छविः' (१।५।१५), अपि च—'रुधिरेऽसृग् लोहितास्ररक्तक्षतजशोणितम्' (२।६।६४) (विजानीयादिति शेषः) । एव = निश्चयेन, च = पुनः, विजानीयात् । तु = तथा च, स्वरितम् = समाहारे स्थितम्, तु = पुनः, श्यामं = कृष्णवर्णयुक्तं, 'कृष्णे नीलासितश्यामकालश्यामलमेचकाः' इत्यमरः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(१।५।१४), विद्यात् (विद् ज्ञाने) = अवबुध्येत् । अनेन प्रकारेण स्वराणां स्वरूपप्रसङ्गे वर्णाः निरूपितः, अतः परं तेषां स्वराणां दैवतानि वर्णयताऽऽचार्येणोक्तं यत्—उच्चस्य = उच्चस्थितस्योदात्तस्य, अग्निं = पावकं, दैवतं = देवत्वं, विजानीयादिति पूर्वेणान्वयः ।

हिन्दी—किसी भी वस्तु के वास्तविक स्वरूप को जानने के लिए प्रथमतः उसका वर्णज्ञान आवश्यक है, उसी से यत्किञ्चित् उसके गुण-अवगुण का ज्ञान हो जाता है । यहाँ उच्च=उदात्त का सफेद वर्ण है—ऐसा जानना चाहिए, इससे उसकी उदात्तता प्रकट होती है । अनुदात्त का लाल वर्ण है और स्वरित का काला रंग है, ऐसा जानना चाहिए । अब वर्ण-विचार के पश्चात् दैवत (देवता) का विचार प्रस्तुत करते हुए महर्षि याज्ञवल्क्य ने उदात्त का देवता अग्नि को बताया, जो कि स्वतः तेजोमय है । अमरकोष में दैवत को देवता का पर्यायवाची माना गया है; यथा—'वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्' (१।१।९) ।

दैवतानां जातीनाञ्च विचारः

नीचे सोमं विजानीयात् स्वरिते सविता भवेत् ।
उदात्तं ब्राह्मणं विद्यान्नीचं क्षत्रियमेव च ॥ ३ ॥

अन्वयः—(अपि च) नीचे सोमं विजानीयात् । स्वरिते सविता भवेत् । (जातयश्च) उदात्तं ब्राह्मणं विद्यात्, च नीचं क्षत्रियम् एव ।

व्याख्या—उदात्तस्य देवता प्रतिपादनानन्तरमधुनाऽनुदात्तस्य स्वरितस्य च देवतामाह—नीचे = अनुदात्ते निम्नगामिनि स्वरे, सोमं = चन्द्रमसं (देवतां), विजानीयात् = विशेषेण ज्ञानं कुर्यात् । एवमेव—स्वरिते = इत्याख्ये स्वरे, सविता = सूर्यः, तथा चामरः—'भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' । 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च' (काव्य०), (दैवतम्) भवेत् = भूयात् । अथ स्वराणां जातिविज्ञापनम्—उदात्तम् = एतन्नामकं श्रेष्ठं स्वरं, ब्राह्मणं = विप्रजातिविशिष्टं वेदपाठिनं, 'वेदपाठी भवेद्विप्रः' इति नियमात्, विद्यात् = जानीयात्, च = पुनः, नीचम् = अनुदात्तं निम्नस्वरविशिष्टं, क्षत्रियम् एव = क्षत्रियजातिविशिष्टं, 'क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः' एतद्गुणयुतं विजानीयादिति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—उदात्त स्वर के देवता-प्रतिपादन के अनन्तर अब अनुदात्त तथा

स्वरित स्वर के देवता कहे जाते हैं—अनुदात्त के देवता चन्द्रमा को तथा स्वरित के देवता सविता=सूर्य को जानना चाहिए और जाति-विधान में उदात्त को ब्राह्मण तथा अनुदात्त को क्षत्रिय जाति का मानना चाहिए।

अथ गोत्रविचारः

वैश्यन्तु स्वरितं विद्याद् भारद्वाजमुदात्तकम्।
नीचं गौतममित्याहुर्गार्ग्यं च स्वरितं विदुः॥ ४॥

अन्वयः—स्वरितं तु वैश्यं विद्यात् (इति जातिविचारः)। उदात्तकं भारद्वाजं (विद्यात्), नीचं गौतमम् इति आहुः, स्वरितं च पुनः गार्ग्यं विदुः।

व्याख्या—स्वरितं=समाहारविशिष्टं स्वरं, तु=पुनः, वैश्यं=व्यापार-कर्मणि लग्नं वैश्यजातिविशिष्टम्, विद्यात्=जानीयात् (एतावत्पर्यन्तं जाति-विचार एव)। उदात्तकम्=उदात्तमेव, भारद्वाजं=भरद्वाजगोत्रोत्पन्नं (विद्या-दित्युपरिष्टादध्याहारः), नीचम्=अनुदात्तम्, गौतमं=गोतमगोत्रोत्पन्नम्, इति=एतद्रूपम्, आहुः=कथयामासुः (वैदिकविद्वांस इति), स्वरितं=इत्याख्यं तृतीयं स्वरं, च=भूयः, गार्ग्यम्=गर्गगोत्रसमुद्भूतम्, विदुः=ज्ञानं कुर्युर्विद्वांस—इति गोत्र व्यवस्थापकानि वाक्यानि।

हिन्दी—जाति-निरूपण के क्रम में स्वरित (स्वर) को वैश्य वर्ण का जानना चाहिए। जिस प्रकार वैश्य जाति समन्वयवादी=सबके साथ समान व्यवहार वाला होता है उसी प्रकार स्वरित भी तद्गुणविशिष्ट है।

अब उदात्तादि स्वरों का गोत्र क्या है, इस जिज्ञासा के समाधान में आचार्य कहते हैं कि—उदात्त का भारद्वाज गोत्र है, जो कि ऋषियों में प्रमुख माने गये हैं। अनुदात्त का गौतम गोत्र है, जो कि न्यायदर्शन के प्रणेता भी हैं और स्वरित का गोत्र गार्ग्य वैदिक विद्वानों के द्वारा कहा गया है। इन गोत्रप्रवर्त्तक ऋषियों का प्रभाव वैदिक मन्त्रों में पूर्ण रूप से प्राप्त होता है।

अथ स्वराणां छन्दांसि

विद्यादुदात्तं गायत्रं नीचं त्रैष्टुभमेव च।
जागतं स्वरितं विद्यादेवमेवं नियोगतः॥ ५॥

अन्वयः—उदात्तं गायत्रं विद्यात्, नीचं त्रैष्टुभम् एव च, स्वरितं जागतं विद्यात्, नियोगतः एवम् (विद्यादिति शेषः)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—उदात्तम् = उच्चैरुद्गीयमानं स्वरं, गायत्रं = गायत्रीछन्दभूतम्, विद्यात् = विजानीयात्। वैदिकछन्दस्सु गायत्री छन्दः सुप्रसिद्धमस्ति, भगवद्-गीतायामुक्तमस्ति 'गायत्री छन्दसामहम्' (१०।३५), चतुर्विंशत्यक्षराणां मात्राणां वा छन्दः ऋग्वेदे सुप्रसिद्धमस्ति। नीचम् = अनुदात्तं, त्रैष्टुभं = त्रिष्टुप्छन्दोभूतम्, एव च = निश्चयेन च, 'एवे चानियोगे', विजानीयादिति पूर्वेणान्वयः, स्वरितम् = एतन्नामकं तृतीयं स्वरं; जागतं = जगतीछन्दप्रसिद्ध-भूतम्, विद्यात् = विशेषेण ज्ञानं कुर्यात्, नियोगतः = प्रयोगतः, एवम् = उपर्युक्त-प्रकारेण, वर्णदैवतादिविचारभूतं, ज्ञातुं योग्यमिति।

हिन्दी—स्वरों के छन्द-विचार के प्रसंग में आचार्यजी का मत है कि उदात्त स्वर का गायत्र अथवा 'गायत्री' छन्द है, जो कि वेदों में अतीव प्रसिद्ध है तथा गीता में इसे भगवत्स्वरूप माना गया है। अनुदात्त स्वर का छन्द त्रैष्टुभ या त्रिष्टुप् छन्द है और स्वरित का जागत अथवा 'जगती' छन्द है। इस प्रकार प्रयोगानुसार वर्ण-दैवत तथा छन्द का ज्ञान करे।

स्वराणां साप्तविध्ये सति अत्र त्रैविध्यं कथं सिद्ध्यति—

गान्धर्ववेदे ये प्रोक्ताः सप्त षड्जादयः स्वराः।
त एव वेदे विज्ञेयास्त्रय उच्चादयः स्वराः॥ ६॥

अन्वयः—गान्धर्ववेदे ये षड्जादयः सप्त स्वराः प्रोक्ताः, ते एव वेदे उच्चा-दयः त्रयः स्वराः विज्ञेयाः।

व्याख्या—गान्धर्ववेदे—गन्धर्वस्येदं गान्धर्वं, तेषां वेदः गान्धर्ववेदस्तस्मिन्= वेदोऽयं सामवेदस्योपवेदः, तथा च गायनप्रधानत्वात् गान्धर्वत्वं विद्यते, अपरञ्च 'गायन्ति यं सामगाः' इत्यपि विद्वांसः कथयन्ति, अस्य गान्धर्ववेदस्य व्युत्पत्ति-विषये स्वशिक्षायां मुनिना नारदेनोक्तं यत्'—'गेति ज्ञेयं विदुः प्राज्ञा धेति कारु-प्रवादनम्। वेति वाद्यस्य संज्ञेन (सज्ज्ञेयं) गान्धर्वस्य विरोचनम्'॥ इति। गन्धर्वेभ्य आगतं तस्येति। तत्रैव नारदीशिक्षायां षष्ठयां कण्डिकायां द्वे वीणे वर्णिते स्तः; तद्यथा—'दारवी गात्रवीणा च द्वे वीणे गानजातिषु। सामिकी गात्रवीणा तु तस्याः शृणुत लक्षणम्'॥ अतः गान्धर्ववेदे = सामवेदस्योपवेदे, ये = विद्यमानाः, षड्जादयः = एतन्नामकाः स्वराः, तथा हि—'निषादर्षभगा-न्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्री कण्ठोत्थिताः स्वराः'॥ इति (अमरकोश)। प्रोक्ताः = प्रतिपादिताः सन्ति, ते = उपर्युक्ताः षड्जादय एव वेदे

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

=यजुर्वेदे, उच्चादयः=उदात्तानुदात्तस्वरिताः, स्वराः=स्वरवर्णाः, विज्ञेयाः =समाधेयाः, कथनस्याभिप्रायोऽयं विद्यते यत् गान्धर्ववेदोक्ताः सप्त स्वराः यजुर्वेदे त्रिष्वेवान्तर्भुक्ताः । प्रसङ्गोपात्तत्वात् नारदीशिक्षायां षड्जादीनामुत्पत्तिर्यथा वर्णिता तदिहोपस्थाप्यते; तद्यथा—

नासां कण्ठमुरस्तालुं जिह्वां दन्तांश्च संश्रितः ।
षड्भिः सञ्जायते यस्मात्तस्मात् **षड्ज** इति स्मृतः ॥ १ ॥
वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः ।
नर्दत्यृषभवद्यस्मात्तस्मादृषभ उच्यते ॥ २ ॥
वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः ।
नानागन्धवहः पुण्यो **गान्धार**स्तेन हेतुना ॥ ३ ॥
वायुः समुत्थितो नाभेरुरो हृदि समाहतः ।
नाभिम्प्राप्तो महानादं **मध्यमत्वं** समश्नुते ॥ ४ ॥
वायुः समुत्थितो नाभेर्हृतकण्ठोरः शिरोहतः ।
पञ्चस्थानस्थितस्यास्य **पञ्चमत्वं** विधीयते ॥ ५ ॥
अतिसन्धीयते यस्मादेतान् पूर्वोच्छ्रितान् स्वरान् ।
तस्मादस्य स्वरस्यापि **धैवतत्वं** विधीयते ॥ ६ ॥
निषीदन्ति स्वरा अस्मिन् **निषाद**स्तेन हेतुना ॥ ७ ॥

हिन्दी—गान्धर्ववेद गन्धर्वों से सम्बन्ध रखता है । यह सामवेद का उपवेद है । यतः सामवेद गायन-प्रधान है, अतः गान्धर्ववेद में भी स्वरों का विशेष विवरण है । गान्धर्ववेद में जो षड्जादि सात स्वर कहे गये हैं वे ही यजुर्वेद में उदात्त, अनुदात्त और स्वरित नाम से तीन स्वर माने गये हैं । इन तीनों में ही षड्जादि सप्त स्वर अन्तर्भुक्त हैं ।

उदात्तादि त्रिस्वरेषु कथमन्तर्भुक्ताः सप्त स्वरा इत्याह—

उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।
शेषास्तु स्वरिता ज्ञेयाः षड्ज-मध्यम-पञ्चमाः ॥ ७ ॥

अन्वयः—निषादगान्धारौ उच्चौ, ऋषभधैवतौ नीचौ (ज्ञेयाविति शेषः) । शेषाः षड्जमध्यमपञ्चमाः तु स्वरिताः ज्ञेयाः ।

व्याख्या—निषादश्च गान्धारश्च निषादगान्धारौ=नारदीशिक्षायां वर्णितेषु सप्तस्वरेषु द्वाविति अपि च गान्धर्ववेदे (सामवेदोपवेदे) चर्चितौ, (यजुर्वेदे)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उच्चौ = उदात्तस्वरान्तर्भुक्तौ, ऋषभश्च धैवतश्च ऋषभधैवतौ = अपरौ द्वौ स्वरौ, नीचौ = अनुदात्तस्वरसन्निविष्टौ, विज्ञेयौ। शेषाः = एतदतिरिक्ताः, षड्ज-मध्यम-पञ्चमाः = एतन्नामकाः स्वराः, तु = निश्चयेन, स्वरिताः = समाहृताः स्वराः, ज्ञेयाः—ज्ञातुं योग्याः ज्ञेयाः = अवबोध्याः (वैदिकपण्डितैरिति शेषः)।

हिन्दी—अब गान्धर्ववेद के सात स्वरों का उदात्तादि तीन स्वरों में किस प्रकार विभाजन हुआ है, इस विषय में मुनिवर याज्ञवल्क्य कहते हैं कि—निषाद और गान्धार (सात स्वरों में दो) उदात्त स्वर में अन्तर्भुक्त हैं, ऋषभ और धैवत अनुदात्त में अन्तर्निहित हैं और अवशिष्ट षड्ज, मध्यम एवं पञ्चम नामक तीन स्वर स्वरित में गृहीत हुए हैं।

षड्जादिस्वराणामुच्चारण-प्रकारमाह—

षड्जो वेदे शिखण्ड्यास्य ऋषभः स्यादजामुखे।
गावो रम्भन्ति गान्धारं क्रौञ्चाश्चैव तु मध्यमम् ॥ ८ ॥

अन्वयः—वेदे शिखण्ड्यास्य (स्ये) षड्जः स्यात्, अजामुखे ऋषभः, गावः गान्धारं रम्भन्ति, क्रौञ्चाः मध्यमं (स्वरं) ध्वनन्ति च एव तु।

व्याख्या—प्रस्तुतमष्टमनवमसंज्ञकं श्लोकद्वयं सर्वत्र पुस्तके नास्ति। प्रसङ्गानुरोधात् अत्र निक्षिप्तमस्ति। वेदे=गान्धर्ववेदे, शिखण्ड्यास्ये—शिखण्डिनः= मयूरस्य, आस्यं=मुखं तस्मिन्, वस्तुतोऽत्र शिखण्डशब्दः यस्यार्थो भवति 'मयूरस्य पङ्ख' इति यावत्, शिखण्ड अस्ति यस्यासौ शिखण्डी तस्य, आस्ये = मुखे, षड्जः = एतन्नामकः स्वरः, स्यात् = भवेत्, षड्जस्वरस्योच्चारणं मयूरवाणी केकावत् करणीयमित्याशयः; 'शिखण्डस्तु पिच्छबर्हे नपुंसके' इत्यमरः। अजामुखे—अजायाः = छाग्याः, मुखं तस्मिन्, ऋषभः = एषः स्वरः, यथा अजायाः मुखतः 'मिमियाना' इति ध्वनिर्भवति तद्वदुच्चारणीयमिति भावः, 'अजा छागी शुभच्छागवस्तच्छगलका अजे' इत्यमरः। गावः = धेनवः, गान्धारस्वरविशिष्टं, रम्भन्ति = रम्भमाणाः भवन्ति, अपि च क्रौञ्चाः = पक्षिविशेषाः (जलकुक्कुटी, कुररी) 'क्रुङ् क्रौञ्चोऽथ' इत्यमरः। मध्यमं स्वरं, ध्वनन्ति = ध्वनिं कुर्वन्ति, अत्र 'एव'-'तु' शब्दौ पादपूरणार्थकौ निश्चयात्मकौ च।

हिन्दी—प्रस्तुत स्वरों के उच्चारण वाले ये दो श्लोक सभी प्रतियों में

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

नहीं हैं, किन्तु प्रसंगोपात्त होने से यहाँ दे दिये गये हैं। इनका तात्पर्य है कि गान्धर्ववेद में षड्ज स्वर का उच्चारण मयूर के मुख से जिस प्रकार की वाणी निकलती है, वैसा होना चाहिए। ऋषभ स्वर का उच्चारण बकरियों के मिमियाने के समान हो, गान्धार स्वर गायों के रँभाने के समान हो और मध्यम स्वर क्रौञ्च पक्षी के सदृश स्वर में उच्चारण करना चाहिए। इस छन्द में जो 'वेदे' शब्द आया है, उसके सम्बन्ध में किसी विद्वान् का मत है कि यहाँ 'वेदे' से वेद अर्थ नहीं ग्रहण करना चाहिए, 'विद् ज्ञाने' तक ही सीमित रहे, किन्तु उन्हें पूर्व श्लोक में आये 'वेदे' शब्द पर ध्यान देकर इसका अर्थ स्पष्ट करना चाहिए।

कोकिलः पञ्चमं ब्रूते निषादं तु वदेद् गजः।
आश्वश्च धैवतो ज्ञेयः स्वराः सप्तेति गीयते ॥ ९ ॥

अन्वयः—कोकिलः पञ्चमं ब्रूते, निषादं तु गजः वदेत्, धैवतः च आश्वः ज्ञेयः, सप्त स्वराः (वेदे) इति गीयते।

व्याख्या—कोकिलः = पिकः (मयूर इति भाषायां), तथा हि—'वनप्रियः परभृतः कोकिलः पिक इत्यपि' इत्यमरः। पञ्चमम् = एतन्नामकं स्वरं, ब्रूते = ब्रवीति (वदति)। निषादं = इति स्वरं, तु = तथा हि, गजः = कुञ्जरः, 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः'। वदेत् = ब्रूयात्, धैवतः = इत्येष स्वरः, च = पुनः, आश्वः = अश्वव्यवहृतः, शब्दः = घोटकशब्दः, 'तथा हि—'घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः' इति। धैवतः = एतन्नामकः स्वरः, ज्ञेयः = जानीयात्, घोटकः धैवतं स्वरं ध्वनतीति भावः। अत्र शङ्क्यते यत्—श्लोके 'स्वराः' इति बहुवचनान्तं पदं 'गीयते' इति क्रिया एकवचनान्तमिति कथम्? अत्रैकवचनान्तं क्रियापदं 'इति' इत्यनुरोधेनेति ज्ञेयम्। अत्रायमाशयः—येन प्रकारेण मयूरादयः ध्वनन्ति, तथैव वेदे षड्जादयः ध्वन्यन्ते इति। एतच्च गानं सामवेदे विशेषतः।

हिन्दी—यह तो सर्वविदित है कि कोयल पञ्चम स्वर में बोलता है और हाथी तो 'निषाद' स्वर में ही चिग्घाड़ता है एवं घोड़ा धैवत स्वर का आश्रय लेता है—हिनहिनाता है। इस प्रकार षड्ज आदि सात स्वरों का उच्चारण जैसे मयूर आदि करते हैं उसी प्रकार विज्ञ वैदिक वेद में करें, यही अभिप्राय है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ मात्राकालः

निमेषो मात्राकालः स्याद्विद्युत्कालस्तथा परे ।
अक्षरात्तुल्ययोगाच्च मतिः स्यात्सोमशर्मणः ॥ १० ॥

अन्वयः—निमेषः मात्राकालः स्यात् तथा परे विद्युत् कालः (मात्राकालः) सोमशर्मणः मतिः च तुल्ययोगात् अक्षरात् (मात्राकालः) तिष्ठति ।

व्याख्या—निमेषः=नेत्रकनीनिकास्फुरणोचितः कालः, 'अष्टादश निमेषास्तु काष्ठा त्रिंशत्तु ताः कला' इत्यमरः । मात्रायाः=त्रुटयाः, कालः=समयः, मात्राकालः, 'स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणादयः' इत्यमरः । अस्य मात्राकालस्य सुस्पष्टं विवेचनमस्ति–अथर्ववेदस्य माण्डूकीशिक्षायां; तद्यथा—'अक्ष्णोर्निमेषमात्रेण यो वर्णः समुदीर्यते । स एकमात्रो द्विस्तावान् दीर्घस्तु प्लुत उच्यते' । (मा० शि०, शि० सं० १३७) प्राथम्येन निमेषपात एव मात्राकालः। समुद्दिष्टः । तथा च परे=अन्ये आचार्याः, विद्युतः=चञ्चलायाः, स्फुरणं=चाकचिक्यरूपेण प्रकाशनम्, तस्य कालः मात्राकालः, प्रकारान्तरेण 'विद्युत्' इति पदेन विद्युत्स्फुरणं प्रतीयते; 'तडित्सौदामिनी विद्युत् चञ्चला चपला अपि' इत्यमरः । अस्मिन् विषये सोमशर्मणः आचार्यस्य भिन्नः पन्था विद्यते, तेषां मतिः=बुद्धिः, च=अपि, तुल्ययोगात्—तुल्येन=सदृशेन, योगसम्बन्धोऽस्त्यस्मिन् एवम्भूतात् अक्षरात् वर्णसमाम्नायात् वर्णं प्राप्य वर्णान्तरोच्चारणे यावान् कालः क्षपितः स एव कालः मात्राकालः इति निष्कर्षः ।

हिन्दी—निमेष कहते हैं—नेत्रों के पलक झपकने का काल । आचार्य का प्रथम मत है—नेत्रों के पलक गिरने में जो काल लगता है, वही मात्राकाल है। इससे भिन्न अन्य आचार्य का मत है—बिजली तड़कने में जो समय लगता है वही मात्राकाल है । और सोमशर्मा नामक आचार्य का मत है कि अक्षर के तुल्ययोग (स्थान-प्रयत्नादि से) होने पर एक अक्षर के उच्चारण के पश्चात् जो दूसरे अक्षर के उच्चारण में मध्य का समय लगता है वही मात्राकाल मानना चाहिए ।

सर्वसम्मतो मात्राकालः

सूर्यरश्मिप्रतीकाशात्कणिका यत्र दृश्यते ।
अणुत्वस्य तु सा मात्रा मात्रा च चतुरागमात् ॥ ११ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu. Collection.

अन्वयः—यत्र सूर्यरश्मिप्रतीकाशात् कणिका दृश्यते सा तु अणुत्वस्य मात्रा, मात्रा च चतुराणवा (भवतीति)।

व्याख्या—यत्र = (वातायनप्रविष्टस्य = प्रवेशं कुर्वतः) 'वातायनं गवाक्षोऽथ' इत्यमरः। सूर्यरश्मेः—सूर्यस्य रश्मिस्तस्य = सूर्यकिरणस्य, प्रतीकाशः = प्रकाशोऽथवा सादृश्यद्योतकः, 'निभसङ्काशनीकाशप्रतीकाशोपमादयः' इत्यमरः। तमनुप्राप्यात्र तु त्यब्लोपे पञ्चमी, कणिका = परमाणुः, अतिसूक्ष्मं रजोधूलिः, दृश्यते = अवलोक्यते; तथा चात्र 'जालान्तरगते रश्मौ यत्सूक्ष्मं दृश्यते रजः। तस्य त्रिंशत्तमो भागः (क्वचित् 'षष्टितमो भागः') परमाणुः स उच्यते'॥ सा = परमाणुरूपा, तु = निश्चयेन, अणुत्वस्य = अणुभावस्य, मात्रा = परिमाणं भवति। अत्रायमभिप्रायः—पूर्वं यथा प्रतिपादितं यत् निमेषः मात्राकालः, निमेषपदेन नेत्रस्फुरणकालो लक्ष्यते तद्वदत्रापि कणिकापदेन वातायनप्रविष्टरविरश्मिसंयोगात् अवलोक्यमान-सूक्ष्मधूलिकणिकास्पन्दनमात्राकालो ज्ञेयः। तेनात्र वैशेषिकदर्शने—पुराणोक्तपरमाणुस्वरूपं न ग्राह्यम्। मात्रा च चतुराणवा—अणोः इमानि परिमाणानि = आणवानि, चत्वारि आणवानि यस्यां सा चतुराणवा (ङीबभावोऽत्र)।

हिन्दी—(भुवनभास्कर सूर्य की किरणों में प्रकाशमान अनेक अणु-परमाणु होते हैं) उन सूर्य की किरणों में अथवा अंशों में जो परमाणु दृश्यमान हैं उसके स्पन्दन में जो काल लगता है, वही अणुत्वक मात्राकाल है। उन्हीं चार अणुमात्राओं के समय को लेकर मात्राकाल होता है।

चतुराणवत्वं मात्रायां कथमिति प्रतिपादनम्—

मानसे चाणवं विद्यात्कण्ठे विद्याद् द्विराणवम्।
त्रिराणवं तु जिह्वाग्रे निःसृतं मात्रिकं विदुः॥ १२॥

अन्वयः—मानसे च आणवं विद्यात्, (यदा) कण्ठे (समागतो वर्णः) (तदा तं) द्विराणवं विद्यात्, तु जिह्वाग्रे त्रिराणवं (विद्यात्) निःसृतं, मात्रिकं विदुः।

व्याख्या—मानसे = मनसि; 'स्वान्तं हृन्मानसं मनः' इत्यमरः। च = पुनः, अत्रेदमवधार्यं यत् पाणिनीयशिक्षायां यदुक्तं यत्—'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्'॥ इत्यभिप्रायमभिलक्ष्य कथ्यमानो वर्णो यस्मिन् काले हृदि समायाति, तस्यां स्थितौ

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

तमुच्यमानं वर्णम् आणवम् = अणुमात्रापरिमितं, विद्यात् = जानीयात् । यदा च पुनः कण्ठे = ग्रीवायां समुपस्थितो वर्णस्तदा तं वर्णं द्विराणवम् = द्व्यणुकं, विद्यात् = ज्ञानं कुर्यात्, (यदा) तु = निश्चयेन, पुनः जिह्वाग्रे—जिह्वायाः = रसनायाः, अग्रं तस्मिन् समागतस्तदा तं वर्णं त्रिराणवं = त्र्यणुकं जानीयात् । 'रसज्ञा रसना जिह्वा' इत्यमरः । निःसृतं = मुखात् = आननात् बहिर्गतं वर्णं, मात्रिकम् = मात्रोच्चारणकालिकं 'ह्रस्वात्मकमि'ति यावत्, विदुः = जानन्ति = कथयन्ति, बुधाः = आचार्या इति । परा-पश्यन्ती-मध्यमा-वैखर्येव क्रमेण एकाणवा, द्व्याणवा, त्र्याणवा, चतुराणवा प्रोच्यन्ते । प्रस्तुतोऽयं मात्राकालः पारस्परिकव्यवहारभूतः प्राकृतिकः ।

हिन्दी—चतुराणवत्व मात्रा में किस प्रकार संभव है, इस विषय में महर्षि याज्ञवल्क्यजी का कथन है कि पाणिनीय शिक्षा की परम्परा में जब आत्मा अपनी बुद्धि से अर्थों को एकत्रित कर बोलने के लिए मन को उत्प्रेरित करता है उस समय मन में कथ्यमान जो वर्ण है वही अणुमात्राकाल (आणव) माना जाता है । वह जब कण्ठ में आता है तो दो आणव काल तथा जिह्वा (जीभ के) अग्रभाग तक पहुँचने पर तीन अणुमात्रा काल एवं जब वह शब्द निकल जाय तो विद्वान् उसे पूर्ण मात्राकाल मानते हैं । शास्त्रों में जो परा, पश्यन्ती, मध्यमा और वैखरी कही जाती है वही एकाणवा, द्व्याणवा, त्र्याणवा और चतुराणवा प्रकारान्तर से कहते हैं ।

मन्त्रोच्चारणं कियता कालेन कर्त्तव्यमित्याह—

अवग्रहे तु कालः स्यादर्धमात्रात्मको हि सः ।
पदयोरन्तरे काल एकमात्रा विधीयते ॥ १३ ॥

अन्वयः—अवग्रहे तु (यः) कालः सः अर्धमात्रात्मकः स्यात्, पदयोः अन्तरे काले एकमात्रा विधीयते ।

व्याख्या—अवग्रहे—अव् + ग्रह् + घञ् = अवग्रहस्तस्मिन्, यद्यपि अवग्रहस्थानेके अर्थाः भवन्ति किन्त्वत्र समस्तपदानां घटकशब्दान् पृथक्करणं, सन्धिविच्छेदो वा भवति । येन पदस्य प्रकृतिः स्पष्टता-स्फुटता वा भवेत् । तत्र तु = निश्चयेन, (यः) कालः = समयः, सः = एवम्भूतः, अर्धमात्रात्मकः = अर्धमात्रास्वरूपः, स्यात् = भवेत् । अत्रोदाहरणं भविष्यति—सहस्रशीर्षेति सहस्र, शीर्षा (शु० यजु० ३१।१) । अस्मिन् स्थाने 'स्र' इत्युच्चारणान्तेऽर्धमात्रा-

CC-0. Nepal Sanskrit University. Digitized by eGangotri

कालविलम्बः कर्त्तव्योऽवश्यमेव । नन्वस्मिन् विषये मुनिना कात्यायनेन 'समासेऽवग्रहो ह्रस्वसमकालः' इति प्रातिशाख्ये उक्तः कथमत्र विरुद्धता न भवेदित्याह—द्वयोः स्वाभाविक-पारिभाषिकमात्राविधानत्वेनाविरोधः । अपि च—पदयोः द्वयोः अन्तरे=मध्ये समये, एकमात्रा, विधीयते=क्रियते, तथा च—'गणानाम् । त्वा । गणपतिमि'त्यादौ पदोच्चारणानन्तरमेवान्यस्योच्चारणं भवति ।

हिन्दी—'अवग्रह' शब्द (पद) अनेक अर्थों का अनुगामी होने पर भी यहाँ पद का पृथक्करण अथवा सन्धिविच्छेद करना है, ऐसी स्थिति का वह काल अर्धमात्रात्मक होगा । और दो पदों के अन्तर को स्पष्ट करने वाले काल को एकमात्राकाल माना जाना चाहिए । अर्थात् दो पदों के उच्चारण में मध्य का जो काल है वह एकमात्राकाल होता है ।

मन्त्राणां मध्येऽवसाने च कः कालनियमः—

ऋचोऽर्धे तु द्विमात्रः स्यात्त्रिमात्रः स्यादृगन्तके ।
रिक्तन्तु पाणिमुत्क्षिप्य द्वे मात्रे धारयेद् बुधः ॥ १४ ॥

अन्वयः—ऋचः अर्धे द्विमात्रः (कालः) स्यात्, ऋक् अन्तके तु त्रिमात्रः (कालः) स्यात्, तु बुधः रिक्तं पाणिम् उत्क्षिप्य द्वे मात्रे धारयेत् ।

व्याख्या—ऋचः=सूक्तस्य कण्डिकायाः वा (षष्ठ्यन्तं पदम्), अर्धे=मध्येऽवसाने चात्र अर्धमिति पदं सूक्तस्य कण्डिकायाः वा मध्यावसानयोरुपलक्षणमिति कृत्वा ऋचः सूक्तस्यार्धे कण्डिकानां प्रत्यवसाने वा द्विमात्र(कालावच्छिन्नः)कालः, स्यात्=भवेत् । अत्र सामान्योदाहरणमाह—'गणानान्त्वा गणपतिꣳहवामहे' इत्यादि मन्त्रे 'मम' इत्युच्चारणान्ते मात्राद्वयं विरमितो भूत्वा 'आहमजानि' इत्यादेरुच्चारणं क्रियते । ऋचः कण्डिकायाः सूक्तस्य वा अन्तकेऽवसाने, त्रिमात्रः=तिस्रो मात्राकालः यस्यासौ त्रिमात्रः कालः, स्यात्=भवेत् । अत्राप्युदाहरणं 'गणानां० मम० आहम० गर्भंधम्' इत्यत्रैवास्ति । अस्मिन् (सूक्ते) प्रकरणे कण्डिकायाः अन्तिमावसानगताऽर्धमात्रिकव्यञ्जनमकारोच्चारणानन्तरं द्वयोः ओष्ठयोः विग्रहं विधाय मात्रात्रयं यावत् विरम्य अग्रे समागतो मन्त्रः पठितव्यः । तु=परञ्च । अत्र प्रक्रियायां रिक्तहस्ते सति विशेषप्रकारमाह—बुधः=वैदिकविद्वान्, रिक्तं=शून्यं, पाणिम्=दक्षिणहस्तम्, उत्क्षिप्य=ऊर्ध्वमुत्थीकृत्य, द्वे=द्विसंख्ये, मात्रे=मात्राद्वयं, धारयेद्

CC-0. Nepal Research Centre, Kathmandu Collection

=धारणं कुर्यात् । अत्रायमाशयो यत्—यत्रावस्थितं स्यात्तत्रैव स्थापनीयं न तु चालनीयमिति ।

हिन्दी—मन्त्रों के मध्य में और अन्त में कितनी मात्राओं का (काल) विनियोग हो, इस विषय में आचार्य का मत है कि किसी सूक्त अथवा कण्डिका के मध्य अथवा अन्त में दो मात्रा (काल) विरमित होना चाहिए और ऋचा=कण्डिका के अन्त में तीन मात्रिक काल विरमित हो। इस प्रक्रिया में रिक्तहस्त होने पर विशेष विधान किया गया है। वहाँ के लिए कहा गया है कि यदि शून्यपाणि (रिक्तहस्त) होने पर वैदिक विद्वान् हाथ उठाकर दो मात्रा (काल) को धारण करें।

शून्यहस्तं कुत्र कुत्र विधीयते—

विवृत्तौ चावसाने च ऋचोऽर्द्धे च तथा परे ।
पदे च पादसंस्थाने शून्यहस्तं विधीयते ॥ १५ ॥

अन्वयः—विवृत्तौ च अवसाने च ऋचः अर्द्धे च तथा परे पदे पादसंस्थाने च शून्यहस्तं विधीयते ।

व्याख्या—विवृत्तिर्नाम द्वयोः स्वरयोर्मध्ये सन्ध्यभावरूपा, तस्यां विवृत्तौ, अपरञ्चास्यामेव शिक्षायां वर्णप्रकरणे सुस्पष्टं विवेचनमस्ति यत् 'द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते । विवृत्तिस्तत्र विज्ञेया—' ॥ विवृत्तौ तावदुच्चारणभङ्गोऽपि भवति, च=पुनः, अवसाने=कण्डिकाया अन्ते, च=पुनः, ऋचः अर्द्धे=कण्डिकायाः (सूक्तस्य वा) मध्यावसाने, तथा=अपि च, परे=अन्ये, विरामे—अवग्रहाऽनुस्वारविसर्गादिषु, पदे=मन्त्रस्य पदपाठसमये, अर्थात् पूर्वपदोच्चारणानन्तरम् अन्यस्मिन् पदोच्चारणे मध्यवर्ती यो विरामस्तत्र, पादसंस्थाने=पादसमाप्तौ, च=पुनः, शून्यहस्तं=रिक्तहस्तत्वं भवति (शून्यहस्तमित्यत्र व्याकरणानुरोधेन नपुंसकत्वम्) । विधीयते=शून्यहस्तत्वं क्रियते इत्याशयः ।

हिन्दी—विवृत्ति कहते हैं दो स्वरों के बीच में सन्धि का अभाव, इसी शिक्षा के वर्ण-प्रकरण में ऐसा ही विवेचन है। ऐसी विवृत्ति में, कण्डिका (सूक्त) के अन्त में और कण्डिका मध्य अवसान में तथा मन्त्र के पदपाठ के समय और पाद की समाप्ति में रिक्तपाणि (शून्यहस्त) किया जाता है।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

इनके अतिरिक्त अवग्रह, अनुस्वार और विसर्गादि की स्थिति में शून्य हाथ किया जाता है। इस प्रकार इनकी संख्या सात हो जाती है।

साम्प्रतं तमेवानुसरन् ह्रस्वादि स्थितौ मात्रा-स्वरूपमाह—

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चाऽर्धमात्रिकम् ॥ १६ ॥

अन्वयः—ह्रस्वः (वर्णः) एकमात्रः भवेत्, दीर्घः द्विमात्रः उच्यते, प्लुतः तु त्रिमात्रः ज्ञेयः, व्यञ्जनं च अर्धमात्रिकं (ज्ञेयम्)।

व्याख्या—ह्रस्वः = अ, इ, उ इत्यादिषु प्रत्येको वर्णः, एकमात्रः = एका मात्रा यस्य असौ वर्णः, भवेत् = स्यात्, दीर्घः = आ, ई, ऊ इत्यादयो वर्णाः, द्विमात्रः = द्वे मात्रे यस्य असौ वर्णः द्विमात्रः, उच्यते = कथ्यते (बुधैरिति शेषः), प्लुतः = दीर्घीकृतः, प्रदीर्घः, त्रिमात्रः = तिस्रः मात्राः यस्य असौ वर्णः त्रिमात्रः, ज्ञेयः = बोध्यः, अस्मिन् विषये मुनिना पाणिनिनाऽष्टाध्याय्यां निर्दिष्टं यत् 'ऊकालोऽज्झ्रस्वदीर्घप्लुतः' (अ० १।२।२७) उश्च ऊश्च उ ३ श्च वः, वां कालो इव कालो यस्य सोऽच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात्। तथा च 'ह्रस्वं लघु' (१।४।१०), 'संयोगे गुरु' (१।४।११), 'दीर्घं च' (१।४।१२) इत्येतेषां सूत्राणामपि विनियोगः कृतः। एतेनेदमायातं यत्—ह्रस्वादयो वर्णाः निर्दिष्टैकादिमात्रानुसारेणोच्चारणयोग्याः भवन्ति। नन्वत्र शङ्कते यत्—व्यञ्जनं चाऽर्धमात्रिकमित्यनुसारेणास्यार्धमात्रिकस्योच्चारणं कथं भविष्यति इति। असङ्गतमिव प्रतिभाति, यतो हि आणवद्वयपरिमिताया अर्धमात्रायाः कण्ठे एव परिसमाप्तिर्भविष्यति, सत्यमेतत्—स्वरसमवेतस्य व्यञ्जनस्य स्वरगृहीतमात्रासमयापेक्षया अधिकमात्रया समुच्चारणं समुचितमिति वाञ्छनीयत्वादिति। अस्मिन् विषये महाभाष्यकाराः पतञ्जलयः कथयन्ति यत्—'न ह्यचमन्तरा व्यञ्जनस्योच्चारणमपि सम्भवति।

हिन्दी—ह्रस्व, दीर्घ, प्लुत और व्यंजन वर्ण की कितनी मात्राएँ होती हैं, इस विषय में आचार्य का मत है कि—ह्रस्व वर्ण (अ इ उ) एकमात्रिक होते हैं, दीर्घ वर्ण (आ ई ऊ) दो मात्राएँ वाले होते हैं, प्लुत वर्ण को त्रिमात्रिक तथा व्यञ्जन वर्ण को अर्धमात्रिक जानना चाहिए।

यहाँ विशेष रूप से ध्यातव्य यह है कि पूर्वाचार्यों ने स्वरों (अचः स्वराः) की ही मात्रा का निर्देश किया है और वे ही ह्रस्व-दीर्घ-प्लुत

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

कहलाते हैं। इनमें प्लुत का क्वचित् ही व्यवहार होता है, किन्तु व्यञ्जन वर्णों में भी ह्रस्व-दीर्घ व्यवहृत होते हैं।

प्रणवादौ मात्राविशेषः, मात्राणाञ्च संस्थिति.—

प्रणवं तु प्लुतं कुर्याद् व्याहृतीर्म्मात्रिका विदुः।
चाषस्तु वदते मात्रां द्विमात्रं वायसोऽब्रवीत् ॥ १७ ॥

अन्वयः—प्रणवं तु प्लुतं कुर्यात्, व्याहृतीः मात्रिकाः विदुः। चाषः मात्रां वदते वायसः द्विमात्रम् (द्विमात्रां) अब्रवीत्।

व्याख्या—प्रणवम् = एकाक्षरमोङ्कारं, प्लुतं = त्रिमात्रिकं, कुर्यात् = उच्चारणं कुर्यात्, व्याहृतीः ('ति' क्वचित्पाठः) किन्तु व्याहृतयस्तु तिस्रः भवन्ति 'भूः भुवः स्वः' इत्येताः, मात्रिकाः = एकमात्रिकाः, विदुः = जानन्ति, कथयन्त्याचार्याश्च। प्रत्येका व्याहृतिः एकमात्रात्मिका भवतीति निष्कर्षः। तथा च—'भूः' इति व्याहृतिमुच्चार्यैकया मात्रया विरमितो भूत्वा पुनरन्यां व्याहृतिमुच्चरेत्, न त्वेकदैव। चाषः = सुप्रसिद्धः नीलकण्ठपक्षिविशेषः; 'चाषः किकीदिविः' इत्यमरः। मात्राम् = एकां मात्रां, ह्रस्ववर्णमित्यर्थः, वदते (ति) = ब्रूते (आर्षत्वात्), वायसः = काकपक्षिविशेषः (पक्षिणां चैव वायसः); 'काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः। ध्वाङ्क्षात्मघोषपरभृद्बलिवायसा अपि' इत्यमरः। द्विमात्रं = दीर्घवर्णम्, अब्रवीत् = वक्ति। अत्र भूतकालिकः प्रयोगः सापेक्षः, केवलं सौविध्याय (अब्रवीदित्यत्र भूतकाले वर्त्तमानसामीप्ये प्रत्ययः)।

हिन्दी—प्रणव (ओङ्कार) आदि में मात्रा-विशेष का एवं मात्राओं की स्थिति के विषय में कहा गया है कि—प्रणव (ओंकार) को प्लुत अर्थात् त्रिमात्रिक उच्चारण करे, व्याहृतियों (भूः, भुवः, स्वः) को एकमात्रिक जानकर उच्चारण करे। एवं मात्रा की संस्थिति में नीलकण्ठ पक्षी एक-मात्रा अर्थात् ह्रस्व में बोलता है। कौआ दीर्घस्वर में द्विमात्रिक बोलता है। यहाँ वर्तमान काल में भूतकालिक क्रिया है।

शिखी वदति त्रिमात्रं मात्राणामिति संस्थितिः।
वर्णो जातिश्च मात्रा च गोत्रं छन्दश्च दैवतम् ॥ १८ ॥

अन्वयः—शिखी त्रिमात्रं वदति, इति मात्राणां संस्थितिर्भवति। (अथ वर्णादीन् उपसंहरत्याचार्यः) वर्णः जातिः च मात्रा च गोत्रं छन्दः दैवतं च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—शिखी = शिखा अस्ति यस्य असौ शिखी = मयूरनामकः सुप्रसिद्धः पक्षी— नृत्ये प्रसिद्धः; 'मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्। शिखावलः शिखी केकी मेघनादानुलास्यपि'॥ इत्यमरः। त्रिमात्रम् = प्लुतवर्णम्, वदति = वक्ति, इति = अनेन प्रकारेणेत्थं वा, मात्राणां = तिसृणां ह्रस्व-दीर्घ-प्लुतमात्राणां, संस्थितिः = संस्थानम्, व्यवस्था वा आचार्येण कृतेति कृतमिति वा। केषाञ्चिन्मते अस्माभिर्वैदिकैः कृतेति संयोजयन्ति। अस्योदाहरणं भवति यथा—एकेति संख्योच्चारणे यावान् कालविलम्बः स्यात् स कालः नीलकण्ठोक्तो ग्राह्यः, तथैव द्वित्वसंख्योच्चारणे यथा कालविलम्बो भवति स काकोक्तो मात्रा–द्वितयकालः, अपरञ्च—संख्यात्रयोच्चारणे यथाकालस्यावश्यकता भवति स कालः मयूरप्रोक्तः इति विज्ञेयः। अतः परं वर्णादीनामुपसंहारः—वर्णः = श्वेतादिः, जातिः = ब्राह्मणादिः, मात्रा = ह्रस्व-दीर्घ-प्लुतात्मिका, गोत्रम् = भारद्वाजादिः, छन्दः = गायत्रीप्रभृति, दैवतम् = वैश्वानरादि, अत्रानेके चकाराः समुच्चयबोधकाः सन्तीति।

हिन्दी—मात्रा काल निर्धारण के विषय में आगे कहा गया है कि शिखी = मयूर त्रिमात्रिक स्वर में बोलता है। इस प्रकार ह्रस्व, दीर्घ और प्लुत स्वरों को क्रमशः नीलकण्ठ, कौआ तथा मयूर एकमात्रा, द्विमात्रा और त्रिमात्रा में बोलते हैं, यही परिमाण है। यही मात्राओं की संस्थिति है। संस्थिति शब्द का आचार्यों ने विभिन्न अर्थ ग्रहण किया है। वर्ण = सफेद, लाल, पीला आदि; जाति—ब्राह्मण आदि, मात्रा— ह्रस्वादि, गोत्र = भारद्वाज आदि, छन्द = गायत्री आदि, दैवत = अग्नि आदि का विचार करते हुए—।

एतत्सर्वं समाख्यातं याज्ञवल्क्येन धीमता।

अन्वयः—एतत् सर्वं धीमता याज्ञवल्क्येन समाख्यातम्।

व्याख्या—एतत् = पूर्वप्रतिपादितं, सर्वम् = वर्ण-जाति-मात्रा-गोत्र-छन्द-दैवतविषयकम्, धीमता = तद्विषयेषु विज्ञेन, बुद्धिमता याज्ञवल्क्येन (मया), समाख्यातम् = सम्यग्रूपेण व्याख्यातम्। (अत्रैतद् कारणं विद्यते यत् तेषां वर्णादीनामज्ञाने यज्ञ-दानाध्ययनादिकर्मसु अनर्हत्वात् कर्म वैयर्थ्यं स्यादिति)।

हिन्दी—इस प्रकार इस मात्रा-अधिकार में वर्ण, जाति, मात्रा, गोत्र, छन्द और दैवत विषयक समस्त विवेचन ऊहापोहपूर्वक वेदविद्याप्रवीण मुनिवर याज्ञवल्क्य ने (मैंने) अच्छी तरह व्याख्या की है। क्योंकि बिना ऋषि-छन्द-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

देवता आदि के ज्ञान के मंत्रों के द्वारा यज्ञ-याग-अध्यापनादि कार्य सुसम्पन्न होना संभव नहीं है। यही विचार कर उन्होंने इनकी योजना प्रस्तुत की। इसके फलाफल के विषय में सर्वानुक्रमणी में विशेष रूप से कहा गया है।

इति स्वरप्रकरणे मात्राधिकारः।

अथाऽतोऽध्ययनप्रकारमाह, तत्रादौ शरीराङ्ग-विन्यासः—

हस्तौ सुसंयतौ धार्यौ जानुनोरुपरि स्थितौ ॥ १९ ॥
गुरोरनुमतिं कुर्यात् पठन्नाऽन्यमतिर्भवेत्।
ऊरुभागे तृतीये तु कूर्परं न्यस्य दक्षिणम् ॥ २० ॥

अन्वयः—हस्तौ जानुनोः उपरि स्थितौ धार्यौ, तृतीये ऊरुभागे तु दक्षिणं कूर्परं न्यस्य गुरोः अनुमतिं कुर्यात्, पठन् अन्यमतिः न भवेत्।

व्याख्या—तत्रादावध्ययनक्रमे कीदृशे आसने उपस्थाय पठितव्य इत्येष विचारः प्राथमिकः कर्त्तव्यः। आसनं कीदृशमिति विचारे 'पातञ्जलयोगदर्शने लिखितमस्ति यत् 'स्थिरसुखमासनमि'ति। स्थिरसुखं केन रूपेण भविष्यति इति जिज्ञासायामुपस्थमासनविशेषं विधायेति तज्ज्ञाः कथयन्ति। तथा च तैत्तिरीयारण्यके लिखितमस्ति यत्—'दर्भाणां (कुशानां) महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः'। एवञ्च 'दक्षिणोत्तरौ पाणी पादौ कृत्वा' अस्मिन् विषये भाष्यकाराः सायणाचार्याः कथयन्ति यत् 'दर्भाणां सम्बन्धि आसनमास्तीर्य तस्योपर्युपस्थं कृत्वा' एतदेवासनमिति। वस्तुतः 'उपस्थ' शब्द एवासनविशेषं प्रकटयति। अपरञ्चामरकोशे लिखितमस्ति यत् 'उपस्थो=वक्ष्यमाणयोः भगं योनिर्द्वयोरिति'। अन्यच्चात्र स्त्रीपुरुषयोर्जननेन्द्रियस्यैव प्रकारान्तरेण ग्रहणं भवति। तथा च याज्ञवल्क्यस्मृतौ 'स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः'। एवमेव भर्तृहरिः अपि 'स्थूलोपस्थस्थलीषु' इति कथयित्वा स्त्रियः योनिमेव स्वीकरोति।

पुनः आसनस्य संरचना कीदृशी भाव्येति विचारावसरे—'आकुञ्चितस्य सव्य(वाम)जानुन उपरि दक्षिणपादप्रक्षेपे (स्थापिते) सति यत् सुखावस्थानं भवति तत्कृत्वा (एवञ्च) दक्षिणपादोऽपि वामपादस्योपरि स्थापनीयः' तेन पूर्णसुखमासनं भवति। योगाभ्यासिनः एनमेवार्द्धपद्मासनमिति कथयन्ति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतः परं प्रकृतमनुसरामि—हस्ताविति । हस्तौ = पाणिद्वयम्, जानुनोः = ऊरुपर्वणोः; 'जानूरुपर्वा' इत्यमरः । जङ्घोरुसन्धिस्थितयोरिति भावः, उपरि = उपरिभागे, स्थितौ = स्थापितौ, सुसंयतावुक्तरीत्या सुनिश्चितौ, धार्यौ = धारणीयौ, तथाविधेन संस्थापनीयाविति । तत्रायं क्रमः शिक्षावल्लीविवृत्यां वर्णितो विद्यते, तद्यथा—'वामोरौ वामकूर्परम्, दक्षिणोरौ वाममुष्टिं चाधः कृतकरभं निधाय, तत्र मुष्टौ दक्षिणकूर्परं धरणीयम् । उभयजानुस्थस्य वामकरस्य मुष्ट्युपरि दक्षिणकूर्परनिधानेन दक्षिणकरस्यापि जानुद्वयस्थत्वमर्थसिद्धः । अतो द्वावपि करौ जानुनोरुपरि धृतौ स्यातामिति भावः' । एतत्सर्वं ब्रह्मयज्ञार्थं = वेदाभ्यासार्थं भवति ।

नन्वत्र पारस्करगृह्यसूत्रस्य गदाधरभाष्ये यदुक्तं यत्—'बद्धाञ्जलिर्दर्भपाणिः प्राङ्मुखस्तु कुशासनः । वामाङ्घ्रिमुत्तमं कृत्वा दक्षिणं तु तथा करम् ॥ दक्षिणे जानुनि करोत्यञ्जलिन्तमृषेर्मतात्' । इत्येतदञ्जलिविन्यसनं केनाप्युक्तं तत्रापरञ्चोक्तं—'द्वितीये तु तथा भागे वेदाभ्यासो विधीयते । वेदाभ्यासो हि विप्राणां परमं तप उच्यते ॥ ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः' । तथा च दक्षस्मृतौ—वेदस्वीकरणम्पूर्वं विचारोऽभ्यासनञ्जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा' ॥ इत्येवं पञ्चप्रकारस्यापि ब्रह्मयज्ञप्रवचनेनात्रापि सम्बध्यते ।

तृतीये = द्व्यधिके, ऊरोः = दक्षिणसक्थ्नः, भागः = अंशस्तस्मिन् ऊरुभागे, दक्षिणं = वामभिन्नं, कूर्परं = कफोणिं (केहुनी इति भाषायाम्); 'स्यात्कफोणिस्तु कूर्परः' इत्यमरः । न्यस्य = विन्यस्य, स्थापयित्वा, गुरोः = वेदाभ्यासकारयितुः आचार्यस्य, अनुमतिम् = आज्ञां, कुर्यात् = प्रतीक्षां कुर्यात् । शिष्यश्च, पठन् = अध्ययनं कुर्वन्, अन्यमतिः = पठनात् = स्वाध्यायादतिरिक्तविषये इतस्ततः बुद्धिं न कुर्यादित्यर्थः ।

हिन्दी—वेदाध्ययन के समय आचार्य के पास किस प्रकार बैठना चाहिए तथा किस प्रकार का आचरण करना चाहिए—इस विषय में मुनिवर याज्ञवल्क्य ने छात्र को अध्येता को समझाते हुए कहा है कि—दोनों हाथों को क्रम से दोनों जंघाओं के ऊपर व्यवस्थित रूप से स्थिरतापूर्वक रखना चाहिए । उसके बाद आचार्य की आज्ञा प्राप्त कर ही अध्ययन में प्रवृत्त होना चाहिए । (अध्ययन प्रारम्भ करने के समय) जंघा के तीसरे भाग में दाहिनी कोहनी को स्थापित करना चाहिए । छात्र को कैसे किस प्रकार के आसन पर बैठना

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चाहिए—इस विषय में योगदर्शन में जैसा कहा गया है कि 'स्थिर सुख जिसमें प्राप्त हो वही आसन है'। स्थिरसुख आसन पालथी मारकर बैठने से ही हो सकता है। ऐसे आसन पर उपर्युक्त क्रम से अंगों का विन्यास कर विनीत भाव से गुरु की आज्ञा प्राप्त कर वेदाभ्यास प्रारम्भ करना चाहिए। इसमें सबसे विशेष बात यह है कि छात्र को एकाग्र होकर काकचेष्टा के समान अध्ययन करना चाहिए; उसकी दृष्टि, उसका मन अन्यत्र कहीं न जाय। इस प्रकार होकर विद्याध्ययन करने से शीघ्र ही विद्या की प्राप्ति होती है।

करसयोजनं विधाय शरीरस्यान्यन्तराङ्गनिवेशप्रकारमाह—

सुप्रसन्नमना भूत्वा किञ्चिन्नम्रस्त्वधोमुखः।
निवेश्य दृष्टिं हस्ताग्रे शास्त्रार्थमनुचिन्तयेत् ॥ २१ ॥

अन्वयः—सुप्रसन्नमना भूत्वा किञ्चित् नम्रः अधोमुखः हस्ताग्रे दृष्टिं निवेश्य शास्त्रार्थम् अनुचिन्तयेत्।

व्याख्या—सुप्रसन्नमना—सुष्ठु=शोभनं, प्रसन्नं=मुदसहितं, मनः=मानसं, यस्य एवम्भूतः सः; 'स्वान्तं हृन्मानसं मनः' इत्यमरः। भूत्वा=विधाय, किञ्चित्=सामान्येनेषत्, नम्रः=नम्रीभूतः पृष्ठदेशेन नतः, तु=पुनः, अधोमुखः—अधः=निम्नभागे, मुखम्=आननं, यस्यासौ=विनतकण्ठः (भूत्वा), एवम्भूतेन हृदुपलक्षितस्थानविशेषादुपरिगतः करः, भ्रुवः पर्यन्तं यावत् व्रजन्, प्रादेशमितोर्ध्वगामी भूयादिति विमर्शः। एवञ्च हस्ताग्रे=हस्तयोरग्रे, प्रसारितकराभिमुख्ये, दृष्टिं—दृश्यते अनयेति दृष्टिः, ताम्=अवलोकनक्षमतां, निवेश्य=सन्निधाय, शास्त्रार्थं—शास्त्रस्य अर्थं=वेदार्थं, शिक्षा-कल्पाद्यङ्गम्, अनुचिन्तयेत्=चिन्तनं कुर्यात्, शिक्षानुसारेण पठनार्थं प्रवृत्तो भवेत्।

हिन्दी—वेदाध्ययन प्रारम्भ करने के उपक्रम में हाथों को यथास्थान रखने के पश्चात् अन्य अंगों को किस प्रकार संधारण करना चाहिए—इस विषय में आचार्यजी कहते हैं कि—छात्र अत्यन्त प्रसन्न मन होकर कुछ नम्रीभूत अवस्था में नीचे की ओर मुख करके हाथ के आगे अपनी दृष्टि रखते हुए शास्त्र के अर्थ का अर्थात् शिक्षापद्धति से अध्ययन करने की इच्छा करे।

वेदार्थानुचिन्तनस्यानुक्रमः—

प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित्रीं चानुपूर्व्येण ततो वेदान् समारभेत् ॥ २२ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized

अन्वयः—प्राक् प्रणवं प्रयुञ्जीत, तत् अनन्तरम् व्याहृतीः (प्रयुञ्जीत), च सावित्रीम् आनुपूर्व्येण (प्रयुञ्जीत), ततः वेदान् समारभेत् ।

व्याख्या—प्राक् = प्रथमं (वेदाध्ययनप्रारम्भात् पूर्वं); 'प्रागतीतार्थकम्' 'दिग्देशकाले पूर्वादौ प्रागुदक् प्रत्यगादयः' इत्यमरः (३।४।१६, २३)। प्रणवं = प्लुताक्षरमोङ्कारं; 'ओङ्कारप्रणवौ समौ' इत्यमरः। प्रयुञ्जीत—प्रकर्षेण युञ्जीत = अभ्यसेत् ब्रूयादित्यर्थः, तदनन्तरम्=तत्पश्चात् (प्रणवोच्चारणानन्तरम्), व्याहृतीः (वि + आ + हृ + क्तिन्) = उच्चारणम्; 'न हीश्वरव्याहृतयः कदाचित् पुष्णन्ति लोके विपरीतमर्थम्'–(कु० ३।६०) कपिञ्जलप्रदर्शितन्यायेन तिस्रः 'भूर्, भुवः, स्वः' व्याहृतयः भवन्ति, वाजसनेयीमतेनापि 'व्याहृतित्रयस्यैव श्रुतिर्विद्यते'। गोतममतेन च 'व्याहृतयः पञ्च सप्तान्ताः' इति श्रूयते। प्रयुञ्जीत = ब्रूयात्, च = पुनः, सावित्रीं = गायत्रीं (सावित्र + ङीप्, गायन्तं त्रायते = गायत् + त्रा + क + ङीप्); तथा च सा 'तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' (ऋक्० ३।६२।१०)। सावित्रीति संज्ञा सावित्रं = सूर्यं सम्बोधितत्वात् भवति। आनुपूर्व्येण = क्रमानुसारेण (भूर् भुवः स्वः इत्युच्चारणानन्तरमेवेति भावः), (प्रयुञ्जीत = उच्चारणं कुर्यात्)। ततः = तदनन्तरं (ओङ्कारस्य; व्याहृतित्रयसावित्रीपाठसम्पादनानन्तरं), वेदान् = पठनीयवेदविषयकान्, समारभेत् = सम्यग्रूपेण वेदाक्षराध्ययनस्य शुभारम्भं कुर्यात्।

समारभेदित्यत्र परस्मैपदत्वमार्षत्वादिति विद्वांसः कथयन्ति।

अत्रैतद् ध्यातव्यं यत्—प्रणवोच्चारणात् पूर्वं 'हरि' इत्येतस्योच्चारणमवश्यमेव विधेयमिति पारम्परिकोद्घोषो विद्यते। तथा चोक्तम्—'वेदे रामायणे चैव पुराणेषु च भारते। आदिमध्यावसानेषु हरिः सर्वत्र गीयते'॥ इत्येष प्रयोगः सार्वत्रिक इति। एतेन 'हरि' शब्दस्य व्यापकता सिद्ध्यति। अतः 'ओं' इत्यस्योच्चारणात् पूर्वं 'हरिः' इत्यस्योच्चारणमावश्यकमिति। अत एव वैदिकाः विद्वांसः 'हरिः ओम्' इत्येवोच्चारयन्ति।

निष्कर्षश्चात्र—प्रणवः (ओङ्कारः) यतो वेदाङ्गभूतस्तस्मात् 'हरिः' इति पूर्वमेवोच्चारणीयमिति।

उदाहरणञ्चात्र—'हरिः ॐ ३, भूर्भुवः स्वः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्' इति पठित्वैवान्यान् मन्त्रान् पठेदिति भावः।

हिन्दी—वेदाध्ययन अपने आप में एक जटिल प्रक्रिया है, सामान्य बातों

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri

के अतिरिक्त इसमें आचार्यों ने विशेष निर्देश दिये हैं। यहाँ योगीन्द्र याज्ञवल्क्य ने अत्यन्त सूक्ष्मता के साथ वेदार्थानुचिन्तन का क्रम प्रतिपादन किया है। उन्होंने कहा है कि उपनयन के पश्चात् द्विजत्व धारण करने पर बटु जब वेदाभ्यास के लिए गुरु के समीप जाय तो उस समय सबसे पहले गुरु का अभिवादन-प्रणामादि करने के पश्चात् प्रणव (ओंकार=ब्रह्मा, विष्णु, महेश का प्रतीक) का प्रयोग करे। तत्पश्चात् तीन व्याहृतियों (भूर्, भुवः, स्वः) का प्रयोग करे, तदनन्तर आनुपूर्वी से सावित्री (गायत्री) का ('तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्') पाठ करने के पश्चात्—विधिवत् वेद स्वाध्याय का अधिकारी होता है और वह गुरुमुख से ग्रहण कर वेदारम्भ करे।

यहाँ यह बात विशेष रूप से ध्यान देने योग्य है कि—प्रणव (ॐ) के उच्चारण के पूर्व शास्त्रसम्मत 'हरिः' इस पद का उच्चारण अवश्य करना चाहिए। क्योंकि कहा गया है कि वेद में, रामायण में, पुराणों में तथा महाभारत में पारायण के समय आदि, मध्य तथा अन्त में 'हरिः' शब्द अवश्य जोड़कर पाठ करना चाहिए। अतएव वैदिक विद्वान् 'हरिः ॐ' इतना उच्चारण के पश्चात् ही वेद का कोई मन्त्र उच्चरित करते हैं।

वेदाध्ययनस्य सामान्यविधिं प्रतिपाद्याधुना वर्णोच्चारणविधिं निर्दिशति—

कूर्मोऽङ्गानीव संहृत्य चेष्टां दृष्टिं दृढं मनः।
स्वस्थः प्रशान्तो निर्भीतो वर्णानुच्चारयेद् बुधः॥ २३॥

अन्वयः—कूर्मः अङ्गानि इव संहृत्य स्वस्थः निर्भीतः प्रशान्तः (सन्) बुधः चेष्टां दृष्टिं मनः दृढं (संहृत्य) (एभिः) वर्णान् उच्चारयेत्।

व्याख्या—वेदाध्ययनप्रारम्भकाले वर्णानामुच्चारणं केन विधिना कर्त्तव्यं किम्भूतेन वा इत्याह—कूर्मः=कमठः; 'कूर्मे कमठकच्छपौ' इत्यमरः। (१।१०।२१) अङ्गानि इव=हस्त-पाद-मुख-पुच्छादीनि, संहृत्य=संहरणं कृत्वा, अन्तः सङ्कोचनं विधायेत्यर्थः, स्वस्थः=स्वात्मनि स्थितः, स्वस्थचित्तः, निर्भीतः=भयरहितः, प्रशान्तः=प्रकर्षेण शान्तः, शान्तचित्तः, सन्—अर्थात् पूर्वोक्तलक्षणसम्पन्नः सन् वेदाध्यायी, बुधः=वैदिकपण्डितः=अध्ययनविधिज्ञः सन्, चेष्टाम्=इङ्गितम्; 'आकारस्त्विङ्ग इङ्गितम्' इत्यमरः। पूर्वंप्रतिपादिताध्ययनविरुद्धं शरीरविन्यासप्रकारं, दृष्टिं=दर्शनक्रियाम्, मनः=मानसं; 'चित्तं तु

CC-0. Nepal Sanskrit Academy. Digitized by Siddhanta eGangotri Gyaan Kosha Collection.

चेतो हृदयं स्वान्तं हृन्मानसं मनः' इत्यमरः। दृढं = दाढर्येन, संहृत्य = एकाग्रतां विधाय, एभिः = पूर्वोक्तप्रकारैः स्वस्थचित्तैः इत्यर्थः, वर्णान् = अक्षराणि (वेदस्य), उच्चारयेत् = समुचितरूपेणोच्चारयेत्।

हिन्दी — वेदाध्ययन के प्रारम्भ के समय में वर्णों का उच्चारण किस प्रकार करना चाहिए, कैसी मनःस्थिति हो—इस विषय में आचार्य कहते हैं—जिस प्रकार कछुआ अपने हाथ-पैर आदि अंगों को संकुचित कर लेता है, उसी प्रकार स्वस्थचित्त, भयरहित, शान्त-दान्त होकर वेदाभ्यासार्थी अपनी चेष्टा, दृष्टि और मन को दृढ़ता से एकाग्र बनाकर स्वस्थचित्त हो वेद के अक्षरों को उच्चरित करे।

अक्षरोच्चारणे ये दोषाः समापतन्ति तान् निषेधमुखेन प्रतिपादयत्याचार्यः—

नाऽभ्याहन्यान् न निर्हन्यान् न गायेन् नैव कम्पयेत्।

अन्वयः— न अभ्याहन्यात्, न निर्हन्यात्, न गायेत्, न एव कम्पयेत्।

व्याख्या — साम्प्रतं वेदाध्ययनकाले बहुधा ये दोषाः समापतन्ति तेषां निषेधमुखेन आचार्यः सतर्कां दृष्टिं प्रददाति शिष्याय—न = नहि, अभ्याहन्यात् = अभितः आहननं न भूयात्, अक्षराणां व्यत्ययेनोच्चारणं न कुर्यादित्यर्थः, न = नैव, निर्हन्यात् = निर् उपसर्गः, हननम् = व्याघातः, अर्थात् स्थान-प्रयत्नराहित्येन वर्णोच्चारणं, तथा न कर्त्तव्यमित्याशयः, न = नैव, गायेत् = गानं कुर्यात्, अत्रायमाशयो यत्—द्रुत-मध्य-विलम्बितादिस्वराणां विहितमात्रिकाणां ह्रस्व-दीर्घ-प्लुतादीनां गन्धर्वोपात्तस्वरूपेण स्वल्पाधिकमात्राभिः विशेषस्वरेणोच्चारणं न कर्त्तव्यं, निर्धारितस्वरेणैव कर्त्तव्यमिति। न = न चापि, कम्पयेत्=वेपयेत्; 'अथ वेपथुः कम्पः' इत्यमरः। टुवेपृ कम्पने। कम्पनं तावत् स्वस्थाने स्थितं वर्णमुच्चरन् तदनन्तरं किमप्यन्यत्र करणं सञ्चाल्य भूयोऽपि तत्रैवोच्चारणम् एतन्न कथयेत्। शुक्लयजुर्वेदे किंबाऽन्यत्रानेकान्युदाहरणानि सन्ति; तद्यथा—'ऋचं व्वाचम्' अत्रोच्चारणस्थानभिन्नता, 'सहस्रशीर्षा इत्यत्र दन्त्यसकारस्थाने तालव्यशकारोच्चारणमित्यादौ। इत्थमनेकत्रोहनीयमिति।

हिन्दी — वेदाध्ययन के समय में बहुधा अनेक दोष उपस्थित होते हैं, उनके निषेध के विषय में आचार्य का अभिमत है कि—वर्णों का (अक्षरों का) उच्चारण व्यत्यय (आगे-पीछे) से नहीं करना चाहिए और न स्थान-प्रयत्न

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized

से विरुद्ध ही उच्चारण करना चाहिए। एवमेव द्रुत-मध्य-विलम्बित स्वरों के मात्राओं से भिन्न विशेष स्वर में उच्चारण न करे तथा किसी वर्ण के उच्चारण के समय कम्पित होकर अन्य वर्ण के उच्चरित कर पुनः पूर्व वर्ण का ही उच्चारण नहीं करना चाहिए।

मन्त्राक्षराणि येन स्वरेणोच्चारितानि तथैव समापनीयानि—

यथाऽऽदावुच्चरेद्वर्णांस्तथैवैनान् समापयेत् ॥ २४ ॥

अन्वयः—आदौ यथा वर्णान् उच्चरेत् तथैव एनान् समापयेत्।

व्याख्या—आदौ = आद्यमन्त्रोच्चारणशुभप्रारम्भकाले, यथा=येन प्रकारेण, यया स्वरपद्धत्या वृत्त्या वा, येन स्वनेन च सवनेन वा; सवनञ्च यथोक्तं नारदी-शिक्षायाम्—'उरः कण्ठः शिरश्चैव स्थानानि त्रीणि वाङ्मये। सवनान्याहुरेतानि साम वाप्यर्थतोऽन्तरम् (१।७)।

अपि च पाणिनीयशिक्षायां यथा—'मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्। 'प्रातः सवनयोगं तं छन्दोगायत्रमाश्रितम्॥ कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम्। तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम्' ॥ ७–८ ॥

अन्यच्च तत्रैव—'प्रातः पठेन्नित्यमुरःस्थितेन स्वरेण शाद्दूलरुतोपमेन। मध्यन्दिने कण्ठगतेन चैव चक्राह्व-सङ्कूजित-सन्निभेन ॥ तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्। मयूरहंसाऽन्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन' ॥ इति। वर्णान् = अक्षराणि, उच्चरेत् = प्रारम्भे यथोच्चारणं कुर्यात्, तथैव = तेनैव प्रकारेण, तेन लयेनैव, एनान् = मन्त्रप्राप्तान्यक्षराणि, समापयेत् = पाठं विधायोपरमेत्। नान्यां वृत्तिं समाश्रयेत्।

हिन्दी—वेदाध्ययन के समय में वर्णों के उच्चारण में भी बड़ी सावधानी बरतनी चाहिए। प्रारम्भ में जिस प्रकार से अर्थात् जिस स्वरपद्धति से वर्णों को (अक्षरों को) उच्चरित किया गया है, उसी प्रवाह में उस मन्त्र को समाप्त करना चाहिए। इस निमित्त नारदी शिक्षा एवं पाणिनीय शिक्षा में 'सवन' प्रतिपादन के समय विशेष व्याख्या की गयी है।

वर्णोच्चारणसमये मुख-हस्तयोः सामञ्जस्यमावश्यकम्—

सममुच्चारयेद्वर्णान् हस्तेन च मुखेन च।
स्वरस्तैव तु हस्तश्च द्वावेतौ युगपत्स्थितौ ॥ २५ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

अन्वयः—वर्णान् हस्तेन मुखेन च समम् उच्चारयेत्, (यतः) स्वरः हस्तश्च एतौ द्वौ युगपत् स्थितौ (भवतः) (वैदिकर्षीणां मतमिदमिति शेषः)।

व्याख्या—वर्णान् = मन्त्रस्थितान्यक्षराणि, हस्तेन = करेण (भुजेन), मुखेन = आननेन, च = चापि, समं = तुल्यकालमेव, उच्चारयेत् = उच्चारणं कुर्यात् न तु पृथक्कालावच्छेदेन, यतः = यस्मात् कारणात्, स्वरः = मुखान्निर्गतोदात्तादिस्वरः, हस्तश्च = तत्प्रदर्शकः करश्च, एतौ = इमौ मुखकरौ करमुखौ वा, युगपत् = साकमेव, स्थितौ भवतः। अनुभवसिद्धमिदमृषीणाम्।

अत्रायमभिप्रायः—वेदाध्ययनकाले मन्त्रवर्णोच्चारणे मुखस्थितेन स्वरेण साकमेव हस्तसञ्चालनमपि कुर्यात्। यद्युच्चारणकाले हस्तसञ्चालनस्य वैयर्थ्यं स्यात्तदा न शोभनम्, अतः उच्चारणसमये द्वयोरपि एककालावच्छेदेन सामञ्जस्यमावश्यकमिति भावः।

हिन्दी—वेदारम्भ के समय अध्येता को अत्यन्त सावधानी रखनी चाहिए। जिस समय मुख से मंत्रों के अक्षर उच्चरित हों उस समय हाथ भी सावधान रहे और स्वरानुसार प्रक्रिया प्रारम्भ कर दें। इस विषय में अनुभव-प्राप्त मुहर्षियों ने कहा है कि—वर्णों (-अक्षरों) के उच्चारण में हाथसंचालन तथा मुखोच्चारण एक साथ हो। क्योंकि स्वर तथा हाथ ये दोनों एक साथ ही क्रियान्वित होने चाहिए।

कः वेदाध्ययनफलं न अश्नुते इत्याह—

हस्तभ्रष्टः स्वरभ्रष्टो न वेदफलमश्नुते।

अन्वयः—हस्तभ्रष्टः स्वरभ्रष्टः वेदफलं न अश्नुते।

व्याख्या—हस्तभ्रष्टः—हस्तात्=करात्, भ्रष्टः = पतितः, हस्तभ्रष्टः=मुखस्थिरस्वरसमूहात् करसञ्चालनेन वैपरीत्यात् भ्रंशितः एवम्भूतो वेदाध्ययनशीलः, अपि च स्वरभ्रष्टः = उदात्तानुदात्तस्वरितादीनां स्वराणां प्रदर्शनेकाले इतस्ततः गमनात् हस्तादन्यत्र आननोच्चारणात् विपरीतस्वरविशिष्टश्च, वेदफलं = धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थवेदाध्ययनफलं, न अश्नुते = नहि लभते। अतः वेदाध्ययनकर्ता सावधानतया हस्तसञ्चालनं स्वरविनियोगश्च कुर्यादिति। आभ्यां विना वेदफलावाप्तिर्दुर्लभैव।

हिन्दी—वेदाध्ययन करते समय वेदाध्ययनकर्ता वेदपाठी को सावधान होकर हस्तसंचालन करना चाहिए, जिससे स्वरों का उच्चारण अनुरूप हो।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थात् हस्तसंचालन तथा स्वरविनियोग में एकरूपता हो। अतएव कहा गया है कि हस्तभ्रष्ट तथा स्वरभ्रष्ट वेदाध्ययनकर्ता कभी भी धर्म, अर्थ, काम और मोक्षरूपी चतुर्विध पुरुषार्थरूपी फल को प्राप्त नहीं कर सकता। इसलिए वेदाध्येता को सतर्क होकर हस्तसंचालन तथा स्वरों का विनियोग करना चाहिए।

तत्र कीदृशाः पुरुषाः वर्णानां समुचितोच्चारणे असमर्था भवन्ति—

न करालो न लम्बोष्ठो नाऽव्यक्तो नाऽनुनासिकः ॥ २६ ॥
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति।

अन्वयः—करालः न, लम्बोष्ठः न, न अव्यक्तः, न च अनुनासिकः, गद्गदः न, बद्धजिह्वः च न (सम्यक्तया) वर्णान् वक्तुम् अर्हति।

व्याख्या—करालः = उन्नतदन्तः=दन्तुरः; 'करालो दन्तुरे तुङ्गः' इत्यमरः। न = नहि, वर्णान् = अक्षराणि, वक्तुम्=उच्चारयितुम्, अर्हति=समर्थो भवतीति निष्कर्षः। एवमेव सर्वत्रोपरिष्टाद् क्रियापदात् संयोजनीयः। तथा च लम्बोष्ठः—लम्बः = लम्बायमानः, ओष्ठः = अधरः, यस्य एवम्भूतः पुरुषः अर्थात् विकृतरदनच्छदः इत्यर्थः, न = नैव, अव्यक्तः—न व्यक्तः अव्यक्तः = अतीन्द्रियस्वरूपो मूर्खो वेति; तथा हि शब्दार्थचिन्तामणौ यथा—'हरौ, स्मरहरे, मूर्खे, सांख्योक्तमहदादौ च'। न = नहि, च = पुनः, अनुनासिके = नासिकारोगयुक्ते नासाविकृते, सति — एवंविधः पुरुषः, गद्गदः = वाग्विजृम्भितः, महाप्राणप्रभृतीनां कण्ठ्य-तालव्यादीनां स्थान-प्रयत्नोच्चार्यमाणानां वर्णानां, यथाविहितस्थान-प्रयत्नोच्चारणेऽसमर्थः पुरुषः यो हि दन्त्यादिना विपरीतोच्चारणं करोति भाषायां 'तोतला' इति कथयन्ति विज्ञाः। बद्धजिह्वः—बद्धा जिह्वा यस्य असौ बद्धजिह्वः = अन्तरा अन्तरा विरमितो भूत्वोच्चारयिता, स्खलितवाग्विशेषः, लोके 'हक्कला' इति संज्ञया प्रसिद्धः। इमे वराकाः कुत्सिताः नराः स्वरसंज्ञानपूर्वकं समुचितस्थाने वक्तुं न पारयन्ति। अत एवासमर्थाः भवन्ति।

हिन्दी—वेदाध्ययन में कैसे-कैसे लोग समुचित वर्णोच्चारण नहीं कर सकते हैं, इस विषय में आचार्य कहते हैं कि जिनका दाँत ऊँचा हो अर्थात् दन्तुर हो, जिनके लम्बे ओठ हों, जो अव्यक्त हो, अतीन्द्रियस्वरूप अथवा मूर्ख और जो नकियाता हो अर्थात् नासारोग से युक्त हो तथा जिसकी जीभ लड़खड़ाती हो ऐसे लोग वेद के मान्त्रिक वर्णों को समुचित रूप से उच्चारण नहीं कर सकते हैं। अतः उपर्युक्त इन दोषों से युक्त लोग वेदाध्यापन में अग्राह्य हैं।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

तदा कीदृशो नरः वर्णोच्चारणे समर्थः स्यादिति निर्देशः—

प्रकृतिर्यस्य कल्याणी दन्तोष्ठौ यस्य शोभनौ ॥ २७ ॥
प्रगल्भश्च विनीतश्च स वर्णान् वक्तुमर्हति ।

अन्वयः—प्रकृतिः यस्य कल्याणी, दन्तोष्ठौ यस्य शोभनौ (स्तः), च प्रगल्भः च विनीतः स वर्णान् वक्तुम् अर्हति ।

व्याख्या—प्रकृतिः = प्रतिस्वरूपम्, शरीराकृतिर्वा, यस्य = वेदाध्ययनकर्तुः शिष्यस्य, कल्याणी = कल्याणकारिका, सर्वाङ्गेन शोभना (अस्ति = विद्यते) । अत्रायमाशयो यत्–यस्य शिष्यस्य शरीररचनाक्रमः प्रभावोत्पादकः स्यादेवम्भूतः; सामुद्रिके शास्त्रे उक्तमस्ति यत्—'यत्राकृतिस्तत्र गुणाः वसन्ति' । शरीरसौष्ठवेनैव गुणानामाकलनं भवति । पक्षान्तरे—प्रकृतिः = शीलगुणोपेतः स्वभावः, शीलान्वितो वेदाध्येता उपदेशग्रहणे क्षमो भवति । यत्र शीलस्तत्र क्रोधाद्यभावः । यस्य = सच्छिष्यस्य, च = पुनः, दन्तोष्ठौ—दन्तश्च ओष्ठश्च दन्तोष्ठौ = दशनरदनच्छदौ, शोभनौ = सुसंहतौ, विकृतिरहितौ (स्तः), च = अपि च, यः = शिष्यः, प्रगल्भः = वावदूकः, अग्रे-अग्रे वक्ता शास्त्रग्राही च, च = एवञ्च, विनीतः = विनयान्वितः, निर्जितेन्द्रियः, सद्गुणविशिष्टः, शिष्यः = छात्रः, वर्णान् = अक्षराणि, वक्तुं = पठितुमुच्चारणं कर्त्तुम्, अर्हति = योग्योऽस्ति, समर्थं इति यावत् ।

हिन्दी—अब यह विचार किया जाता है कि किस प्रकार का मनुष्य (शिष्य) वर्णों के समुचित उच्चारण में समर्थ हो सकता है ? तो कहा जाता है कि—जिस अध्येता की प्रकृति (स्वभाव) कल्याणदायिका हो और जिसके दाँत एवं ओठ सुन्दर हों, साथ ही बोलने में वावदूक अग्रवादी हो एवं जो विनय से युक्त हो ('विद्या ददाति विनयम्') वही वर्णों का समुचित उच्चारण करने में समर्थ होता है ।

यथाविहितवर्णोच्चारणे के चतुर्दश दोषाः समापतन्तीत्याह—

शङ्कितं भीतमुद्घृष्टमव्यक्तमनुनासिकम् ॥ २८ ॥
काकस्वरं मूर्द्धिनगतं तथा स्थानविवर्जितम् ।
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् ॥ २९ ॥
व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश ।

CC-0. Nepal Research Academy, Kathmandu. Digitized by eGangotri

अन्वयः—शङ्कितं, भीतं, उद्घृष्टम्, अव्यक्तम्, अनुनासिकं, काकस्वरं, मूर्द्धिनगतं, तथा स्थानविवर्जितं, विस्वरं, विरसं च एव विश्लिष्टं, विषमाहतम्, व्याकुलं, तालहीनं च चतुर्दश पाठदोषाः (सम्भवन्तीति शेषः)।

व्याख्या—शङ्कितं=संशयापन्नं, अस्ति-नास्त्येताभ्यां सन्दिहानं किमयमोकारो वा उकार इति, भीतं=भयाक्रान्तं, उद्घृष्टम्=सम्यक्प्रकारेण दष्टम्, रोषावेशेन वर्धितमिव श्रुतम्, अव्यक्तं=स्फुटतया भाषणेऽसमर्थम्, अनुनासिकम्=निरनुनासिकवर्णमपि नासिकायामुच्चारितम्, काकस्वरम्=वायसोच्चारणवत् स्वरम्, कण्ठं सम्पीड्योच्चस्वरेणोच्चारितं, मूर्द्धिनगतम्=मस्तकस्थितमपूर्णमतिशयेन स्वरेणोच्चारितम्, तथा=एवमेव, स्थानविवर्जितम्=स्वस्थानभ्रष्टं, स्थानान्तरसम्पन्नवर्णसमुच्चारितम्, विस्वरम्=स्वररहितमुदात्तादिहीनञ्च, विरसं=माधुर्यादिरसत्रिरहितं रूक्षापन्नं वा, च=पुनः, विश्लिष्टं=विश्लेषितम्, प्रकर्षणं=सर्वतोभावेन सञ्चालनम्, विकीर्णं=वर्णान्तरे प्रसृतम्, विषमाहतं=वैपरीत्येन ह्रस्व-दीर्घादिप्रकटनम्, व्याकुलं=विशेषेणाकुलं वर्णस्वराणां वैषम्येणोच्चारणं, तालहीनं=स्वरादिसन्तुलनरहितं, चकारः समुच्चयबोधकः, अनेन प्रकारेण, चतुर्दश=चतुर्दशसंख्याकाः, पाठे=अध्ययने, दोषाः=विकाराः, अध्ययने प्रतिबन्धकाः परिगणिताः सन्ति। तान् विहायाध्ययने प्रवृत्ताः भवेयुरिति।

हिन्दी—वर्णों के समुचित उच्चारण में चौदह दोष होते हैं, जो कि पाणिनि, नारद आदि मुनियों के द्वारा भी समर्थित हैं। वे इस प्रकार हैं—

(१) वर्णों के समुचित उच्चारण में—सशंकित (शङ्कालु), (२) भयभीत=भयाक्रान्त, (३) उद्घृष्ट=रोष आदि से परिवर्धित, (४) स्फुट रूप से उच्चारण में रहित, (५) निरनुनासिक को अनुनासिक में उच्चारण करना, (६) कौए के स्वर में बोलना, (७) अपूर्ण शब्द उच्च स्वर में कहना, (८) स्थान छोड़कर—स्थानान्तर वर्ण का उच्चारण करना, (९) षड्जादि स्वर रहित उच्चारण, (१०) माधुर्यादि रसविहीन, (११) वर्णान्तर में फैला हुआ, (१२) विषम रूप से आहत—ह्रस्व का दीर्घ तथा दीर्घ का ह्रस्व उच्चारण, (१३) व्याकुल=वर्णस्वरों का विपरीत उच्चारण और (१४) तालहीन=विहित मात्रा के त्याग से विराम रहित। ये चौदह दोष वेदाध्ययन में बाधक हैं, अतः इनका त्याग करना चाहिए।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

संहिताध्ययनं मन्त्रसमुद्र इव दुस्तरम् —

संहितासारबहुलः पदसंज्ञासमाकुलः ॥ ३० ॥
क्रमसन्धिसमाकीर्णो दुस्तरो मन्त्रसागरः ।

अन्वयः — संहितासारबहुलः पदसंज्ञासमाकुलः क्रमसन्धिसमाकीर्णः मन्त्रसागरः दुस्तरः ।

व्याख्या — संहितासारबहुलः—ऋग्यजुःसामचर्चिता मन्त्रसंहिता, सैव सारः = वस्तुतत्त्वं रत्नम्, तेन बहुलः = प्रचुरतायुक्तः, अत्यधिकसंहितासमन्वितमन्त्रपाठस्वरूपः, पदसंज्ञासमाकुलः—सम्यक्तया ज्ञायन्ते आभिरिति संज्ञाः, पदान्येव संज्ञाः=पदार्थज्ञानसाधनोपयुक्तानि, ताभिः सम्यक् आकुलः=व्याप्तः, एवम्भूतः सः पदसंज्ञासमाकुलः इति । क्रमसन्धिसमाकीर्णः–सन्धीयन्ते=संयुज्यन्ते, पदानि यत्र स सन्धिः = द्वयोः त्रयाणां वर्णयोरेकत्रीकरणम्, क्रम एव सन्धिः, तेन समाकीर्णः = समाकुलः युक्तः, सः क्रमपाठेन युक्तः, अतएव मन्त्र एव सागरः = समुद्रः = मन्त्रमहोदधिरित्यर्थः, दुस्तरः = दुःखेन प्रयासेन तरितुं योग्यः । सागरपक्षे–सारो रत्नम्, संज्ञा = जलजन्तवो ग्राहादयः । सन्धिरत्र जलभ्रमिः इति बोध्यम् ।

हिन्दी — वर्णदोषों को कहने के पश्चात् अब त्रिपदसंहिता का अध्ययन दुःखपूर्वक तैरने योग्य समुद्रतरण के समान होता है, अतः मनोनियोगपूर्वक बारम्बार अभ्यास से पद-क्रम-सन्धिरूपी जहाजों से ही सुसम्पन्न हो सकता है । इसी स्थिति को रूपक द्वारा स्पष्ट किया गया है — ऋग्वेद, यजुर्वेद और सामवेद की जो संहिता है वही है सारतत्त्व रत्न, उसका जो बाहुल्य तथा पद ही जहाँ अर्थज्ञान के साधन, क्रम तथा सन्धि से संयुत है ऐसा जो मन्त्रों का समुद्र है उसे पार करना अत्यन्त कठिन है । उसे सावधानी से पार करना चाहिए ।

साम्प्रतं वेदाध्ययनस्य फलनिर्वचनं — सर्वपापविनिर्मुक्तिः —

ऋक्संहितां त्रिरभ्यस्य यजुषां वा समाहितः ॥ ३१ ॥
साम्नां वा सरहस्यां च सर्वपापैः प्रमुच्यते ।

अन्वयः — (मर्त्यः मानव इति पूर्वतोऽनुसृतः) समाहितः ऋक्संहितां वा यजुषां वा साम्नां सरहस्यां च त्रिः अभ्यस्य सर्वपापैः प्रमुच्यते ।

व्याख्या — साम्प्रतं वेदाध्ययनस्य किं महत्त्वं फलं वा विद्यते इत्येतद्

CC-0. Panini Kanya Maha Vidyalaya Collection.

सारांशेन प्रतिपादयन् आचार्यः उपदिशति—कस्यापि कार्यस्य सुचारुरूपेण सम्पादनाय एकाग्रताया आवश्यकता भवति, अतः वेदाध्ययनकाले—समाहितः= एकाग्रतां विधाय, ऋक्संहितां=ऋग्वेदस्य संहिताभागम्, वा=अथवा, यजुषाम् =यजुर्वेदमन्त्राणाम्, अथवा साम्नां=सामवेदसंहितां, सरहस्याम्=अभिप्राय-सहिताम्, अर्थज्ञानसमुपेताम्, अथवा सकल्पां; पारस्करगृह्यसूत्रे उक्तमस्ति—'कामं तु याज्ञिकस्य'। अतः यज्ञं वेदेति याज्ञिकः, तस्य कामं स्नानं भवति। सरहस्या-मित्यत्र रहस्यशब्दः उपनिषद्समर्थकः, एतेनेदमायातं यत् उपनिषद्प्रतिपादक-ब्राह्मणभागसहितामित्यर्थः। चकारप्रयोगात्—'वेदाथर्वपुराणानि सेतिहासानि शक्तितः' इत्येव ग्राह्यम्। संक्षेपेण वेदे सर्वाणि शास्त्राणि समाहितानि सन्ति। तानि वेद-वेदाङ्गानि, त्रिः=त्रिवारम्, पदक्रमपाठरूपेण, अभ्यस्य=वेदाभ्यासं कृत्वा, सर्वपापैः=सर्वविधैः पापैः, प्रमुच्यते=मुक्तो भवतीति। सर्वपापैरित्यने-नाज्ञानात् प्रमादाद्वा समुत्पन्नैः महापातकादिभिः इति निष्कर्षः। याज्ञवल्क्यस्मृतौ तथा चोक्तम्—

'वेदाभ्यासरतं क्षान्तं पञ्च यज्ञक्रियान्वितम्।
न स्पृशन्तीह पापानि महापातकजान्यपि'॥

अत्र टीकाकर्तुः विज्ञानेश्वरस्य कथनमस्ति यत्—'एतच्चाऽकामकारविषयम्'। अत्राहुः ऋषिवराः वशिष्ठप्रमुखाः—

'यद्यकार्यशतं साग्रं कृतं वेदश्च धार्यते।
सर्वं तत् तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम्'॥ इति।

अपि च—

'न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्।
अज्ञानाच्च प्रमादाच्च दह्यते कर्म नेतरत्'॥

इत्यलं पल्लवितेनेति दिक्।

हिन्दी—सम्पूर्ण ज्ञानराशि का भाण्डार वेद है, इसमें किसी को कोई विप्रतिपत्ति नहीं है। ऐसी स्थिति में वेद पढ़ने-पढ़ाने का फल प्राप्त होता है—सर्वपापविनिर्मुक्ति। अतः मानव (वेदाध्याता) यदि एकाग्रचित्त हो ऋग्वेद की संहिता अथवा यजुर्वेदसंहिता एवम् सामवेदसंहिता तथा आनुषंगिक रूप से अथर्ववेद का गूढ़ रहस्य अर्थात् गृह्यसूत्रोक्त अभिप्राय सहित एवं अर्थज्ञान से युक्त सकल्प अध्ययन करता है, तो वह सब पापों से रहित हो जाता है तथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निष्पाप होकर सर्वविध कल्याण को प्राप्त करता है। अतः मनुष्य को अपने-अपने प्राप्त अधिकार के अनुसार साङ्गवेद का अध्ययन करना चाहिए।

संहिता-पद-क्रमपाठानां विशिष्टं फलं किमित्याह—

संहिता नयते सूर्यं पदं च शशिनः पदम् ॥ ३२ ॥
क्रमश्च नयते सूक्ष्मं यत् तत् पदमनामयम्।

अन्वयः—संहिता सूर्यं नयते, पदं शशिनः पदं (नयते), च क्रमः यत् अनामयं तत् सूक्ष्मं पदं नयते।

व्याख्या—साम्प्रतं संहिता-पद-क्रमरीतिपाठेन कं कं फलं वेदाध्येता मानवः प्राप्नोति इत्यस्मिन् विषये आचार्यस्य कथनं विद्यते यत्—संहिता=ऋषिप्रोक्ता केवला यजुर्वेदादिसंहिता, तासां संहितानामध्ययनरतं मनुष्यं, सूर्यं=सूर्यलोकं, नयते=प्रापयति। पदं=पदपाठः, संहिताप्रोक्तमन्त्राणां विशेषपदपाठः, शशिनः =चन्द्रमसः, पदं=चन्द्रलोकमधिष्ठानं, चन्द्रलोकमिति यावत् (नयते=प्रापयति)। च=पुनः, क्रमः=क्रमपाठः, यो हि संहितायाः पूर्वोत्तरपदयोर्विहितसन्धिपाठः, अनामयं=विकाररहितं, सूक्ष्मम्=अनिर्वचनीयं यत् ब्रह्मस्वरूपं, पदं=स्थानं, स्वरूपं, नयते=प्रापयति। अत्रायमभिप्रायः—क्रमपाठेन सर्वपापक्षयो भवति, निष्पापत्वात् मानसशुद्धिविधानेन च मुक्तिर्भवति। अतः पूर्वं संहितापाठः, तदनन्तरं पदपाठः, ततश्च क्रमपाठः पठनीय इति।

हिन्दी—अब संहिता-पद-क्रम रीति से पाठ करने में वेदपाठी को क्या-क्या फल मिलता है, इस विषय में आचार्य का कथन है कि—ऋषिप्रोक्त यजुर्वेदादि संहिता के पाठ से सूर्यलोक की प्राप्ति होती है, पदानुक्रम के पाठ से चन्द्रलोक एवं क्रमपाठ अर्थात् पूर्व तथा उत्तर के मिश्रित सन्धिपाठ से विकार रहित अनिर्वचनीय ब्रह्मस्वरूप को पाठकर्ता प्राप्त करता है। इस प्रकार संहिता, पद तथा क्रम पाठ से दुर्लभ विभिन्न लोकों की प्राप्ति होती है।

संहितादीनां पाठेन त्रिवेणी-स्नानफलम्—

कालिन्दी संहिता ज्ञेया पदमुक्ता सरस्वती ॥ ३३ ॥
क्रमेणाऽऽवर्त्तिता गङ्गा शम्भोर्वाणी तु नान्यथा।

अन्वयः—संहिता कालिन्दी ज्ञेया, पदं सरस्वती उक्ता, क्रमेण गङ्गा आवर्त्तिता, शम्भोः वाणी तु अन्यथा न।

CC-0. Nepal Rashtriya Pustakalaya, Kathmandu Collection

व्याख्या—संहिता = ऋषिप्रोक्ता (आर्षी), कालिन्दी = सूर्यतनया यमुना; 'कालिन्दी सूर्यतनया यमुना यमस्वसा' इत्यमरः। ज्ञेया = बोध्या (विद्वद्भिरिति)। अर्थात् यथा यमुनायां स्नानेन जनाः पुण्यलाभं लभन्ते किं वा यमलोकं न गच्छन्ति तद्वत् फलं ते लभन्ते। पदम् = पदपाठात्मकं पाठः, सरस्वती = अन्तःसलिला सरस्वत्याख्या नदी, उक्ता = प्रतिपादिता, पदपाठेन सरस्वती नद्यवगाहनोत्पन्नं फलमश्नुत इति भावः। क्रमेण = क्रमपाठेन, गङ्गा=भागीरथी, तस्यामावर्त्तिता = मज्जनेन, स्नानेन—अपूर्वं स्वर्गादिफलं मुक्तिरूपं वा फलं पाठकाः वैदिकाः लभन्ते। शम्भोः = महेश्वरस्य, वाणी = वेदस्वरूपा वाक्, तु = पुनः, अन्यथा = एतद्विपरीता, न = नहि। अत्र निर्गलितार्थः—तीर्थराज-प्रयागवत् संहिता-पद-क्रमाणां सावधानतया पठनशीलस्य गङ्गादित्रिवेणीस्नान-तुल्यं फलं मुक्तिरूपं प्रददाति।

हिन्दी—संहिता, पद और क्रम के सुव्यवस्थित पाठ से गंगा-यमुना-सरस्वती त्रिवेणी स्नान के समान पुण्य एवं मुक्ति की प्राप्ति होती है। अतः संहिता को यमुनारूपा, पदपाठ को सरस्वतीरूपा एवं क्रमपाठ को गंगारूपा मानना चाहिए, यह जो ईश्वर की वाणी है वह कथमपि व्यर्थ नहीं है।

उपर्युक्तमाशयमुदाहरणमुखेन प्रतिपादयति—

यथा महाह्रदं प्राप्य क्षिप्तो लोष्टो विनश्यति ॥ ३४ ॥
एवं दुश्चरितं सर्वं वेदे त्रिवृति मज्जति।
आम्रपालाशबिल्वानामपामार्गशिरीषयोः ॥ ३५ ॥
वाग्यतः प्रातरुत्थाय भक्षयेद्दन्तधावनम्।

अन्वयः—यथा (केनापि) क्षिप्तः लोष्टः महाह्रदं प्राप्य विनश्यति, एवं सर्वं दुश्चरितं त्रिवृति वेदे मज्जति। (तदा कीदृशी दिनचर्या अपेक्षितेत्युच्यते—) प्रातः उत्थाय आम्र-पालाश-बिल्वानाम् अपामार्गशिरीषयोः दन्तधावनं वाग्यतः भक्षयेत्।

व्याख्या—यथा = येन प्रकारेण यद्वद्वा (केनापि जनेन), क्षिप्तः = प्रक्षेपणं कृतः, लोष्टः = मृत्तिकाखण्डरूपः, 'ढेला' इति भाषायां, महाह्रदं = महत् सरोवरः, महत्तडाग इति यावत्, प्राप्य = गमनं कृत्वा, प्रविश्य, विनश्यति = नाशं प्राप्नोति, विलीयत इत्यर्थः। अत्रायं निष्कर्षः—सरोवरस्य महनीयतया निक्षिप्तस्य मृत्तिकाखण्डस्य दर्शनमनुसन्धानमपि सम्प्रतिरस्तम्भवति द्वयोः

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

सादृश्यं संसूचितं न तु सर्वांशेन दृष्टान्तधर्मता, गर्हितं कर्मन्तु वेदरूपे समुद्रे निमज्जितं सत् निश्चयेन नाशं प्राप्नोतीति विज्ञेयम्। एवम् = अनेन प्रकारेण, सर्वम् = अखिलम्, सम्पूर्णम्, दुश्चरितम् = कुत्सितधर्मवृत्तिम्, त्रिवृति = संहिता-पद-क्रमसमन्वितेन स्वरूपेण पृथक् पृथक् त्रिवारं पुनः पुनः पठिते वेदे, मज्जति = निमज्जितो भवति, लीनं जायत इत्यर्थः।

अस्यां स्थितौ वेदपाठिनश्छात्रस्य कीदृशी दिनचर्या भवितव्येत्याह—

प्रातः = प्रातःकाले ब्राह्ममुहूर्त्तेऽनुदिते, उत्थाय = भगवत्स्मरणपूर्वकं निद्रां विहायोत्थितानन्तरम्, स्वात्महितचिन्तनपुरःसरं नित्यकृत्यं शौचादिकं विधाय। स्नानात् पूर्वम्। तथा चोक्तं भगवता मनुना मनुस्मृतौ—

'ब्राह्मे मुहूर्त्ते बुध्येत (उत्थाय) धर्मार्थौ चानुचिन्तयेत्।
कायक्लेशांश्च तन्मूलान् वेद तत्त्वार्थमेव च।
उत्थायाऽऽवश्यकं कृत्वा कृतशौचः समाहितः'॥

(मनु० ४।९२-९३)

आम्रश्च पालाशश्च बिल्वश्चेति तेषामाम्रपालाशबिल्वानां = रसालपालाश-बिल्वादीनाम्, एवञ्च, अपामार्गशिरीषयोः = अपामार्गश्च शिरीषश्च तयोर्द्वयो-रपि वा, एष्वाम्रादिषु काष्ठेष्वेकेन, दन्तधावनम्—दन्ताः = रदाः, धाव्यन्ते = परिमार्ज्यन्ते इति दन्तधावनम्=दन्तघर्षणम्, अत्र धाव धातुः शुद्धचर्थकः तस्मात् करणे ल्युडन्तम्। वाग्यतः = मौनो भूत्वा मौनाचरणं विधायेत्यर्थः, भक्षयेत् = विधिपूर्वकं चर्वणं कुर्यात्। अत्र विज्ञानेश्वरेण दन्तधावनविधिर्लिखिता यत्—'कण्टकक्षीरवृक्षोत्थं द्वादशाङ्गुलसम्मितम्। कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्च-कम्॥ दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा'॥ एतादृशं दन्तधावनं कुर्यात्।

हिन्दी—वेदपाठ से त्रिवेणी (गंगा-यमुना-सरस्वती नदी-संगम) स्नान का फल कैसे प्राप्त होता है, इसे उदाहरण देकर आचार्य समझाते हैं कि—जिस प्रकार एक बड़े जलाशय में फेंका गया मिट्टी का ढेला जल में डूबते ही नष्ट हो जाता है, उसी प्रकार समस्त पाप एवं दुष्कर्म संहिता-पद-क्रम के सुव्यवस्थित पाठ से नष्ट हो जाते हैं। पाठारम्भ के पूर्व भगवत्स्मरणपूर्वक शय्या का परित्याग कर शौचादि से निवृत्त हो आम्र, पालाश, बेल, अपामार्ग (चिरचिरी) एवं शिरीष में से किसी एक से विधिवत् मौन होकर दाँतों को साफ करे। क्योंकि दाँतों को दन्तधावन से साफ करने पर आयु, बल, यश, आजीविका, बुद्धि, प्रज्ञा और धन प्राप्त होते हैं।

CC-0. Nepal Sanskrit University. Kathmandu Collection.

खदिराविवृक्षाणां दन्ताधावने ग्राह्यतानिरूपणम् —

खदिरश्च कदम्बश्च करवीरकरञ्जकौ ॥ ३६ ॥
सर्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ।
तेनास्य करणे सौक्ष्म्यं माधुर्यं चैव जायते ॥ ३७ ॥

अन्वयः — खदिरः च, कदम्बः च, करवीर-करञ्जकौ, सर्वे कण्टकिनः पुण्याः च क्षीरिणः यशस्विनः (भवन्ति)। (तेनात्र प्रकृतावसरे किमायातमिति निर्दिष्टफलं यथा) तेन अस्य करणे सौक्ष्म्यं च माधुर्यम् एव जायते ।

व्याख्या — आम्रादिवृक्षाणां दन्तधावनातिरिक्तं केषां वृक्षाणां दन्तधावनार्थं ग्राह्यमित्याह—खदिरः = खैर इति भाषायां सुप्रसिद्धः, कत्थनिर्माणवृक्षः, च = पुनः, कदम्बः = कदम्बवृक्षः श्रीकृष्णसेवितः, च = भूयः, करवीर-करञ्जकौ = करवीरश्च करञ्जकश्च तौ (चार्थे द्वन्द्वः, करञ्ज एव करञ्जकः स्वार्थे कन्) = एतन्नामकौ वृक्षौ, सर्वे = ये वृक्षाः निषिद्धास्तदितराः खदिरादिव्यतिरिक्ताः, कण्टकिनः = कण्टकयुताः दुग्धस्राविणो वृक्षाः दन्तानां शुद्धिकरणे निर्विवादरूपेण ग्राह्याः (यतः = यस्मात् कारणात्), ते कण्टकिनः = कण्टकाः सन्ति येषु ते कण्टकिनो वृक्षाः, पुण्याः = पुण्यदायकाः, च = पुनः, क्षीरिणः = क्षीरं दुग्धमस्ति येषु वृक्षेषु ते, यशस्विनः = यशोदायकाः, भवन्तीति शेषः । अस्मिन् विषये निषेधानिषेधयोर्भूयसी चर्चा विद्यते । अतः दन्तधावनार्थं ये ग्राह्याः सन्ति तेष्वेकेन, तेन = दन्तधावनेन, अस्य = वेदाभ्यासनिरतस्य शिष्यस्य, करणे = कण्ठोच्चारणात्मके, वाच इन्द्रियोत्पादके वर्णोच्चारविधौ, सौक्ष्म्यं = सूक्ष्मभावापन्नं सारल्यं, च = पुनरपि, माधुर्यं = मधुरभावापन्नं प्रसादयुक्तं, जायते = समुत्पन्नो भवतीत्यर्थः ।

हिन्दी—अब प्रश्न यह उठता है कि क्या आम, पलाश, बेल और चिड़चिड़ी के अतिरिक्त अन्य वृक्ष भी दन्तधावन के लिए ग्राह्य हैं, अतः इनके अतिरिक्त अन्य वृक्षों की ओर भी आचार्य संकेत करते हैं । वे कहते हैं कि— खदिर (खैर—कत्था जिस वृक्ष से तैयार होता है), कदम्ब (जिस वृक्ष पर यमुना के किनारे भगवान् श्रीकृष्ण चढ़कर अपनी लीला करते थे) तथा करवीर (जिसका फूल लाल और सफेद होता है) एवम् करञ्जक (करजनी, करुऐनी) तो ग्राह्य हैं ही; उनके अतिरिक्त जो निषिद्ध नहीं है और खदिरादि के अतिरिक्त दूसरे जो काँटे वाले तथा दूध वाले वृक्ष हैं उनका भी दन्त-

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

धावन पुण्यदायक तथा यशदायक—कीर्तिविस्तारक होते हैं। अतः ब्रह्मचारी वेदपाठी शिष्य को शौचादि से निवृत्त होकर उनमें से किसी एक का दन्तधावन मुखशुद्धयर्थं करना चाहिए। उपर्युक्त दन्तधावन से शिष्य का करण में अर्थात् कण्ठ से उच्चारण होने वाले वर्ण (अकुहविसर्जनीयानां कण्ठः) तथा वाक् इन्द्रिय से उत्थित वर्णोच्चारण के साधन में सूक्ष्मता, स्वारस्य और माधुर्य निश्चित रूप से प्राप्त होता है। इसमें सन्देह का अवसर नहीं है।

मेधाशक्त्युत्पादनाय (शिष्यं) किं भक्षणीयम्—

त्रिफलां लवणाक्तां वै भक्षयेच्छिष्यकः सदा।
क्षीणमेधाजनन्येषा स्वरवर्णकरी तथा॥ ३८॥

अन्वयः—लवणाक्तां त्रिफलां वै शिष्यकः सदा भक्षयेत्, एषा क्षीणमेधाजननी तथा स्वरवर्णकरी (भवतीति शेषः)।

व्याख्या—लवणेन = सिन्धुदेशोद्भवेन सैन्धवेन लवणेन न तु सामुद्रजलनिर्मितेन लवणेन, आक्तां = युक्तां, सहितामित्यर्थः, त्रिफलां=हरीतकी-विभीतकाआमलकादीनां त्रयाणाम् अमृतानां समाहारः ताम् (त्रिफलाशब्दस्य स्त्रीलिङ्गे शक्तिरतस्तिसृणामिति भाव्यं, यत्तु केनाप्याचार्येण त्रयाणामि'ति लिखितं, तन्न रोचते; यतो हि–'त्रिफला कफपित्तघ्नी मेहकुष्ठहरा सरा। चक्षुष्या दीपनी रुच्या विषमज्वरनाशिनी'॥ इत्यादौ सर्वत्र आयुर्वेदे स्त्रीलिङ्गे शक्तिः, किन्त्वत्र समाहारे पुंस्त्वं भवेत्)। वै = निश्चयेन, सुनिश्चितेनैतत् कर्त्तव्यमिति भावः, शिष्यः—शासितुं योग्यः शिष्यः (शासु अनुशिष्टे) = वेदाध्ययनशीलश्छात्रः, सदा = सर्वदा, नित्यं सायं भोजनान्ते प्रातः दन्तधावनान्ते च, भक्षयेत् = भक्षणं कुर्यादश्नीयादिति। (यतः = यस्मात् कारणात्), एषा = समुचितमात्रया गृहीता सति, समपरिमाणा (तिसृणां त्रिफलादीनाम्) स्वस्वतृतीयांशमितसैन्धवलवणमिश्रिता शीतलोदकेन सह भक्षिता यदि स्यात्तदा, क्षीणमेधाजननी—क्षीणा = विलुप्ता, चासौ मेधा = बुद्धिः, तस्याः जननी = उत्पादिका, प्रसवित्री, इत्येव नहि, स्वरवर्णकरी = स्वरस्य प्राणसञ्जीवनस्य चाक्षरस्य तस्योत्पादकेन्द्रियबलस्य च, करी = कर्त्री (सा) जायत इति।

हिन्दी—स्वभावतः क्षीणबुद्धि शिष्य की मेधा शक्ति के उत्पादन के लिए उसे क्या खाना चाहिए, इस प्रसंग में आचार्य कहते हैं कि सैन्धव नमक से

CC-0. Bhagirathi Sanskrit Academy, Kathmandu Collection

युक्त त्रिफला (हरड़, बहेड़ा और आँवला) को शिष्य (वेदाध्येता) शीतल जल के साथ सदा भक्षण करे। यह अमृता त्रिफला नष्ट बुद्धि को समाप्त कर मेधा शक्ति को उत्पन्न करती है। इतना ही नहीं, यह स्वर तथा वर्ण का सुस्पष्ट उच्चारण कराने वाली है। त्रिफला का महनीय महत्त्व आयुर्वेदशास्त्र में वर्णित है, तदनुसार वह कफ और पित्त को एवं प्रमेह-कुष्ठादि बीमारियों को समूलतः नष्ट करती है। अतः शिष्य को सुस्वर एवं सुस्पष्ट उच्चारण के लिए इसका सेवन आवश्यक है।

हस्तसञ्चालनेन विना वेदाध्ययनं निषिद्धम्—

हस्तहीनं तु योऽधीते मन्त्रं वेदविदो विदुः।
न साधयेद्याजुषाणि भुक्तमव्यञ्जनं यथा॥ ३९॥

अन्वयः—यः मन्त्रं हस्तहीनम् अधीते, (तस्य) तु याजुषाणि यथा अव्यञ्जनं भुक्तं न साधयेत्, इति वेदविदः विदुः।

व्याख्या—यः=वेदाध्येता पुरुषः, मन्त्रम्=वैदिकं मन्त्रं, हस्तहीनं—हस्तेन=हस्तसञ्चालनेन विना, हस्तस्वरप्रदर्शनेन विनेत्यर्थः, अधीते=अध्ययनं करोति, तस्य=पुरुषस्य पठितो वेदः, तु=पुनः, याजुषाणि=वेदानुष्ठानानि, अत्र यजुः पदं वेदोपलक्षकम्। यथा=येन प्रकारेण, अव्यञ्जनं—न विद्यते व्यञ्जनम्=दधिजीरकादिमिश्रितसंस्करणम्, यत्र तद् अव्यञ्जनम्, भुक्तम्=भोजनं कृतमन्नादिकम्, रसादिपरिपाकरूपं फलं न प्राप्नोति तथैव हस्तसञ्चालनेन विना वेदपाठोऽपि सिद्धिं न प्रददाति।

हिन्दी—वेदाध्ययन में उदात्तानुदात्तस्वरितादिबोधक हस्तसंचालन का बड़ा ही महत्त्व है, इसके बिना वेदपाठ सार्थक नहीं होता। इस विषय में वैदिक विद्वानों ने कहा है कि—जो वैदिक मन्त्र को हस्तसंचालन के बिना पढ़ता है, उसके वेद सम्बन्धी मन्त्र जिस प्रकार बिना लवण, जीरा, मशाला आदि से रहित व्यञ्जन स्वादिष्ट नहीं होता उसी प्रकार हस्तसंचालन के बिना वेद-पाठ सार्थक नहीं होता है।

हस्तहीनवेदपाठेन अवैदिकत्वं सिद्ध्यति—

ऋचो यजूँषि सामानि हस्तहीनानि यः पठेत्।
अनृचो ब्राह्मणस्तावद् यावत्स्वारं न विन्दति॥ ४०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—यः ऋचः, यजूंषि, सामानि हस्तहीनानि पठेत् (सः) तावत् अनृचः ब्राह्मणः, यावत् स्वारं न विन्दति ।

व्याख्या—यः = विप्रः, द्विजः, ऋच इति बहुवचनान्तं पदम्, ऋग्वेदोपलक्षकम्, यजूंषि = यजुर्वेदमन्त्राणि, सामानि = सामगायनानि, हस्तहीनानि = हस्तसञ्चालनहीनानि, बिना हस्तप्रदर्शनेन हीनानि, पठेत् = अध्ययनं कुर्यात्, सः = एवम्भूतः पुरुषः, तावत् = तावत्कालपर्यन्तम्, अनृचः = ऋग्रहितः अत एव अवैदिकः अयमिति, ब्राह्मणः = द्विजन्मा विप्रः, इति विशेषणैर्भूष्यते मानवैरिति । इयमवस्था तावदेव यावत् = यावत्कालपर्यन्तं, स्वारं = स्वरसम्बन्धी हस्तसञ्चालनम्, स्वरस्थानं, न = नहि, विन्दति = अधिग्रहणं करोति ।

अत्रायमाशयः—वेदाध्ययने स्वर-व्यक्त्यर्थं हस्तसञ्चालनस्य महत्त्वं सर्वाधिकं वर्त्तते । अतो यदि ऋग्वेदस्य ऋचः, यजुर्वेदोक्ताः मन्त्राः, सामवेदस्य गायनानि हस्तहीनानि यश्छात्रः पठेत् सोऽवैदिक इति जनैः घोष्यते तथा च महदपवादं प्राप्नोति । सैषा स्थितिस्तावदेव तिष्ठति यावत् हस्तसञ्चालनपूर्वकं वेदाध्ययनं करोति । अतो वेदपाठे हस्तसञ्चालनमावश्यकमिति ।

हिन्दी—वेदाध्ययन में वेदपाठी का मुख्य ध्यान हस्तसंचालन पर होना चाहिए । उसके बिना स्वरों का यथावत् प्रतिपादन नहीं होता है, अतः जो वेदपाठी द्विज ऋग्वेद की ऋचाओं को, यजुर्वेद के मन्त्रों को और सामवेद के गायनों को स्वरसंस्थापनार्थं हस्तसंचालन क्रिया नहीं करता है, वह तब तक 'अवैदिक'त्व का निन्दित पात्र रहता है जब तक वह भलीभाँति हस्तसंचालनपूर्वक वेदपाठ नहीं करता । अतः वेदपाठ में हस्तसंचालन की क्रिया मुख्य है ।

हस्तहीनपठनस्यादृष्टं फलं किं भवति—

हस्तहीनं तु योऽधीते स्वर-वर्णविवर्जितम् ।
ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति ॥ ४१ ॥

अन्वयः—तु यः स्वर-वर्णविवर्जितं हस्तहीनं च अधीते, सः ऋग्यजुःसामभिः दग्धः वियोनिम् अधिगच्छति ।

व्याख्या—तु = पुनश्च, यः = मनुष्यः, स्वरवर्णविवर्जितम् = स्वरैर्वर्णैश्च विवर्जितस्तम् उदात्तादिस्वरअक्षररहितं, हस्तहीनं = हस्तसञ्चालनविरहितं, च = पुनः, अधीते = अध्ययनं करोति, सः = एवम्भूतः पुरुषः, ऋग्यजुःसामभिः = ऋग्वेदयजुर्वेद-सामवेदादिभिः, दग्धः = दाहं प्राप्तः, वियोनिं = निम्नलोकं निरयं

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

(नरकं), अधिगच्छति = लभते । अतः केनापि पुरुषेण हस्तसञ्चालनहीनः पाठः न कर्त्तव्यः ।

हिन्दी—हस्तसंचालन के बिना वेदपाठ करने का दृष्टफल केवल वह 'अवैदिक पुरुष' है, इतना ही कहा जाता है, किन्तु अदृष्ट फल तो उसे घोर नरक में गिरा देता है । इसी भाव को लेकर आचार्य कहते हैं कि जो पुरुष स्वर (उदात्तादि) तथा वर्ण (अक्षर) से रहित हस्तसंचालन के बिना वेदाध्ययन करता है वह ऋग्वेद, यजुर्वेद और सामवेद के गर्हित पाठजन्य पाप से दग्ध होकर घोर नरक में जाता है अर्थात् नरक को प्राप्त करता है ।

वेदाध्ययने दृष्टादृष्टफलकमर्थज्ञानमपेक्षितम्—

ज्ञातव्यश्च तथैवार्थो वेदानां कर्मसिद्धये ।
पठन् मात्रापपाठात्तु पङ्के गौरिव सीदति ॥ ४२ ॥

अन्वयः—तथैव कर्मसिद्धये वेदानाम् अर्थः ज्ञातव्यः, यतः मात्रा अपपाठात् तु पङ्के गौः इव पठन् सीदति ।

व्याख्या—येन प्रकारेण दृष्टादृष्टफलोत्पत्त्यर्थं हस्तेन प्रदर्शनाय स्वर-वर्णयोर्ज्ञानमावश्यकम् । तथैव = तेनैव प्रकारेण, कर्मसिद्धये—कर्मणः=कार्यस्य, सिद्धिः = प्रयोजननिष्पत्तिस्तस्यै, दृष्टादृष्टफलयुक्तं कर्म प्रसाधयितुं, वेदानाम्=ऋग्वेद-यजुर्वेद-सामवेदानाम्, अर्थः = वर्णार्थः, प्रयोजनञ्च, ज्ञातव्यः = जानीयात्, यथा दृष्टादृष्टफलोत्पत्तये हस्तप्रदर्शनमावश्यकं भवति तद्वत् कर्मणः सिद्धये वेदार्थज्ञानमावश्यकम् । यतः = यस्मात् कारणात् अर्थज्ञानं विना मात्रादिज्ञानं न भवति, मात्रायाश्च—अपपाठात् एकस्या अपि मात्रायाः अशुद्धपाठात्, तु = पुनः, (यथा = येन प्रकारेण) पङ्के = कर्दमे (कीचडयुक्ते), गौः = धेनुः, सीदति = क्लेशं प्राप्नोति, (तथा = तेनैव प्रकारेण) पठन् = अध्ययनं कुर्वन् वेदपाठकः क्लेशं प्राप्नोतीत्यर्थः ।

हिन्दी—वेदाध्ययन में दृष्ट और अदृष्ट फल के लिए अर्थज्ञान भी अपेक्षित होता है, इस विषय को स्पष्ट करते हुए आचार्य कहते हैं कि—जिस प्रकार दृष्ट और अदृष्ट फल के लिए वेदपाठ में हस्तसंचालन अत्यावश्यक होता है, उसी प्रकार कर्मसिद्धि के लिए वेदों (ऋग्वेद-यजुर्वेद-सामवेद) का अर्थ जानना परमावश्यक है । क्योंकि अर्थज्ञान के बिना मात्रा आदि का ज्ञान नहीं होता है, अतः मात्रा के अशुद्ध पाठ से जिस प्रकार गौ कीचड़ में फँसकर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

कष्ट को प्राप्त करती है उसी प्रकार वेदाध्येता भी क्लेश को प्राप्त करता है। इसलिए अर्थज्ञान के साथ वेद का पाठ करना आवश्यक है, तभी कर्मफल की सिद्धि प्राप्त होगी।

अपपाठदूरीकरणाय शिष्यायोपदेशः—

आगमं कुरु यत्नेन कारणं हि तदात्मकम्।
आस्येन च शयं कुर्यात् पठन् नान्यमतिर्भवेत्॥ ४३॥
न चाऽस्य मुष्टिबन्धी स्यान्न चाऽत्युत्तममाचरेत्।

अन्वयः—हि कारणं तदात्मकम् (अतः) आगमं यत्नेन कुरु। पठन् (अध्येता) आस्येन शयं कुर्यात्, अन्यमतिः न भवेत्, च अस्य मुष्टिबन्धी न स्यात्, च अत्युत्तमं न आचरेत्।

व्याख्या—वेदपाठसमये अपपाठो न भवेदेतदर्थं शिष्यायोपदिशत्याचार्यः—हि=यस्मात् कारणात्, कारणं=फलप्राप्तेः कारणभूतं यत् मात्रादिज्ञानं तत्, तदात्मकम्=तस्य अर्थज्ञानस्य आत्मभूतम्, (अतः=अस्मात् कारणात्), आगमम्=अर्थसाधकं वेदाङ्गषट्कम्; वेदाङ्गानि च—'शिक्षा कल्पोऽथ व्याकरणं निरुक्तं ज्योतिषन्तथा। छन्दःशास्त्रमि'ति। यत्नेन=प्रयत्नेन, आवश्यकमिति मत्वा सावधानतया, कुरु=तज्ज्ञाने सतर्को भवेति अध्येतारं शिष्यं प्रत्युपदेश आचार्यस्य।

इत्थमुच्चाद्यक्षरोच्चारणे हस्तस्य मुखस्य च द्वयोः समानरूपेण स्थायित्व-निर्दिष्टम्, अतः परं तत्र ये आकृतिदोषा भवन्ति तानपि हेयत्वेन परित्यागायो-पदिशत्याचार्यः। किं पुनः पठन्=अध्ययनं कुर्वन् वेदाध्येता, आस्येन=मुख-स्थितेनाक्षरेण सह, शयम्=करं, कुर्यात्=विदधीत, अन्यमतिः=भिन्नबुद्धिः, न भवेत्=नहि भूयात्। सावधानतया हस्तसन्निवेशं कुर्यादिति। च=पुनः, अस्य=करस्य, मुष्टिबन्धी=मुष्टिबन्धनं, न स्यात्=नहि कुर्यात्, अनेन प्रकारेणास्य, अत्युत्तमत्वम्=स्फुटरूपं मुक्तहस्तं, न आचरेत्=नाचरणं कुर्यात्। अत्रायमभिप्रायः—हस्तसञ्चालनकाले हस्तस्य मुष्टिकाकृतित्वं स्फोटनं वा न समाचरणीयमिति।

हिन्दी—वेद का अपपाठ नहीं होना चाहिए, अपपाठ का तात्पर्य है—अशुद्ध पाठ से। यह बहुधा वर्णों के उच्चारण तथा स्वरों के विनियोग एवं गलत हस्तसंचालन से होता है। इन दोषों को दूर करने के लिए आचार्य शिष्य

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection.

को उपदेश देते हैं कि—फलप्राप्ति का कारण मात्रा आदि का ज्ञान होता है और उसका आत्मस्वरूप अर्थज्ञान है। जब तक पाठक को उस शब्द का पदार्थ-ज्ञान नहीं होगा तब तक वास्तविक फल का मिलना असंभव है। अतः अर्थज्ञान के लिए उसे वेदांग का अध्ययन करना चाहिए। वेदांग में—शिक्षा, कल्प, व्याकरण, निरुक्त, ज्योतिष और छन्द होते हैं।

इसके साथ ही हस्त-धारण में जो आकृतिदोष उत्पन्न होते हैं, उनके प्रति सतर्क करते हुए महर्षि योगिवर याज्ञवल्क्यजी कहते हैं कि—वेद के अध्येता को पाठ करते समय मुख में स्थित वर्ण के साथ हाथ को तदनुसार (उच्चारण के समय) रखना चाहिए, दूसरी ओर अपनी बुद्धि को नहीं लगाना चाहिए अर्थात् तन्मय हो जाना चाहिए। साथ ही उस समय हाथ की मुट्ठी नहीं बाँधनी चाहिए और न मुक्तहस्त भी होना चाहिए। कहने का आशय यह है कि हस्तसंचालन के समय हाथ का मुष्टिकाकृति अथवा स्फुटत्व नहीं करना चाहिए।

सप्त हस्तदोषाः के, दोषरहितपाठेन कस्य लोकस्यावाप्तिः—

चुलुर्नौका स्फुटो दण्डी स्वस्तिको मुष्टिकाकृतिः ॥ ४४ ॥
एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः।
स्वर-वर्णान् प्रयुञ्जानो हस्तेनाऽधीतमाचरन् ॥ ४५ ॥
ऋग्यजुःसामभिः पूतो ब्रह्मलोकमवाप्नुयात्।

अन्वय—चुलुः, नौका, स्फुटः, दण्डी, स्वस्तिकः, मुष्टिकाकृतिः सप्तमश्च परशुः एते वै हस्तदोषाः स्युः।

ऋग्यजुःसामभिः पूतः ब्रह्मलोकम् अवाप्नुयात्। स्वरवर्णान् प्रयुञ्जानः हस्तेन अधीतम् आचरन्।

व्याख्या—वेदाध्ययने हस्तसञ्चालनस्य प्रामुख्यमस्ति, तेनैव स्वराणां वर्णानाञ्च यथार्थज्ञानं भवति, अतः हस्तदोषान् परित्यज्य वेदपाठो विधेयः। के ते हस्तदोषा इति जिज्ञासायामाह—चुलुर्नौकेति। चुलुः, नौका, स्फुटः, दण्डी, स्वस्तिकः, मुष्टिकाकृतिः परशुश्चैते सप्तदोषाः परिगणिताः सन्ति। चुलुः = चुलुकः, द्वयोः हस्तयोः सम्मेलनाचारः, चुलुकाद्याकारप्रकाराः षट्, एवञ्च परशुः = खड्गविशेषस्तदाकारः सप्तमः, परशुः = 'फरसा' इति भाषायां सुप्रसिद्धः, चकारः समुच्चयबोधकः। एते = सप्तसंख्यका हस्ताद्याकाराः, वै =

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

अवश्यमेव, सुनिश्चितेन, हस्तदोषाः = हस्तजन्यदोषाः, स्युः = भवेयुः । एतेनेदमायातं यत्—उक्ताः सप्तदोषाः पाठकाले परिवर्जनीयाः ।

इत्थं हस्तदोषादिकं परित्यज्य वेदपाठेन किं फलं लभते इत्याह—ऋग्यजुःसामभिः = ऋग्वेद-यजुर्वेद-सामवेदादिभिः, पूतः = पवित्रीकृतः, ब्रह्मलोकं—ब्रह्मणः लोकस्तं = परब्रह्मणः पदम्, अवाप्नुयात् = प्राप्नुयात्, दोषरहितवेदपाठेन ब्रह्मलोकस्य प्राप्तिर्भवतीत्यर्थः । वेदपाठं कथमध्येतव्यमिति प्रश्नावसरे आह—स्वरवर्णान् = स्वरश्च वर्णश्च स्वरवर्णौ, तान्, प्रयुञ्जानः = प्रयोगं कुर्वन्, हस्तेन = करेण, प्रदर्शनं कृत्वा, अधीतम् = अधिगतं प्राप्तम्, आचरन् = क्रियायां व्यवहरन्, पठन्निति यावत् ।

हिन्दी—वेदाध्ययन में समुचित रीति से हस्तसंचालन की प्रमुखता रहती है, उसी से स्वरों तथा वर्णों का यथार्थ ज्ञान होता है। अतः हस्तदोषों को छोड़कर वेदपाठ करना चाहिए। वे हस्तदोष कौन-कौन तथा कितने हैं, इस विषय में आचार्य कहते हैं कि—(१) चुलु = चुल्लू, (२) नौका = नाव, (३) स्फुट, (४) दण्डी = दण्डाकार, (५) स्वस्तिक = स्वस्तिकाकार, (६) मुष्टिकाकृति = मुट्ठी की आकृति और (७) परशु = फरसाकार ये सात दोष उपस्थित होते हैं। इन्हें दूर करना चाहिए। इन सात दोषों को छोड़कर विहित विधि से ऋग्वेद, यजुर्वेद और सामवेद का पाठ करने से पवित्रान्तःकरण होकर, हस्तप्रदर्शनपूर्वक स्वर एवं वर्णों का समुचित प्रयोग करनेवाला वेदपाठी विप्र ब्रह्मलोक को प्राप्त करता है। अतः दोषों का परित्याग कर विधानपूर्वक वेदपाठ करना चाहिए।

वर्णोच्चारणविधिं निर्दिश्य पदोच्चारणविधिमाह—

न कुर्वीत पदं दीर्घं न चाऽत्यन्तविलम्बितम् ॥ ४६ ॥
पदस्य ग्रहमोक्षौ च यथा शीघ्रगतिर्हयः ।
यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् ॥ ४७ ॥
यत्र यत्र स्थिता वाणी पाणिस्तत्रैव तिष्ठति ।

अन्वयः—पदस्य ग्रहमोक्षौ यथा शीघ्रगतिः हयः (करोति तथा) (वैदिकोऽपि पदस्य ग्रहणसमये) पदं दीर्घं न कुर्वीत, अत्यन्तविलम्बितं च न कुर्यात् ।

यत्र यत्र वाणी स्थिता तत्रैव पाणिः तिष्ठति, यथा वाणी तथा पाणी, रिक्तं तु परिवर्जयेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—पूर्वोक्तपद्येषु वर्णोच्चारविधेर्नियमनमभूत् साम्प्रतं पदोच्चारण-विषये उपदिशत्याचार्यः—पदस्य ('सुप्तिङन्तं पदम्'—मन्त्रपदस्य), ग्रहमोक्षौ—ग्रहश्च मोक्षश्च तौ ग्रहमोक्षौ = निग्रहः मुक्तिश्च, यथा = येन प्रकारेण, शीघ्रगतिः—शीघ्रा गतिर्यस्य सः=त्वरितगतिः, हयः = घोटकः, करोति = विदधाति, तथा = तेनैव प्रकारेण, वेदपाठकः वैदिकः अपि पदस्य ग्रहणकाले = उच्चारणसमये इति यावत्, पदम्, दीर्घं = दीर्घस्वरयुक्तं, न = नहि, कुर्वीत = कर्त्तव्यमित्यर्थः; किञ्च त्वरितमेव ग्रहणं कुर्यात्, उच्चारणं कुर्यादिति । एवम् = अनेन प्रकारेण, पदस्य मोक्षकाले (अर्थात् अपरं पदमुच्चारयितुमुच्चरितस्य त्यागकाले पदम्), अत्यन्तविलम्बितम् = अतिशयेन विलम्बश्च, न कुर्यात् = न करणीय-मिति, किन्तु त्वरितमेवापरं पदमुच्चारयेत् । अत्रायमाशयो यत् मन्त्रे एकस्य पदस्योच्चारणानन्तरं विना विलम्बेन द्वितीयमग्रिमं पदमुच्चारयेदिति ।

एवं पदस्य ग्रहे मोक्षे च हस्तमुखयोरेकदैवोच्चारणीयम् । तथा च—यत्र यत्र = यस्मिन् स्थाने इति यत्र वीप्सायां द्विरुक्तिः, दृढतासूचनार्थमिदम्, वाणी = वाग्, स्थिता स्यात्, तत्रैव = तस्मिन् स्थाने एव, पाणिः = करस्तिष्ठति, इति नियमानुसारेण, यथा = येन प्रकारेण, वाणी पदस्य ग्रहणं मोक्षञ्च कुर्यात् तद्वत् हस्तमपि कुर्यात्, वाचा सहैव हस्तसञ्चालनमपि कुर्यात्, रिक्तं = शून्य-हस्तस्थानं, तु = निश्चयेन, परिवर्जयेत् = परित्यागो विधेयः ।

हिन्दी—उपर्युक्त पद्यों में वर्णोच्चारण निरूपण-विधि के पश्चात् अब आचार्य पदोच्चारण की विधि को कहते हैं—पद का ग्रहण (उच्चारण) तथा मोक्ष (विराम) जिस प्रकार घोड़ा करता है, वेदाध्येता वैदिक को भी पद के ग्रहण के समय अर्थात् उच्चारण के समय में पद को दीर्घ नहीं करना चाहिए, किन्तु शीघ्र ही उच्चारण करे । इसी प्रकार पद के मोक्ष के समय अर्थात् दूसरे पद के उच्चारण के लिए उच्चरित के त्याग के समय में अत्यन्त विलम्ब नहीं करना चाहिए अपितु शीघ्र ही छोड़ना चाहिए । कहने का आशय यह है कि एक पद का उच्चारण होने पर अविलम्ब दूसरे पद का उच्चारण करना चाहिए ।

अब आचार्य यह उपदेश देते हैं कि—हस्तप्रदर्शन भी पद के ग्रहण और मोक्ष में हाथ और मुँह की एक साथ प्रतिक्रिया होनी चाहिए । जहाँ-जहाँ वाणी स्थित है वहीं हाथ रहता है, इस नियम से वाणी पद का ग्रहण और

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मोक्ष करता है उसी प्रकार हाथ भी करे; वाणी के साथ ही हाथ को चलाना चाहिए, सूने हाथ को तो छोड़ देना चाहिए।

दृष्टान्तमुखेन मुखहस्तयोः साम्यप्रतिपादनम्—

यथा धनुष्याऽऽविततते शरे क्षिप्ते पुनर्गुणः ॥ ४८ ॥
स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः।

अन्वयः—यथा धनुषि आविततते शरे क्षिप्ते सति पुनः गुणः स्वस्थानं प्रतिपद्येत तद्वत् हस्तगतः स्वरः अपि।

व्याख्या—साम्प्रतं दृष्टान्तमुखेन मुख-हस्तयोः समस्थानीयत्वमाचार्याः प्रतिपादयन्ति, तद्यथा—यथा=येन प्रकारेण, धनुषि=कार्मुके, कोदण्डे, आविततते=आसमन्तात् प्रसारिते विस्तारिते वा, शरे=सायके, च, क्षिप्ते=प्रक्षिप्ते सति, पुनः=भूयः, गुणः=प्रत्यञ्चा, धनुषि प्रसारितचर्मरज्जुः, स्वस्थानं=स्वस्य स्थानमिति, प्रतिपद्येत=प्राप्नुयात्। अत्रायमाशयः—बाण-प्रक्षेपणाय मध्यस्थानात् समाकृष्टा यथा चर्मरज्जुः येन प्रकारेण समरूपा भवेदिति। तद्वत्=तेनैव प्रकारेण, हस्तगतः=भुजेन दर्शनीयः, स्वरः अपि =स्वरसङ्घातोऽपि। पदस्योच्चारणसमये शीघ्रतया प्रदर्शनं कुर्यात्।

अत्रायं निष्कर्षः—अनेन प्रकारेणान्यपदोच्चारणसमये प्रागुच्चरितपद-मुक्तिकालिककरप्रदर्शनीयं स्वरविनियोगोऽपि कर्त्तव्यः।

हिन्दी—अब दृष्टान्त के द्वारा स्वर और हस्तसंचालन की प्रक्रिया समान रूप से होनी चाहिए, इस बात को समझाते हुए कहते हैं कि—जिस प्रकार धनुष में प्रत्यञ्चा फैलाकर बाण प्रक्षेप करने पर प्रत्यञ्चा फिर अपने स्थान पर पहुँच जाता है, उसी प्रकार हस्तसंचालनगत स्वर भी यथास्थान हो जाता है। अर्थात् पदोच्चारण काल में शीघ्रता से प्रदर्शन करना चाहिए। इस प्रकार अन्य पद के उच्चारण के समय पूर्व में उच्चारित पद मुक्तिकालीन हस्त-दर्शनीय स्वरप्रदेश का भी प्रदर्शन करना चाहिए। अर्थात् शीघ्र ही अन्य पदगत स्वर-प्रदर्शन के लिए हाथ का संचालन करना चाहिए।

कां वृत्तिं कदा प्रयोक्तव्या—

अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम् ॥ ४९ ॥
शिष्याणामुपदेशार्थे कुर्याद् वृत्तिं विलम्बिताम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—अभ्यासार्थे द्रुतां वृत्तिम्, प्रयोगार्थे तु मध्यमाम् (वृत्ति), शिष्याणाम् उपदेशार्थे विलम्बितां वृत्ति कुर्यात् ।

व्याख्या—विदन्ति वैदिकाः विद्वांसो यत् अत्रैव शिक्षायां 'यथादावुच्चरेद्वर्णान्' इति कारिकायां प्रकारान्तरेण तिसृणां वृत्तीनां चर्चा विद्यते । कां वृत्ति कदा प्रयोक्तव्या इत्येवात्र विचारः । तथा हि अभ्यासार्थे=अभ्यासस्य=पुनः पुनः उच्चैर्घोषणया पठनस्य, अर्थे=प्रयोजने, (भाषायां गुण्डिकेति कथयन्ति) द्रुतां=शीघ्रगामिनीमर्धमात्रिकां वृत्तिम्, यां 'दूने'ति नाम्ना सङ्गीतगायकाः कथयन्ति, तत्स्वरूपाम् । अस्मिन् विषये रत्नावल्यामुक्तं यत्—'अर्धमात्रं द्रुतं ज्ञेयं द्रुतार्धं चाप्यनु द्रुतम्' इति । प्रयोगार्थे=मन्त्रादिप्रयोगकाले, कस्यापि कर्मणोऽनुष्ठानसमये, तु=पुनः, मध्यमां=मध्येस्थितां, वृत्तिम्, गायकाश्च यां 'चलत' इति शब्देन व्यवहरन्ति, एतादृशीं मध्यमां वृत्तिम्, शिष्याणाम्=शासितुं शीलमस्येति शिष्यस्तेषां विद्यार्थिनाम्, उपदेशार्थे=आद्योच्चारणसमये, उपदेशप्रयोजनाय, विलम्बितां=विलम्बयुक्तां वृत्ति, यां गायनकुशलाः गायकाः 'ठाह' इति संज्ञया परिभाषन्ते । तां वृत्ति समाश्रित्य प्रयोगो विधेयः, कुर्याद्वेति सर्वत्रान्वयः ।

हिन्दी—इस ग्रन्थ में प्रतिपादित 'यथादावुच्चरेद्वर्णान्' (स्वर प्र० २४) इस कारिका से 'वृत्ति' अभिव्यक्त होती है । वह तीन प्रकार की होती है । कहाँ किस वृत्ति का प्रयोग करना चाहिए, इस विषय में आचार्य कहते हैं कि पाठ को अभ्यास करते समय 'द्रुता' वृत्ति का प्रयोग करे, मन्त्र का प्रयोग करते समय 'मध्यमा' वृत्ति का विनियोग करे और जब शिष्य को उपदेश देने का समय हो तब 'विलम्बिता' वृत्ति का प्रयोग करना चाहिए । कहने का तात्पर्य यह है कि भिन्न-भिन्न समय में तथोपयुक्त वृत्ति का प्रयोग करना ही श्रेयस्कर है ।

दैवतमभिलक्ष्य 'द्रुता' वृत्तिः सर्वत्र न प्रयोगार्हेति निन्दिता—

ऐन्द्री तु मध्यमा वृत्तिः प्राजापत्या विलम्बिता ॥ ५० ॥
अग्निमारुतयोर्वृत्तिः सर्वशास्त्रेषु निन्दिता ।

अन्वयः—मध्यमा वृत्तिः तु ऐन्द्री (भवति), विलम्बिता वृत्तिः प्राजापत्या (भवति), अग्निमारुतयोः वृत्तिः सर्वशास्त्रेषु गर्हिता (भवति) ।

व्याख्या—यामिन्द्रमाकुशोषेति 'इदि' धातुं प्रयोगार्थे भजन्ति, तस्मात् इन्द्रः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वविधमैश्वर्यं प्रददाति, इत्थं तत्सम्बन्धिता वृत्तिरपि तथैवोपकरोति। अस्य विश्लेषणं यथा—मध्यमा=मध्येस्थिता वृत्तिस्तु, ऐन्द्री=इन्द्रो देवता अस्या इति इन्द्रदेवतासम्बन्धिता (भवति इत्युपरिष्टादन्वयः)। प्रजापतिर्ब्रह्मा यथा विश्वप्रपञ्चं विरचयति तथैव तद्दैवतका वृत्तिरपि विलम्बितायाः वृत्तेः प्राजापत्यत्वं विधत्ते, अतो विलम्बिता वृत्तिः प्राजापत्या भवति, अत्र तात्पर्यमिदं वर्तते यदियमपि प्रजापतिवद् शिष्यहृदये वर्णधारणेन ग्रन्थमुत्पादयति। पावक-वायोर्योगात् दावाग्निना ('सखा भवति वायुः' इत्यनेन सूच्यते यत् 'अग्निमारुतयोः' मैत्री विद्यते) येन प्रकारेण हानिर्जायते तथा ह्यग्निमारुतयोर्या द्रुता वृत्तिः—सा वर्णानामग्रहणेन हानिं विधत्ते, एतदेवाह—अग्निमारुतयोः=पावकवाय्वोः वृत्तिः या 'द्रुता' नाम्नी, सा सर्वशास्त्रेषु=निखिलवाङ्मयेषु, गर्हिता=निन्दिता भवतीति शेषः। अस्मिन् विषये नारदीयशिक्षायां विशेषोल्लेखः प्राप्यते।

हिन्दी—व्याकरण में 'इदि' धातु का अर्थ ऐश्वर्य होता है, अतः इन्द्र सर्वविध ऐश्वर्य को देने वाला है। इस प्रकार उससे सम्बन्धित वृत्ति भी उसी प्रकार उपकार करती है। जैसे—मध्यमा वृत्ति ऐन्द्री होने के कारण उपकारिका है। प्रजापति ब्रह्मा जिस प्रकार विश्वप्रपञ्च की रचना करते हैं उसी प्रकार विलम्बिता वृत्ति प्रजापति से सम्बन्धित होने के कारण शिष्य के हृदय में वर्णधारण के द्वारा ग्रन्थ को सुस्पष्ट करता है। अग्नि और वायु के योग से निष्पन्न दावाग्नि जैसे भस्म कर देता है, अतः इन दोनों देवताओं वाली द्रुता वृत्ति हानिकरी है, अतः शास्त्रों में इसकी निन्दा की गयी है, अतः अग्राह्य है।

इति महर्षि याज्ञवल्क्यप्रोक्ते शिक्षाग्रन्थे स्वरवर्णप्रकरणे क्षोपाह्वनरेशशास्त्रिकृतायां शान्तिव्याख्यायाम् अध्ययनविध्यधिकारः।

अथ हस्तसञ्चालनविधिः हस्तसन्निवेशं कथं कुर्यादिति विवेकः—

उत्तानं सोन्नतं किञ्चित् सुव्यक्ताङ्गुलिरञ्जितम् ॥ ५१ ॥
स्वरविच्च करं कुर्यात् प्रादेशोद्देशगामिनम्।

अन्वयः—स्वरवित् करम् उत्तानं च किञ्चित् सोन्नतं सुव्यक्ताङ्गुलिः रञ्जितं प्रादेशोद्देशगामिनं कुर्यात्।

व्याख्या—स्वराणां प्रदर्शने हस्तसन्निवेशं कथं कुर्यादित्याह आचार्यः—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरवित्—स्वरं वेत्तीति स्वरवित्=स्वरज्ञः, करं=हस्तं, स्वरप्रदर्शनार्थं, उत्तानम्=ऊर्ध्वमुखम्=उपरिभागं (कुर्यात्), च=पुनः, किञ्चित्=सामान्यरूपेण, सोन्नतम्=उन्नतेन सहितम्, अङ्गुल्यग्रभागेषु औन्नत्यसहितं, सर्पफणाकारमित्यर्थः (कुर्यात्), सुव्यक्ताङ्गुलिः—सुव्यक्ताः=सुष्ठुप्रकारेण व्यक्ताः=सरलाः, अङ्गुल्यः ताभिः, रञ्जितम्, प्रादेशोद्देशगामिनं—प्रादेशस्य=वितस्तिमात्रस्य, उद्देशं=स्थानं, गन्तुं शीलः प्रादेशोद्देशगामी तथाविधं, चः=पुनः, कुर्यात्=विदधीत ।

हिन्दी—स्वरों के प्रदर्शन में हाथ का संचालन अथवा संस्थापन किस प्रकार शिष्य करे इसका उपदेश देते हुए आचार्य कहते हैं—स्वरों का ज्ञान रखने वाला व्यक्ति हाथ को ऊपर की ओर करे और सामान्य रूप से कुछ उन्नत करे तथा प्रस्फुटित अंगुलियों से रञ्जित एक बित्ता ऊपर जाने वाला अर्थात् सर्प के फण के आकार वाला—तदाकार रूप से करे ।

कस्तावत् प्रादेशोद्देशः—

अङ्गुष्ठस्योत्तरं पर्वं तर्जन्युपरि यद्भवेत् ॥ ५२ ॥
प्रादेशस्य तु सोद्देशस्तन्मात्रं चालयेत् करम् ।

अन्वयः—अङ्गुष्ठस्य उत्तरं पर्वं तर्जनी उपरि यत् भवेत्, तु प्रादेशस्य उद्देशः तन्मात्रं करं चालयेत् ।

व्याख्या—प्रादेशोद्देशविषये ज्ञानाय एकस्य धनुषः कल्पना क्रियते, यस्यां कल्पनायां यत्र क-च-टवर्णानां धनुषः आकृतिर्निर्मीयते । यथा क च ट इयं स्थितिः अङ्गुष्ठतर्जन्योर्मध्ये भवति, अङ्गुष्ठस्य=तर्जनीपूर्ववर्तिनो मुख्याङ्गुलेः पर्व 'क' इत्याख्य तर्जन्याः=द्वितीयाङ्गुलेः उपरि 'ट' पर्यन्तं दीयमानं सूत्रं मौर्वीस्थानीयं यत् दशाङ्गुलपरिमितं 'क' 'ट' रूपं मध्येऽन्तरालं यद् भवेत्, सः 'क' 'ट' रूपात्मकोऽवकाशः, तु=निश्चयेन, 'सोद्देशः' इत्यत्र 'सोऽचि लोपे चेत्पादपूरणमि'ति सूत्रेण सोर्लोपे गुणे कृते तद्रूपम्, प्रादेशस्य उद्देशः प्रमाणस्थानं भवति, तन्मात्रं=दशाङ्गुलान्तरं, करं=स्वरप्रदर्शनार्थं, हस्तं चालयेत्=चालनं कुर्यादिति ।

हिन्दी—पूर्व कारिका में जो प्रादेशोद्देश शब्द आया है उसकी व्याख्या करते हुए आचार्य कहते हैं कि एक धनुष की कल्पना की जाय—उसके ऊपरी (पूर्वीय) छोर पर 'क', नीचे 'च' एवं तर्जनी पर्व पर 'ट' है । अंगुष्ठ के उत्तर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पर्व 'क' से प्रारम्भ कर तर्जनी के ऊपर 'ट' पर्यन्त दिया गया सूत्र प्रत्यञ्चास्थानीय है, जो दस अंगुलपरिमित 'क'-'ट' रूप में अन्तराल है, वह जो क-ट रूपात्मक अवकाश है वही सोद्देश प्रादेश का प्रमाणस्थान होता है, हाथ स्वरप्रदर्शन के लिए चलाना चाहिए।

पुनश्च प्रादेशमानं विशेषेण—

मनुष्य-तीर्थोच्चं कृत्वा पितृ-तीर्थोदकं व्रजेत् ॥ ५३ ॥
नामितं करपृष्ठन्तु सुव्यक्ताङ्गुलिमोक्षणम्।

अन्वयः—(दक्षिणकरस्य) मनुष्य-तीर्थ (म्) उच्चं कृत्वा पितृ-तीर्थोदकं व्रजेत्। करपृष्ठं तु नामितं (कृत्वा) सुव्यक्ताङ्गुलिमोक्षणम्।

व्याख्या—(दक्षिणकरस्य) मनुष्यतीर्थम्=इत्यस्मिन् विषये कोषकारेण अमरसिंहेनोक्तं यत्—'स्वल्पाङ्गुल्योर्मूले कायम्' (मानुषमपि स्मृत्यन्तरादस्यैव संज्ञा), एतत् पुष्ट्यर्थं लघुविष्णुवचनं यथा—'निवीती हन्तकारेण मनुष्यांस्तर्पयेदथ। कुशस्य मध्यदेशेन नृतीर्थेन हयुदङ्मुखः'॥ अत्र नृतीर्थेन मनुष्यतीर्थस्य ग्रहणं भवति, अपरञ्च 'निवीती कायतीर्थेन, मनुष्यान् सनकादिकान्' इति महर्षियाज्ञवल्क्यप्रतिपादितकायतीर्थस्य नृतीर्थस्य कथितत्वात्। क्वचिच्च—'करमध्यस्य प्रतिग्रहग्रहणार्थम् अग्नितीर्थत्वेन कथयन्तीत्यपि बोध्यम्'। उच्चं कृत्वा=उपरि भागे विधाय, पितृतीर्थेन=एतन्नामकेन हस्तस्थानेन, उदकं=जलं (यथा), व्रजेत्=गच्छेत्, अत्रायमाशयः—पितृतीर्थप्रदेशः दक्षिणप्लवं=धारं कृत्वेति, करपृष्ठं=हस्तस्य अधस्तल-प्रदेशस्याङ्गुलिमूलभागम्, तु=पुनः, नामितं=नम्रीभूतं विधाय, अत्र निसृष्टार्थः—पितृभ्यो जलदानसमये या चुलुकमुद्रा भवति, तथा हस्तः करणीयः, वैशिष्ट्यञ्चात्र—सुव्यक्ताङ्गुलिमोक्षणम्—सुव्यक्तानां=सुस्पष्टानां, पृथक् पृथक् व्यञ्जितानां, मोक्षणम्=ऋजुभावत्वं यत्र तथाविधम्, करं=हस्तं कुर्यादिति।

हिन्दी—इस प्रकार हस्तचालन में उसके अंगों के रखने के प्रकार का दिग्दर्शन करने के पश्चात् प्रासंगिक रूप से प्रादेश का मान कहा गया। अब उसी को पुनः पुष्ट करते हुए कहते हैं—मनुष्यतीर्थ (नृतीर्थ, जिसका स्मृतियों में अनेकत्र वर्णन हैं) को ऊपर करते हुए पितृतीर्थ से जल जिस प्रकार गिरे अर्थात् पितृतीर्थप्रदेश को दक्षिणधार करके हाथ के नीचे के प्रदेश स्थित अंगुलियों के मूलभाग को झुकाकर अर्थात् पितरों के जलदान में जो चुलुक-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुद्रा होती है, वैसा हाथ करके अच्छी तरह से सुस्पष्ट अंगुलियों वाले हाथ को रखना चाहिए। यह विशेष रूप से प्रादेशमान कहा गया है।

स्वारस्य लक्षणं किम् (हस्तचालने कुत्र कियदन्तरं स्यात्)—

स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् ॥ ५४ ॥
उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम्।

अन्वयः— स्वरिते त्र्यङ्गुलं विद्यात्, निपाते तु षट् अङ्गुलम्, उत्थाने तु नव अङ्गुल्यम्, एतत् स्वारस्य लक्षणम्।

व्याख्या—अत्र पूर्वप्रतिपादिताङ्गसन्निवेशविषये—'हस्तौ सुसंयताविति, अथ च 'उत्तानं सोन्नतम्' इत्युक्त्वा हस्तस्य सर्पफणाकारं विधाय नासाग्रसमसूत्रविधानेन धृतकराङ्गुल्यग्रः विदधन् स्वरनिर्देशकं करं प्रादेशपर्यन्तगामिनं चालयेत्। तत्रोच्चोदात्तस्थानविशेषात्—स्वरिते = स्वरितस्थानविशेषे करे प्रवर्त्तिते सति, त्र्यङ्गुलम् = अङ्गुलित्रयमन्तरं (विद्यात् = जानीयात्)। अनेन प्रकारेण स्वरितस्थानविशेषात् मध्यभागात् वामपार्श्वे उच्चोदात्तस्थानं गते करे चाङ्गुलित्रयम् अन्तरं भाव्यम्। निपाते तु = मध्यभागात् अनुदात्तस्थानं प्रति प्राप्तस्य करस्येत्यर्थः, षडङ्गुलं = षडङ्गुलिपरिमितमन्तरमिति भावः; विद्यात् = जानीयात्। उत्थाने = अनुदात्तस्थानात् उदात्तं प्रति गच्छतो हस्तस्येत्यर्थः, तु = पुनश्च, नवाङ्गुल्यं = नवसंख्यकाङ्गुलिमितमन्तरं जानीयात्। एतत् = पूर्वप्रतिपादितम्, स्वारस्य = स्वरसम्बन्धिविषयस्य हस्तसञ्चालनस्य, लक्षणम्—लक्ष्यतेऽनेनेति लक्षणं = स्वरूपम्, सामान्यरूपेण कथितमिति।

हिन्दी— इसी ग्रन्थ में पूर्वप्रतिपादित अंगस्थापन के विषय में 'हस्तौ सुसंयतौ' तथा 'उत्थानं सोन्नतं' इन दोनों निर्देशों के अनुसार अंगसंनिवेश से सज्जित तथा हाथ को सर्पफणाकृति के समान करके नासिका के आगे समसूत्र से धारण अंगुलि के अग्रिम स्थान पर होते हुए, स्वर के अनुसार हाथ प्रादेशगामी संचालित करे। वहाँ उदात्त स्थान से स्वरित स्थान तक हाथ ले जाने पर तीन अंगुलि का अन्तर होना चाहिए—जानना चाहिए। इसी प्रकार स्वरित स्थान से बीच से बायें पार्श्व में उदात्त स्थान जाता है और हाथ में तीन अंगुल का अन्तर सिद्ध है। निपात में तो मध्य से अनुदात्त स्थान के प्रति जाते हुए हाथ का छह अंगुल परिमित अन्तर रहे और उत्थान में अनुदात्त स्थान से उदात्त के प्रति जाते हुए हाथ का तो नौ अंगुल का अन्तर जानें। यही स्वारस्य (हस्तचालन) का लक्षण या स्वरूप है।

CC-0. Nepal Sanskrit Academy Kathmandu Collection

उदात्तादीनां कानि स्थितिस्थानानि—

उदात्तं तु भ्रुवः प्रान्ते प्रचयं नासिकाग्रतः ॥ ५५ ॥
हृत्प्रदेशेऽनुदात्तं तु तिर्यग् जात्यादिरीरितः ।

अन्वयः—उदात्तं तु भ्रुवः प्रान्ते, प्रचयं नासिकाग्रतः, अनुदात्तं तु हृत्प्रदेशे, जात्यादिः तिर्यग् ईरितः ।

व्याख्या—उदात्तादीनां कानि स्थितिस्थानानि ? इति जिज्ञासायामाह—उदात्तमिति । उदात्तमानेनोच्चारितमुच्चस्वरं (उच्चैरुदात्तः), तु=निश्चितरूपेण, भ्रुवः=अक्ष्णोरुपरिस्थिताया भ्रुकुटयाः, प्रान्ते=प्रदेशे, निकटे, दक्षिणकर्णाग्रसमीपे इति यावत्, स्थितं हस्तेन प्रदर्शनं कुर्यात्, प्रचयं=विकृतमविकृतं द्विविधमपि स्वरितम्, नासिकाया अग्रभागतः मुखकर्णमूलपर्यन्तम् । अनुदात्तम्=निम्नगतिकं स्वरं (नीचैरनुदात्तः), तु=निश्चयेन पुनः, हृत्प्रदेशे=हृदयस्थलप्रदेशे, हृदाभिमुख्यस्थाने इति यावत् । तथा चोक्तम्—'हृद्यनुदात्तः । मूर्ध्न्युदात्तः । श्रुतिमूले स्वरितः' । एषामुदाहरणानि क्रमेण यथा—'अग्गना ३ इ' इत्युदात्तस्य 'त्वा' इत्यनुदात्तस्य । 'प्र॒जाव॑ती॒रिति प्र॒जा । व्वती॑ँ इत्यवग्रहात् परौ स्वरितप्रचयौ । तथा च 'एवं जात्यादयोऽभिहिताः' इति । यथा—'त्र्यम्बकम्' इत्यादयः । अनेन प्रकारेण सामान्यरूपेण तत्र तत्र स्थितानां मुखोद्गीरितानामुदात्तादित्रयाणां करेण प्रदर्शनं विधाय, सम्प्रति—'अष्टौ स्वरान्' इत्येतेषां कथयितुं योग्यानां स्वरितोपयुक्तानां जात्यादीनां हस्तेन प्रदर्शने यत् किञ्चिद् वैशिष्ट्यमाह—तिर्यगिति । जात्यादिः=जात्याऽभिनिहित-क्षैप्र-प्रश्लिष्टेति चत्वारः अनुदात्तात् पराः स्वरिताः । अत्र कथं स्वरणीया इति जिज्ञासायां—तिर्यक् यद्युदात्तः परो न भवति तदा एते पितृपिण्डप्रदानमुद्रावत् दक्षिणतः अर्धन्युब्जं हस्तं कृत्वा, उदात्तश्चेत् परो भवेत्तर्हि मनुष्यदानमुद्रावत् वामतः पूर्णन्युब्जं हस्तं कृत्वा च स्वरणीया इति । ईरितः=प्रतिपादितः, वेदविद्भिराचार्यैः इति । तथा चोक्तम्—'चत्वारस्तिर्यक् स्वरिताः । अनुदात्तं चेत्पूर्वं तिर्यङ् निहत्य काण्वस्य । ऋजुं निहत्य प्रणिहन्यते उदात्ते' (शु० य० प्रा० १।१२२-१२४) । उदाहरणं यथाक्रमेण—'व्व॒ष्ण॒व्व्यो॒' इति जात्यः । 'व्व॒दो॒सि' इतिअभिनिहतः । 'अ॒ब्भ्य॒र्षत' इति क्षैप्रः । 'अभीन्धतामुखे' इति प्रश्लिष्टः एते चत्वारः उदात्तपरत्वाभावात् अर्धन्युब्जाः भवन्ति । उदात्ते परभूते यथा—'भूर्भुवः स्वर्द्यौरिव' इति जात्यः । 'प्रांसुदेभिनोर्बाहुभ्याम्'

CC-0. Nepal Sanskrit University. Digital Library. Kathmandu Collection

इति अभिनिहितः । विश्वन्यत्रिणम्' इति क्षैप्रः । 'स्रुचीयेति' इति प्रश्लिष्टः । अत्रायमभिप्रायः–उपयुंक्ताः अनुदात्तपूर्वाः सन्तः जात्यादयः पूर्णन्युब्जाः भवन्ति ।

हिन्दी—उदात्त आदि के कौन ठहरने के स्थान हैं ? इस जिज्ञासा के उत्तर में आचार्य कहते हैं कि—उदात्त = मुख से उच्चारित उच्च स्वर का वर्ण तो निश्चित रूप से भौंह के समीप से दाहिने कान के आगे तक स्थित हाथ से प्रदर्शन करना चाहिए, स्वरित जिसके दो भेद होते हैं—विकृत और अविकृत, दोनों नाक के अग्रभाग से मुख की ओर कर्ण के मूल तक प्रदर्शन करे। अनुदात्त = नीच स्वर तो हृदय के नजदीक (पास) तक प्रदर्शन करे। इस प्रकार सामान्य रूप से तत्तद् स्थान में स्थित मुख से उच्चरित उदात्तादि तीनों का हाथ से प्रदर्शन करके जात्यादि—जो जात्या, अभिनिहित, क्षैप्र और प्रश्लिष्ट ये चार अनुदात्त से परे स्वरित हैं—वे तिर्यक् यदि उदात्त से पर न हों तो वे पितृपिण्डमुद्रा के समान दक्षिण से अर्धन्युब्ज हाथ को करके और यदि पर हो तो मनुष्यदानमुद्रा के समान बायें से पूर्णन्युब्ज हाथ को करके स्वर का प्रदर्शन करे। ऐसा आचार्यों ने कहा है।

चतुर्णां जात्यादीनां हस्तचालने कियदन्तरं स्यात्—

षडङ्गुलं तु जात्यस्य हस्तस्याऽनुथथस्य च ॥ ५६ ॥
तच्चतुर्भागमात्रं तु हस्तं तेनैव वर्त्तयेत् ।

अन्वयः—जात्यस्य हस्तस्य तु षडङ्गुलम्, अनुपथस्य च (षडङ्गुलम्) तत् (तस्य) चतुर्थभागमात्रं हस्तं तेन एव वर्त्तयेत् ।

व्याख्या—जात्यस्य = पूर्ण-अर्धन्युब्ज-अन्यतरस्वरप्रदर्शकस्य, हस्तस्य = मध्यस्थानात् अनुदात्तस्थानं प्रति गच्छतः बाहोः, तु = निश्चयेन पुनः, षडङ्गुलम् = षट्संख्याकमङ्गुलमन्तरं स्यादित्यर्थः । अनुपथस्य = मूलस्थानविशेषात् हृत्पार्श्वस्थितं हस्तचालनं कृत्वा पुनरावर्तितहस्तमार्गस्य, च = पुनः, षडङ्गुल-परिमितमेवान्तरं जायते । अनेन प्रकारेण तिर्यक्स्वरणीयान्तरालं कथयित्वा साम्प्रतम् अर्धन्युब्जस्थले शुक्लयजुर्वेदीयं प्रातिशाख्यं प्राप्तम् 'अनुदात्तं चेत्पूर्वं तिर्यङ् निहत्य' इति विधानेन पितृतीर्थनिम्नीकरणं तत्रान्तराले मान-स्थान-विशेषमाह—तच्चतुरिति । तु = किन्तु, अर्धन्युब्जे इति यावत्, तस्य = षडङ्गु-लान्तरालस्य, चतुर्थभागमात्रम् = चतुर्थांशपरिमितम्, षडङ्गुलस्य चतुर्थांशः सार्धाङ्गुलप्रमाणस्, तं पितृतीर्थेन निम्नगामिनं कृत्वा, हस्तं = हृदयपार्श्वस्थितं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

करं, तेन एव = षडङ्गुलान्तरालस्थितेन मार्गेणैव, वर्त्तयेत् = हृत्प्रदेशस्थानात् मध्ये प्रापयेत्, मूलस्थानमानयेत् ।

अत्रायं विमर्शः — अर्धन्युब्जस्थाने मूलस्थानवर्त्तिनं करं पितृतीर्थस्थानात् सार्धैकाङ्गुलान्तरालं नम्रीभूतेन सम्पन्नमर्धन्युब्जं तस्मात् हृत्प्रदेशं यावत् षट्संख्यकाङ्गुलान्तरं मण्डलाकृतिं चालयित्वा भूयोऽपि मूलस्थानपर्यन्तमानयेत् । एतदेवाऽर्धन्युब्जता जात्यादीनामनुदात्तपूर्वाणाम् । यदि चेदेतेभ्यः परत उदात्तः सम्भवेत्तदा तु तिरश्चीन निहननं पितृतीर्थनिम्नीकरणात्मकमपोह्य शुक्लयजुर्वेदीयप्रातिशाख्योक्त—'ऋजुं निहत्य प्रणिहन्यत उदात्ते' इति निर्देशात् उत्तानमेव करं प्राक् मूलस्थानात् हृदयसमीपमवतार्य भूयः षडङ्गुलान्तरालात्मके मध्ये प्रत्यावर्तनं विधाय च प्रणिहन्यते पूर्वं ऋजुत्वाख्यानात् सम्प्रति न्युब्जता सूचिता ।

'प्रणिहन्यत' इत्यत्र प्रोपसर्जनाच्च पूर्णता द्योत्यते । अस्मात्कारणादेव मनुष्यतीर्थेन नीचीक्रियते । एतदेवात्र पूर्णन्युब्जता भवति । इत्थमुदात्तादीनां हस्तप्रदर्शनं गदितम् । स्वरोद्भवस्थानानि तु प्रातिशाख्यप्रोक्तानि 'सवनक्रमेणोरःकण्ठभ्रूमध्यानि' इति त्रीणि भवन्ति । एषु उच्चार्यमाणेषु वर्णेषु त्रयो विकाराः शरीरस्य पर्यायेण भवन्ति । तथा चोक्तं प्रातिशाख्ये—'आयाम-मार्द्दवाऽभिघाताः' । अत्र आयामो नाम ऊर्ध्वगमनं शरीरस्य । मार्द्दवं नाम गात्राणां अभिघातः तिर्यग् गमनं गात्राणाम् । अस्मिन् विषये सिद्धान्तकौमुदीकाराः विशेषेण निर्दिशन्ति—उत्पद्यमानाः के स्वरा उदात्तादिभेदेन कथं परिगण्यन्ते इति तत्रैवोह्यम् । विस्तारादनपेक्षितमत्र ।

हिन्दी — अब उपर्युक्त चार जात्य आदि के हस्तसंचालन में कितना अन्तर हो इस विषय में आचार्य का निर्देश है कि—जात्य में हाथ के मध्य से अनुदात्त स्थान की ओर जाते हुए हाथ का निश्चयपूर्वक छः अंगुल का अन्तराल होना चाहिए और मूलस्थान से हृदय के पास हस्तसंचालन करके लौटे हुए हाथ का भी अन्तर छः अंगुल का ही है । तिरछी गति वाले स्वर सम्बन्धी अन्तराल कहने के पश्चात् अब अर्धन्युब्ज के प्रातिशाख्य निर्देश के अनुसार प्राप्त जो पितृतीर्थ का निम्नीकरण के अन्तराल के सम्बन्ध में कहते हैं—अर्धन्युब्ज में तो छह अंगुल का चतुर्थ भाग अर्थात् डेढ़ १½ अंगुल का ही प्रमाण है, पितृतीर्थ से नीचे करके हाथ को हृदय के पास करके उससे छः अंगुल के अन्तराल के रास्ते से ही हृदय के प्रान्त से मध्य में (मूल स्थान में) ले आवे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उदात्तादीनां हस्तप्रदर्शने वाम-दक्षिणविन्यासप्रकारमाह—

उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत् ॥ ५७ ॥
उदात्तस्वरितोदात्ताः क्रमाद्दक्षिणतो न्यसेत् ।

अन्वयः—उदात्ताद् अनुदात्ते तु वामायाः भ्रुवः आरभेत् । उदात्तस्वरितोदात्ताः क्रमात् दक्षिणतः न्यसेत् ।

व्याख्या—उदात्तादीनां हस्तप्रदर्शने वाम-दक्षिणविन्यासप्रकारमाह—उदात्ताद्=उच्चस्वरयुक्तात् (उच्चैरुदात्तः), अनुदात्ते=नीचस्वरे परतः स्थिते सति, तु=पुनः, उदात्तस्योच्चारणे हस्तसञ्चालनम्, वामायाः=वामभाग स्थितायाः, भ्रुवः आरभेत्, वामभागे करो धारणीयः । अत्रोदाहरणं यथा—'ततो' ऽविराडजायतेति मन्त्रस्योत्तरार्धभागे 'स जातोऽअत्यरिच्यत' इत्यस्मिन् स्थाने सकारोत्तरवर्तिनोऽकारस्योदात्तस्योच्चारणकाले हस्तस्य वामभागे स्थितिः । न तु दक्षिणभ्रुवः प्रान्ते तस्योदात्तस्य स्थितिर्विधेया, उत्तरत्रं जकारोत्तरवर्त्तिन अकारस्य अनुदात्तस्वरूपस्य भावात् । इत्थमुदात्ते वामतः हस्तविन्यासं प्रतिपाद्यानुदात्ते दक्षिणभागात् हस्तविन्यासं व्यज्यते ।

'अनुदात्ते दक्षिणतो हस्तविन्यासं कुर्यात्' इत्यनुसारेण—उदात्तस्वरितोदात्ताः=तथाविधेन यस्यानुदात्तस्याग्रे—उदात्तः स्वरितः उदात्तश्च, क्रमशः आनुपूर्व्येण स्युः, एवम्भूते तस्मिन् अनुदात्ते—हस्तं दक्षिणतो न्यसेत्=क्षेपं कुर्यात् । अत्रोदाहरणं यथा—'इषे त्वा' इत्वनयोः पदयोः 'ऊर्ज्जे' इति पदेन सह संहिताविवक्षायाम् अनुदात्तेकारे दक्षिणतो हस्तो न्यस्तव्यः । अत्रायं निष्कर्षः—यत्रानुदात्तेऽनुदात्तपरकोदात्तपरत्वं स्यात् तत्र पूर्वानुदात्ते हस्तस्य दक्षिणतो न्यासः । यत्रानुदात्ते स्वरितपरकोदात्तपरत्वं स्यात् तत्रानुदात्तेऽधः हृदि हस्तस्य न्यासः । स्वरितोदात्ताः क्रमादिति वचनेन स्वरितस्यानुदात्तीभूतस्यैव ग्रहणम् । अन्यथा स्वरितोदात्ता इत्यत्रोदात्तग्रहणं व्यर्थं स्यादिति ।

हिन्दी—अब उदात्त, अनुदात्त और स्वरित को व्यक्त करने के लिए हस्तप्रदर्शन वाम तथा दक्षिण से करना चाहिए, इस सम्बन्ध में आचार्य कहते हैं—उच्चस्वरयुक्त उदात्त अनुदात्त के नीच स्वर के परे रहने पर उदात्त के उच्चारण में हस्तचालन बायें भ्रुव से आरम्भ करना चाहिए अर्थात् वामभाग में हाथ रखे । जैसे—'ततो ऽविराडजायत' इत्यादि मन्त्र में सकारोत्तरवर्ती जो अकार उदात्त है उच्चारण के समय हाथ को वामभाग में

CC-0. Nepal Rashtriya Sanskrit Academy, Kathmandu Collection

स्थित करे, किन्तु दाहिने ध्रुव के पास उसकी स्थिति कदापि न करे। क्योंकि उत्तर में जकारोत्तरवर्ती अकार अनुदात्तस्वरूप है।

इस प्रकार उदात्त में बायें से हस्तविन्यास को कहा गया, अब अनुदात्त में दाहिने से हस्तन्यास करने का विधान कहा जाता है। जिस अनुदात्त के आगे उदात्तस्वरितोदात्त अर्थात् उदात्त, स्वरित और उदात्त क्रम से हों उस अनुदात्त में हाथ दक्षिण से रखे। उदाहरण संस्कृत व्याख्या से अवगत करें।

अनुदात्तानामनुदात्ते परे हस्तदर्शने किं वैशिष्ट्यमित्याह—

उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ॥ ५८ ॥
अक्षरात्तुल्ययोगाच्च नीचे नीचगतानि च।

अन्वयः—तुल्ययोगात् अक्षरात् च नीचे नीचगतानि (भवन्ति)। (अत्र कारणमाह) उच्चात् उच्चतरं (स्वरं) (किञ्चित् नास्ति) तथा नीचात् नीचतरं (किमपि) नास्ति।

व्याख्या—तुल्ययोगादक्षरात् = समानयोगाद् वर्णात्, अनुदात्तादित्यर्थः, च= पुनः, नीचे=अनुदात्ते परे, नीचगतानि=निम्नगतिकानि अनुदात्तानुगतानि, उदात्तमयानि इति यावत् (भवन्ति)। अत्रायमाशयः—अन्तिममनुदात्तं प्रतीक्षमाणाः पूर्वेऽनुदात्ताः हस्तेन मध्ये एव प्रदर्श्यमाणाः तिष्ठन्ति प्रचयवत् इति। अत्र कारणमाह—उच्चात् = उदात्तात् (उच्चैरुदात्तः), उच्चतरम् = महत्तरमेतन्नामकं भिन्नं स्वरं किमपि नास्ति। तथा = तेनैव प्रकारेण, नीचात् = अनुदात्तात् (नीचैरनुदात्तः), नीचतरं तदाख्यमन्यत् स्वरं किमपि न विद्यते। अस्मात् कारणात्—चरममनुदात्तं यावत् पूर्वस्थितेष्वनुदात्तेषु उच्चार्यमाणेषु मध्ये एव हस्तः प्रचयवत् प्रदर्शनीयः। यथा—'गा॒यत्री' इत्यस्मिन् स्थाने गकारोत्तरवर्ती आकारो हस्तेन प्रदर्श्यमाणो मध्ये एव तिष्ठति, यकारोत्तरवर्ती अकारो दक्षिणे न्यस्यते।

हिन्दी—अनुदात्तों के अनुदात्त परे हस्तप्रदर्शन में जो वैशिष्ट्य है उसे आचार्य कहते हैं—समानयोग वाले अक्षर से अर्थात् अनुदात्त से और नीच अनुदात्त से परे नीचगत अर्थात् अनुदात्त से अनुगत उदात्तमय होते हैं। अन्तिम अनुदात्त को प्रतीक्षा करने वाले पूर्व अनुदात्त हाथ से मध्य में ही प्रचय के समान प्रदर्श्यमान रहते हैं। इसका कारण यह है कि—(माध्यन्दिनों का) उदात्त से बढ़कर उच्चतर भिन्न स्वर नहीं है तथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुदात्त से नीचतर दूसरा स्वर कोई नहीं है। अतः प्रचय के समान मध्य में ही हस्तप्रदर्शन करना चाहिए।

किन्तावद् स्वरितवैशिष्ट्यं प्रचयविधिश्च का—

स्वरितादनुदात्ता ये प्रचयांस्तान् प्रचक्षते ॥ ५९ ॥
एकस्वरानपि च तानाहुस्तत्त्वार्थचिन्तकाः ।

अन्वयः—तत्त्वार्थचिन्तकाः स्वरितात् (अग्रे) ये अनुदात्ताः तान् प्रचयान् प्रचक्षते । (अपि) च तान् एकस्वरान् आहुः ।

व्याख्या—तत्त्वार्थचिन्तकाः—तत्त्वस्य=सारभूतस्य, अर्थस्य = पदार्थस्य, ये चिन्तकाः = चिन्तनशीला आचार्याः, स्वरितात् = स्वरितवर्णात् (अग्रे), ये अनुदात्तास्तान् प्रचयान्, प्रचक्षते = वदन्ति, एवञ्च तान्=स्वरितादुत्तरे पठितान् अनुदात्तान्, आहुः = कथयन्ति । उदाहरणञ्चात्र—'गणानान्त्वा' इत्यस्मिन् स्थाने स्वरितात् परस्य त्वेत्यनुदात्तस्य प्रचयत्वं भवति, तथा च प्रातिशाख्ये शुक्लयजुर्वेदीये—'स्वरितात्परमनुदात्तमुदात्तमयम् । अनेकमपि । नोदात्त-स्वरितोदयम् । उदात्तमयमित्यत्र प्राचुर्ये मयट् प्रत्ययः । तेन कारणेन अनुदात्ते बाहुल्येन उदात्तत्वस्य विधानात् किञ्चिदनुदात्तत्वमपि विशिष्यते । अस्मा-त्कारणादेव स्वरितवत् प्रचयेऽपि हस्तप्रदर्शने 'प्रचयं नासिकाग्रतः' इति याज्ञवल्क्यशिक्षायां, 'कर्णशूले च स्वरितः' इति च मध्ये नासिकाग्रे स्थितिरुक्ता सङ्गच्छते ।

हिन्दी—स्वरित की विशेषता तथा प्रचयविधि क्या है, इस सम्बन्ध में तत्त्वार्थचिन्तक आचार्य कहते हैं कि स्वरित वर्ण के आगे जो अनुदात्त हैं, वे प्रचय कहलाते हैं और उन स्वरित से उत्तर (बाद) पढ़े गये अनुदात्तों को एक स्वर या एक श्रुति भी कहते हैं। जैसे 'गणानान्त्वा' इस मन्त्र में स्वरित से पर 'त्व' इस अनुदात्त का प्रचयत्व है। यही बात प्रातिशाख्य में भी कही गयी है।

प्रचये स्वरितविधानं, केवले स्वरिते च मृदुत्वं कुर्यात्—

प्रचयो यत्र दृश्येत तत्र हन्यात् स्वरं बुधः ॥ ६० ॥
स्वरितः केवलो यत्र मृदुं तत्र निपातयेत् ।
मुखस्याकृतिर्भवेत् स्याद्गकारे तु नखग्रहः ॥ ६१ ॥

CC0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—यत्र प्रचयो दृश्येत तत्र बुधः स्वरं हन्यात् । यत्र केवलः स्वरितः तत्र मृदुं निपातयेत् । मकारे मुष्ट्याकृतिः स्यात्, नकारे तु नखग्रहः (स्यात्) ।

व्याख्या—स्वरितात् परः प्रचयः, यत्र=यस्मिन् स्थाने, दृश्यते=अवलोकयेत्, तत्र=तस्मिन् स्थाने, बुधः=वैदिको विद्वान्, स्वरं=स्वरितस्वरं, हन्यात्=हननं कुर्यात् अर्थात् वेगेन पातयेत् (आननात् कराच्चैव) । अत्रोदाहरणं यथा—'गणानान्त्वा' इत्यत्र नकारोत्तरवर्त्तिनः आकारस्य स्वरितस्य शैघ्र्येण निपातः । ततः परस्यत्वेति प्रचयस्यास्त्वित्वात् । यत्र=यस्मिन् स्थाने च, केवलः=प्रचयपरत्वविरहितः, स्वरितः=स्वरितवर्णः, तत्र=तस्मिन् स्थाने, स्वरितं स्वरं, मृदुं=मृदुत्वभावेन यथा भवेत्तथा—मुखात् कराच्च, निपातयेत्=निपातनं कुर्यात्; मध्ये आनयेदित्यर्थः । यथा—'पुरुषं पादो'स्येत्यत्र रेफोत्तरस्योकारस्य स्वरितस्य मृदुत्वं पातः । साम्प्रतं हस्तावयवेन प्रदर्शनस्थलानि कथ्यन्ते । प्रत्यवसानगतेऽर्धमात्रिके मकारे—हस्तस्य=करस्य, मुष्ट्याकृतिः=मुष्टिवदाकृतिः, स्यात्=भवेत् । यथा=गणानान्त्वा···धम्' इत्यादौ । नकारे तु=अवसानगते नकारे, नखग्रहः=तर्जन्याः नखस्याङ्गुष्ठेन स्पर्शो विधेयः । यथा—'सहस्तो० शमीन्' इत्यादिस्थलेषु ।

हिन्दी—स्वरित का अन्यवैशिष्ट्य कहते हैं कि स्वरित से परे जहाँ प्रचय दिखाई दे वहाँ वैदिक विद्वान् (यहाँ प्रचय ग्रहण से स्वरान्तर का अभाव लक्षित होता है, उससे अवसान भी ग्रहण किया जाता है) स्वरित स्वर को वेग से मुख तथा हाथ से निपातन करे । जैसे—'गणानान्त्वा' इस मन्त्र में । और जहाँ केवल प्रचयपरत्व रहित स्वरित हो वहाँ स्वरित स्वर को मुँह तथा हाथ से निपातन करे अर्थात् उच्चस्थान से मध्य में ले आवे । जैसे—'पुरुषं पादो'स्य' इस मन्त्र में रेफोत्तरस्थ उकार स्वरित का मृदु पात होता है । अब हस्तावयव के द्वारा प्रदर्शन स्थान कहते हैं—प्रत्यवसान में स्थित अर्धमात्रिक मकार में हाथ की मुट्ठी की आकृति हो तथा नकार में नख से अंगूठे से स्पर्श करना चाहिए ।

ककारादौ हस्तप्रदर्शने कथं कुत्र वा नमनं स्यात्—

ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत् ।
पश्चाङ्गुल्यं पकारे च तकारे कुण्डलाकृतिः ।। ६२ ।।

अन्वयः—ककारान्ते टकारान्ते ङणे तर्जनिकां नमेत् च पकारे पश्चाङ्गुल्यं तकारे च कुण्डलाकृतिः (दर्शयितव्या) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या--हस्तावयवेन कुत्र केन रूपेण नमनं कुर्यादित्याहाचार्यः--ककारान्ते = ककारस्य (क, ख, ग, घ) अन्ते ककारान्ते, टकारान्ते = टकारस्य (ट, ठ, ड, ढ) अन्ते एवं ङणे = ङकार-णकारविशिष्टे अवसानगतस्वरे, 'ङण' इत्यत्र द्वन्द्वात्मकः समाहारः। तर्जनिकां = तर्जनीमङ्गुलीम्, अङ्गुष्ठसमीपस्थामङ्गुलीम्, नमेत् = रेफसदृशवर्णेन दर्शयेदित्यर्थः। च = पुनः, पकारे = पवर्गे, पकारविशिष्टे अवसानगतस्वरे, पञ्चाङ्गुल्यम् = अङ्गुष्ठमारभ्य कनीनिकापर्यन्तम्, कुर्यात्। पञ्चाङ्गुलीनामेकस्मिन् स्थाने सङ्कोचं कुर्यात्। च = पुनः, तकारे = तवर्गे (त थ द ध न) अवसानगते स्वरे, कुण्डलाकृतिः = कुण्डलवद् आकृतिः। अत्रायमभिप्रायः—अङ्गुष्ठेन तर्जन्युत्तमपर्वसंसर्गस्वरूपा प्रदर्शनीया। अत्र क्रमेणोदाहरणानि यथा--ककारे 'अद्धचवोच० णक्', टकारे 'सं स्रव० व्वाट्'; एवञ्च ङणयोस्तूदाहरणे पदपाठतो ज्ञेये। तथा च--ङकारे 'दध्यङ्०', णकारे 'व्वृषण्णवसू', पकारे--'गायत्री त्रिष्टुप्', तकारे च यथा--'सह० पात्' इत्यादाविति।

हिन्दी--हाथ के अवयव (उपाङ्ग) से कहाँ किस रूप से (हाथ) झुकाना चाहिए, इस विषय में आचार्य कहते हैं कि कवर्ग, टवर्ग तथा ङण के अवसानगत स्वर में तर्जनी अंगुली को रेफ के समान दिखावे और पवर्ग में (अवसानगत स्वर में) पाँचों अंगुलियों (अंगुष्ठ से अनामिका तक) को एक स्थान में संकुचित करे और तवर्ग में कान में पहने जाने वाले कुण्डल की आकृति के समान अर्थात् अंगूठे से तर्जनी के उत्तम पर्व के संसर्गस्वरूप दिखाना चाहिए।

ऊष्मा(विसर्ग)स्थले अङ्गुलि-निक्षेपप्रकारमाह—

ऊर्ध्वक्षेपाच्च योष्मा स्यादधःक्षेपाच्च या भवेत्।
एकैकामुत्सृजेद्धीरः स्वरिते तूभयं क्षिपेत्॥ ६३॥

अन्वयः—ऊर्ध्वक्षेपात् या ऊष्मा स्यात् च अधः क्षेपात् या ऊष्मा भवेत्, धीरः एक-एकाम् उत्सृजेत्, स्वरिते च उभयं क्षिपेत्।

व्याख्या—ऊर्ध्वक्षेपात्-ऊर्ध्वम्=उपरिभागे, क्षेपः=निक्षेपः,यत्र तस्मादुदात्ताद् (परा), या = चर्चिता, ऊष्मा = विसर्गः (स्यात्), च = पुनः, अधःक्षेपात् = नीचैः क्षेपो निक्षेपो यत्र तस्मादनुदात्ताद् प्रचयाद्वा (परा), या ऊष्मा = विसर्गो भवेत्,तदा = तस्मिन् काले, तथा = संकुचनाकाले धीरः = प्राज्ञो

CC-0. Nanaji Deshmukh Academy, Bhopal. Digitized by eGangotri

विद्वान् (स्वस्थचित्तः), एकैकाम्=एकामेकां कृत्वा क्रमशः तर्जनीं कनिष्ठिकाञ्च अङ्गुलीम्, उत्सृजेत् = स्वसमूहात् बहिर्निःसारयेत् । अत्रायं निष्कर्षः—उदात्तात्परस्मिन्नूष्मणि दृष्टे सर्वासामङ्गुलीनां सङ्कोचं कृत्वा तर्जनीमेकां स्वयूथाद् बहिर्निःसारयेत् । तर्जन्याः प्रथमोपस्थितत्वात् । उदाहरणञ्चात्र—'ततो व्विराडजायत० पुरं' । 'अधःक्षेपादि'त्युक्त्वा स्वरितेऽपि कनिष्ठिकाक्षेपे प्राप्ते अपवादस्वरूपमाह—स्वरिते = स्वरितात् परे विसर्गे दृष्टे, तु = पुनश्च, उभयम् = तर्जनीकनिष्ठिके इति द्वयम्, क्षिपेत् = वत्सशृङ्गवत् परित्यजेत् ।

हिन्दी—ऊष्मा (विसर्ग) स्थल में अंगुलि क्षेप के विषय में आचार्य का अभिमत—ऊपर की ओर क्षेप होता है जहाँ ऐसे उदात्त से परे जो ऊष्मा (विसर्ग) और नीचे क्षेप वाले अनुदात्त अथवा प्रचय से परे जो ऊष्मा (विसर्ग), उसके उच्चारण के समय में स्वस्थ चित्त वाला वैदिक विद्वान् तर्जनी तथा कनिष्ठिका एक-एक करके क्रमशः अंगुली का उत्सर्ग करे । निष्कर्ष यह है कि उदात्त से परे ऊष्मा के दृष्ट होने पर सब अंगुलियों को संकुचित करके तर्जनी अंगुली तथा कनिष्ठा को समूह से बाहर निर्देश करते हुए निकाले । ऐसा ही अनुदात्त से परे ऊष्मा में भी होगा और स्वरित से परे विसर्ग होने पर तो तर्जनी और कनिष्ठिका अंगुलियों का क्षेप करना चाहिए ।

अथापि तत्र अनुस्वारस्थले अङ्गुलिक्षेपमाह—

अङ्गुष्ठाकुञ्चनं लघावनुस्वारे त्वपाꣳरसम् ।
दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्तितः ॥ ६४ ॥

अन्वयः—अपाꣳरसम् लघौ अनुस्वारे अङ्गुष्ठ-आकुञ्चनं (कार्यम्), दीर्घे रङ्गे च तर्जन्याः प्रसारः परिकीर्तितः ।

व्याख्या—अपाꣳरसम् = इति यजुर्वेदीये मन्त्रे, लघौ अनुस्वारे = कथ्यमानलक्षणे ꣳकारे, अङ्गुष्ठाकुञ्चनम्—अङ्गुष्ठस्य = मुख्याङ्गुलेः, आकुञ्चनम् (तर्जनीपृष्ठे कार्यमिति) । अत्र लघाविति पदे गुरोः अपि उपलक्षणं भवति । तथा चोक्तम्—'दीर्घे तु देशिनी त्याज्या क्षिप्रं स्याद् द्विलके (गुरावित्यर्थः) लघौ (ह्रस्वे)' । आनुषङ्गिकं क्षिप्रलक्षणं च यथा शिक्षाग्रन्थे—'तर्जन्याः पृष्ठसंश्लिष्टमङ्गुष्ठं चाग्रनामितम् । तं वै क्षिप्रं विजानीयात् स्वरविद्भिरुदीरितम्' ॥ अनेन संयोगाद्यनुस्वारे कथ्यमानलक्षणोपेते गुरौ लघौ च तर्जन्यङ्गुल-

CC-0. Nepal Vasudev Tripathi Sanskrit Academy, Kathmandu Collection

पृष्ठेऽङ्गुष्ठाग्रप्रकर्षेण क्षेपः सिद्धः। दीर्घे=अनुस्वारे कथ्यमानलक्षणे ठँकारे। अत्रोदाहरणं यथा—'गणपतिठँ हवामहे' इति। रङ्गे=अर्धानुस्वारे कथ्यमान-लक्षणे सार्धद्व्यङ्कयुते सार्धैकाङ्कयुते च द्विविधेऽपि, यथा—'लोकाँ २।।ऽ अकल्पयन्' इति। 'जहि शत्रूँ १रपं' इति च। चकारादुदात्तात्परस्मिन्नूष्मणि। यथा—'सहस्राक्ष' ँ). इत्यत्र विसर्गे, तर्जन्या अङ्गुल्याः, प्रसारः परिकीर्तितः।

तथा चोक्तं मल्लशर्मशिक्षायाम्—

'स्वरितेभ्यः क्रमेणैव दक्षिणोत्तरगामिनी।
कनिष्ठा तर्जनी चैव त्याज्या तूर्ध्वे हि देशिनी॥
अनुदात्तयुते, ह्रस्वे सस्वराच्च परेऽपि वै।
सुज्ञैः कनिष्ठिका त्याज्या सविसर्गे द्विजोत्तमैः'॥

एतेनाधःक्षेपादूष्मणि कनिष्ठिकामोचनं पूर्वस्मिन् पद्ये फलितम्।

हिन्दी—अब विसर्ग के स्थल में अंगुलिप्रक्षेप के विधान-निरूपण के पश्चात् प्राप्त अनुस्वार के स्थल में अंगुलीक्षेप के विषय में आचार्य कहते हैं कि—यजुर्वेद के 'अपाꣳरसम्' इस मन्त्र में लघु अनुस्वार होने पर अंगूठे का आकुञ्चन (तर्जनी के पीठ पर) करना चाहिए।

विशेष—'लघु' इस पद से गुरु का भी उपलक्षण होता है। अतः संयोगादि के अनुस्वार में वक्ष्यमाण लक्षण से युक्त गुरु और लघु में तर्जनी के पृष्ठ पर अंगूठे के अग्रभाग से प्रक्षेप सिद्ध होता है।

याजुषीशिक्षायां सामवेदीयस्वरप्रदर्शनार्थमङ्गुलिचालन-निर्देशः—

तर्जन्यङ्गुष्ठयोः स्पर्श उदात्तम्प्रति पद्यते।
नीचन्तु मध्यमां कुर्याच्छेषं नीचतरं क्रमात्॥ ६५॥

अन्वयः—उदात्तं प्रति तर्जनी-अङ्गुष्ठयोः स्पर्शं पद्यते, नीचं तु मध्यमां कुर्यात्। शेषं स्वरितं क्रमात् नीचतरं (कुर्यात्)।

व्याख्या—अस्यां याजुषी-शिक्षायामपि सामवेदीयस्वरप्रदर्शनार्थं कर-सञ्चालनस्य आचार्याः निर्देशं कुर्वन्ति। तद्यथा—सामवेदे षड्जादयः ये सप्त-स्वराः प्रथितास्सन्ति ते एव तैत्तिरीयप्रातिशाख्ये भिन्ननामभिः प्रसिद्धाः सन्ति। येषां नामानि च—सन्ति—'क्रुष्ट-प्रथम-द्वितीय-तृतीय-चतुर्थ-मन्द्र-अतिस्वार्याः'। एतेषां स्वराणामुदात्तादिष्वन्तर्भावः पूर्वमेव स्वरप्रकरणे प्रोक्तस्तत्र—उदात्तं प्रति निषादगान्धारयोः स्वरयोः, तर्जन्यङ्गुष्ठयोः—एतन्नामकाङ्गु-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

ल्योः, स्पर्शः, पद्यते = विद्यते, करणीयः। नीचम् = अनुदात्तम् प्रति, तु = निश्चयेन, ऋषभः-धैवतयोः स्वरयोः, मध्यमाम् = मध्येस्थितामङ्गुलीम्, अङ्गुष्ठस्पृष्टां, कुर्यात्=विदधीत। शेषम् = उदात्तानुदात्तभिन्नं स्वरितं षड्जं मध्यमं च, क्रमात् = क्रमशः, कुर्यात् = समाचरेत्। अत्रायं भावः— अनामिकां कनिष्ठिकां कनिष्ठिकामूलं च स्पर्शं कुर्यादिति। नारदीशिक्षायान्त्वस्य विस्तरेण चर्चा विद्यते॥ तद्यथा–'अङ्गुष्ठस्योत्तमे क्रुष्टो ह्यङ्गुष्ठे प्रथमः स्वरः। प्रदेशिन्यां तु गान्धार ऋषभस्तदनन्तरम्॥ अनामिकायाꣳ षड्जस्तु कनिष्ठिकायां च धैवतः। तस्याधस्ताच्च योन्यास्तु निषादं तत्र विन्यसेत्'॥ प्रसङ्गप्राप्तपरिचयोऽप्येषां यथा—'यः सामगानां प्रथमः सवेणोर्मध्यमः स्वरः। यो द्वितीयः स गान्धारस्तृतीयस्त्वृषभः स्मृतः॥ चतुर्थः षड्ज इत्याहुः पञ्चमो धैवतो भवेत्। षष्ठो निषादो विज्ञेयः सप्तमः पञ्चमः स्मृतः'॥ इत्यन्य एव प्रकारः। स च शाखाभेदेन आर्चिकादिभेदेन च व्यवहर्त्तव्यः।

हिन्दी—इस याजुषी शिक्षा में सामवेदीय स्वर के प्रदर्शन के लिए हस्त-संचालन का आचार्य निर्देश करते हैं कि—सामवेद में जो षड्ज आदि सात स्वर ('सप्त स्वरास्त्रयो ग्रामा मूर्च्छना चैकविंशतिः। ताला एकोनपञ्चाशत्' इत्यादि) प्रसिद्ध हैं वे ही तैत्तिरीय प्रातिशाख्य में भिन्न-भिन्न नामों से यथा—क्रुष्ट, प्रथम, द्वितीय, तृतीय, चतुर्थ, मन्द्र और अतिस्वार्य हैं। इन सबका अन्तर्भाव उदात्तादि में पूर्व ही स्वर-प्रकरण में कहा गया है। उदात्त के लिए निषाद गान्धार स्वरों का तर्जनी तथा अंगूठे से करना चाहिए, अनुदात्त के लिए—निश्चयपूर्वक ऋषभ और धैवत स्वरों का मध्यमा अंगुली की अंगूठे से स्पर्श कराना चाहिए। शेष उदात्तानुदात्त से भिन्न स्वरित एवं षड्ज और मध्यम को क्रम से अत्यन्त नीचे करे। अर्थात् अनामिका, कनिष्ठिका (कनगुरिया) और उसके मूल को स्पर्श करे।

'स्वरिते तूभयं क्षिपेदि'त्यस्य विवरणम्—

स्वरितं यद्भवेत्किञ्चित् सवकारोष्मकं ततः।
ह्रस्वं वा यदि वा दीर्घं निक्षेप उभयोरपि॥ ६६॥

अन्वयः—यत् किञ्चित् समवकारोष्मकं ह्रस्वं यदि वा दीर्घं स्वरितं भवेत्, ततः उभयोः अपि निक्षेपः (कार्यः)।

व्याख्या—याज्ञवल्क्यशिक्षायां स्वरप्रकरणे यदुक्तं 'स्वरिते तूभयं क्षिपेदि'-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्यनेन सर्वत्र उभयक्षेपे प्राप्ते अत्र विशेषेण नियमनं यथा 'स्वरितं यदि'ति। यत् किञ्चित् = सर्वमपि, समवकारोष्मकम् = वकार-विसर्गाभ्यां सहितं, ह्रस्वं = ह्रस्वस्वरितं, वा = अथवा, दीर्घम् = स्वरितं = स्वरितत्वयुक्तं वर्णमननुदात्तपूर्वम्, भवेत् = स्यात्, ततः = तस्माद्वर्णात् (परे विसर्गे दृष्टे) उभयोरपि = तर्जनी-कनिष्ठिकयोः अङ्गुल्योः एव, निक्षेपः = बहिस्त्यागः (कार्यः = करणीय इति यावत्)। अत्र क्रमेण ह्रस्व-दीर्घयोः उदाहरणे यथा—'देवोर्व ÷ सविता' इति ह्रस्वस्य। 'अति विश्वा ÷ परावतः' इति दीर्घस्य च।

हिन्दी—याज्ञवल्क्य शिक्षा के स्वरप्रकरण में जो यह कहा गया है कि स्वरित में सामान्य रूप से सब जगह उभय (तर्जनी तथा कनिष्ठिका) ओर क्षेप होना चाहिए। उसके विषय में विशेष विवरण के साथ आचार्य कहते हैं कि जो कुछ अर्थात् सर्वत्र वकार और विसर्ग के सहित ह्रस्व अथवा दीर्घ हो उस अक्षर से परे विसर्ग प्राप्त होने पर (दृष्टिगत होने पर) दोनों का (तर्जनी और कनिष्ठिका अंगुलियों का) निक्षेप अर्थात् अपने समूह से बाहर त्याग करना चाहिए। इन ह्रस्व और दीर्घ दोनों के उदाहरण शुक्ल यजुर्वेद के सं० १।१ तथा १२।८४ में क्रमशः प्राप्त हैं।

वकाररहिते ऊष्मासहिते स्वरितत्वविशिष्टे दीर्घे विशेषेणाह ह्रस्वे च—

स्वरिते यत्र निक्षिप्ते संयोगो वापि दृश्यते।
द्विमात्रिके क्षिपेदेकां मात्रिकं तूभयं क्षिपेत्॥ ६७॥

अन्वयः—यत्र स्वरिते निक्षिप्ते संयोगः दृश्यते अपि वा (न दृश्यते), द्विमात्रिके एकाम् क्षिपेत्। मात्रिके तु उभयं क्षिपेत्।

व्याख्या—यत्र = यस्मिन् स्थाने, स्वरिते = स्वरितवर्णे (पूर्वं समवकारोक्त्या अत्र वकाररहित-ऊष्मासहित-स्वरितत्वविशिष्टाक्षरं गृह्यते। तेन तथाविधे अक्षरे इत्यर्थः, निक्षिप्ते = स्वरितावयवानुदात्तस्योच्चारणद्वारा अधःक्षेपे सति (यदि ततोऽग्रे), संयोगो दृश्यते = अवलोक्यते (अपि वा न दृश्यते), इत्यनेन ऊष्मभेदने स्वरितगुरुत्वं न प्रयोजकं किन्तु ह्रस्व-दीर्घावेवेति। तथा हि—द्विमात्रिके = वकाररहित-सोष्मस्वरितत्वविशिष्टे दीर्घे अक्षरे, एकाम् = कनिष्ठिकामङ्गुलीं केवलाम् (अधःक्षेपे अस्या अङ्गुल्याः एव व्यवस्थाविधानात्), क्षिपेत् = प्रक्षिपेत्, त्यागं कुर्यात्। एवञ्च मात्रिके = तथाविधह्रस्वे अक्षरे तु = पुनः उभयम् = तर्जनी-कनिष्ठिके अङ्गुल्यौ

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

द्वावपि, क्षिपेत्=क्षेपं कुर्यात् (मुञ्चेत्)। यथा क्रमेणोदाहरणानि—व्वसो' ÷ प्वित्रम्' इति संयोगपरत्वाभावे। संयोगपरत्वे गुरौ यथा—'आश्श्रावयेति स्तोत्त्रिया ÷ प्रत्याश्श्रावः'। मात्रिके तूभयं यथा—'तन्म्मे मन ÷ शिवसङ्कल्पमस्तु' इति संयोगपरत्वाभावे, संयोगपरत्वे 'मूर्द्धा व्वय ÷ प्प्रजापातः' इति।

हिन्दी—वकार रहित ऊष्मा सहित स्वरितत्व विशिष्ट दीर्घ में विशेष रूप से कहा जाता है कि जहाँ पर स्वरित वर्ण के (वकार रहित विसर्ग सहित द्विमात्रिक दीर्घ) पश्चात् संयोग दृष्टिगोचर हो या न हो वहाँ कनिष्ठिका अंगुली ही छोड़ना चाहिए और यदि वह स्वर एकमात्रिक (ह्रस्व) हो तो ऐसी दशा में दोनों अंगुली (कनिष्ठा और तर्जनी) बाहर निकलती हैं।

जात्याख्यं नीचपूर्वं न्युब्जापरपर्यायं समवकारमेवोभयक्षेपे प्रयोजकमित्याहाचार्यः—

जात्ये च स्वरिते चैव वकारो यत्र दृश्यते।
कर्त्तव्यस्तूभयोः क्षेपो व्वायव्व्या इति दर्शनम् ॥ ६८ ॥
(शु० य० सं० २४।१९)

अन्वयः—च जात्ये स्वरिते च एव वकार एव दृश्यते, उभयोः क्षेपः कर्त्तव्यः व्वायव्या इति दर्शनम् (उदाहरणम्)।

व्याख्या—(यत्र = यस्मिन् स्थाने), च = पुनः, जात्ये = वक्ष्यमाणसंज्ञके न्युब्जापरपर्याये, स्वरिते=स्वरितत्वसमन्विते विसर्गसहिते वर्णे, च = यदि पुनः, एव = इति निश्चये, भिन्नक्रमो वकारस्य सुनिश्चितसूचनार्थकः, (तेन) वकार एव = निश्चयेन वकारयोगः, दृश्यते = अवलोक्यते, (तु) तत्रैव सवकार-सोष्मजात्याभिधस्वरितवर्णे। उभयोः = तर्जनी-कनिष्ठिकाङ्गुल्योः, क्षेपः = विमोकः, कर्त्तव्यः = विधेयः, न चान्यस्मिन् स्थाने, वकाररहिते सोष्मजात्यस्वरिताक्षरे 'सदस्यैः' (शु० य० सं० ७।४५) इत्यादौ। जात्यस्वीकरणेनैव वकारे संसिद्धे पुनरपि वकारग्रहणं जात्यप्रयुक्तयकारयोगस्योभयक्षेपे प्रयोजकत्वाभावं सूचयति प्रकटयति यकारयोगः स्यान्न वेति। तथा चोदाहरणं यथा—'व्वायुव्या ÷' इति। जानीयादिति।

हिन्दी—जिस स्थान पर फिर जात्य में (अपरपर्याय 'न्युब्ज' में) और स्वरित में (स्वरितत्व से युक्त विसर्ग सहित वर्ण में) सुनिश्चित रूप से वकारयोग देखा जाता है तो तर्जनी और कनिष्ठिका (कनगुरिया) अंगुलियों

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

का क्षेप करना चाहिए, अन्यत्र नहीं, इसका सुस्पष्ट उदाहरण (का) शुक्ल-यजुर्वेदसंहिता (२४।१९) में—'व्वायव्व्या' ÷ यह जानना चाहिए।

प्रक्रान्तमुभयक्षेपं लक्षयन्नाह—

श्रृङ्गवद् बालवत्सस्य कुमारीकुचयुग्मवत्।
उभक्षेपः स्वरो यत्र सविसर्गं उदाहृतः॥ ६९॥

अन्वयः—यत्र सविसर्गः स्वरः उभक्षेपः उदाहृतः, बालवत्सस्य श्रृङ्गवत् (तथा) कुमारीकुचयुग्मवत् (उभयक्षेपः कर्त्तव्यः)।

व्याख्या—यत्र=ह्रस्वे अपि च स्वरितत्वसामान्यविशिष्टे एवञ्च समवकार-जात्यविशिष्टे दीर्घे च, सविसर्गः=विसर्गेण सहितः, ऊष्मणा संयुक्तः, स्वरः =स्वरितः, उभक्षेपः=उभयोरङ्गुल्योः, क्षेपः=त्यागः। उभक्षेप इति शब्दे आर्षत्वात्—यकास्याभावः उदाहृतः=विहितः। (तत्र तर्जनी-कनिष्ठिकयोः इत्युभयोरेव मोचनं नान्ययोरिति) उदाहरणञ्चात्र दृष्टान्तरूपेण—बालवत्सस्य =अल्पवयस्कः धेनोर्वत्सस्तस्य, श्रृङ्गवत्=गोवत्सस्य मस्तकोपरि जायमान-लघु श्रृङ्गवत्=श्रृङ्गतुल्यं गोलाकारम्, क्षेपः=त्यागः कर्त्तव्यः। एतदेव पुनः दृष्टान्तान्तरेण समर्थयति—कुमारीकुचयुग्मवत्—कुमार्याः=अप्राप्तवयस्काया अत एव अविवाहितायाः, कुचयोः=स्तनयोः=चूचुकयोः, युग्मम्=द्वयमिति यावत्। मध्ये अन्तरालं दत्वा उत्पद्यते। तेन तुल्यम् उभयक्षेपः कर्त्तव्य इत्यत्रापि संयोज्यम्। अत्रायं निसृष्टार्थः—येन प्रकारेण वत्सश्रृङ्गयोः कुमारी-कुचयोर्वा मध्येऽन्तरालं भवति, तद्वत् उभयोरप्यङ्गुल्योर्मध्येऽप्यन्तरालं यथा स्यात्तथा क्षेपस्त्यागः कर्त्तव्यः।

हिन्दी—अवसर-प्राप्त तर्जनी और कनिष्ठिका अंगुलियों के उभयक्षेप के विषय में आचार्य कहते हैं कि जहाँ ह्रस्व में और स्वरितत्वसामान्यविशिष्ट सवकारजात्यविशिष्ट दीर्घ में विसर्ग सहित (सोष्म) स्वरित उभयक्षेप विहित है। वहाँ तर्जनी और कनिष्ठिका दोनों अंगुलियों का मोचन उचित है, अन्यों का नहीं। यहाँ दो उदाहरणों के द्वारा स्पष्ट किया जाता है कि जैसे गाय के बछड़े का दो सींग कुछ अन्तराल के साथ होता है तथा अप्राप्त यौवना कुमारी कन्या के दो स्तनों में अन्तराल रहता है, उसी प्रकार क्षेप करना चाहिए।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उभयक्षेपे स्वरस्थलं निष्कृष्य दर्शयति—

विसर्गान्तः स्वरो ह्रस्वः स्वरितो यत्र दृश्यते ।
दीर्घस्तु सवकारश्च तत्रोभक्षेप उच्यते ॥ ७० ॥

अन्वयः—यत्र स्वरितः ह्रस्वः विसर्गान्तः स्वरः दृश्यते तत्र उभक्षेपः उच्यते । दीर्घः तु सवकारः च ।

व्याख्या—यत्र = यस्मिन् स्थाने, स्वरितः = स्वरितत्वसामान्यसहितः, (एतेन जात्योऽपि गृहीतः), ह्रस्वः = एकमात्रिको ('एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते') गुरुभूतोऽगुरुभूतो वा निर्वकारः सवकारो वा सामान्येन अग्रे 'दीर्घस्त्विति व्यवच्छेदनादयमर्थो लभ्यते । विसर्गान्तः = ऊष्मविशिष्टः, स्वरः = अक्षरम्, दृश्यते = अवलोक्यते, तत्र = तस्मिन् स्थाने, उभक्षेपः = पूर्वप्रतिपादित-तर्जनी-कनिष्ठिकाङ्गुल्योः प्रक्षेपः, उच्यते = कथ्यते । दीर्घः = तादृशः स्वरः, तु = पुनः, सवकारः = वकारेण सहितश्चेत् तदा, च = पूर्वोक्त-प्रकारेणैवोभयक्षेपयोग्यो भवति । अत्र वैशिष्ट्यं विद्यते यत्—जात्योऽजात्यो वा गुरुभूतोऽगुरुभूतो वेति सर्वमेव गृहीतम् ।

हिन्दी—यहाँ उभयक्षेप में स्वरस्थल को निचोड़कर प्रदर्शित किया जाता है—जहाँ स्वरितत्व के सामान्यरूप से युक्त हो, इससे जात्य का भी ग्रहण किया गया है । ह्रस्व वह चाहे गुरुभूत हो अथवा अगुरुभूत या निर्वकार हो अथवा सवकार, जहाँ ऊष्मविशिष्ट स्वर दिखाई दे या प्राप्त हो वहाँ उभक्षेप होना कहा गया है। उसी प्रकार दीर्घ स्वर भी वकार के सहित हो तो उभयक्षेप के योग्य होता है ।

कतिविधा ऊष्मा भवति, तासां प्रचितादीनां कुत्र कुत्रोपयोगः—

त्रिविधा तु भवेदूष्मा प्रचिता बलका तरा ।
स्वरिते प्रचितां विद्यान् निपाते बलकां विदुः ॥ ७१ ॥
उत्थाने तु तथा तारामेताभिस्त्रिभिरूष्मभिः ।
मात्रामादौ विदित्वा तु ततः क्षेपं प्रयोजयेत् ॥ ७२ ॥

अन्वयः—तु ऊष्मा प्रचिता बलका तरा त्रिविधा भवेत्, स्वरिते प्रचितां विद्यात्, निपाते बलकां विदुः, तु उत्थाने तारां (तरां) तथा (विदुः) । तु एताभिः त्रिभिः ऊष्मभिः आदौ मात्रां विदित्वा ततः क्षेपं प्रयोजयेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—तु=पुनश्च, ऊष्मा=विसर्गः, (१) प्रचिता, (२) बलका, (३) तरा इति नामतः, त्रिविधा=त्रिप्रकारकः, भवेत्=स्यात्, भवति वा। कस्मिन् स्थाने कस्याः उपयोग इति जिज्ञासायामाह—स्वरिते=ह्रस्वे, सवकारे दीर्घे स्थितेऽपि स्वरितसामान्यविशिष्टेऽव्यवहितपूर्वे सति, प्रचिताम्=एतन्नामिकां, विद्यात्=बुध्येत, निपाते=अनुदात्ते, जात्य-प्रचयाद्यन्यतम-स्वरितसामान्यविशिष्टवकाररहितदीर्घे चाऽव्यवहितपूर्वे सति, बलकाम्=एतन्नाम्नीं, विदुः=विदन्ति विद्वांसः। तु=पुनः, उत्थाने=उदात्ते स्वरेऽव्यवहितपूर्वे सति, तारां=तरा एव तारा ताम्=तन्नाम्नीम्, तथा=तथा-स्वरूपाः वेदविदो विद्वांसः जानन्ति। तु=पुनश्च, एताभिः=प्रचितादिभिः, आर्षत्वात् त्रिभिरित्यत्र पुंस्त्वं, वस्तुतः त्रिविधाभिरिति, ऊष्मभिः=विसर्गैः उपलक्षिते वर्णे, आदौ=प्राथम्येन, मात्राम्=उभयक्षेपप्रयोजिकां ह्रस्व-दीर्घान्यतरां वकारघटितामघटितां वा, विदित्वा=ज्ञात्वा, ततः=क्षेप-प्रयोजकस्वरज्ञानानन्तरम्, क्षेपम्=उभयप्रकारकं क्षेपम्, प्रयोजयेत्=हस्त-विक्षेपं कुर्यात्।

हिन्दी—ऊष्मा के कितने भेद हैं तथा उनका कहाँ-कहाँ उपयोग होता है? इस प्रश्न की जिज्ञासा में आचार्य कहते हैं कि—ऊष्मा (विसर्ग) के तीन भेद होते हैं—प्रचिता, बलका तथा तरा। उनमें स्वरित (ह्रस्व) वकार-सहित दीर्घ रहने पर भी स्वरित-सामान्य के अव्यवहित पूर्व होने पर 'प्रचिता' जानना चाहिए। निपात (अनुदात्त) में जात्य तथा प्रचय में अन्यतम स्वरित-सामान्यविशिष्ट वकार रहित दीर्घ में अव्यवहित पूर्व में रहने पर 'बलका' को जाने एवं उत्थान (उदात्त) में स्वर के अव्यवहित पूर्व होने पर उसे 'तारा' या 'तरा' नाम की ऊष्मा जानते हैं। इन प्रचितादि तीनों ऊष्माओं (विसर्गों) को उपलक्षित वर्ण में जानकर प्राथमिकता के साथ उभयक्षेप का प्रयोग करे।

ऊष्मणः (विसर्गस्य) स्वरूपभेदाः—

अक्षरं भजते काचित् काचिद् द्वित्वे प्रतिष्ठिता।
समानजातिका काचित् काचिदूष्मप्रदायिनी॥ ७३॥

अन्वयः—काचित् (ऊष्मा=विसर्गः) अक्षरं भजते, काचिद् (ऊष्मा) द्वित्वे प्रतिष्ठिता, काचिदूष्मा समानजातिका (बोध्या), काचिदूष्मा ऊष्म-प्रदायिनी (ज्ञेया)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—ऊष्मणः स्वरूपभेदाः यथा—काचित् = कापि, ऊष्मा = विसर्गः, अक्षरम् = वर्णमोत्वं श-प-स-रेफान्यतमत्वं च, भजते = सेवते (भज् सेवायाम्) प्राप्नोति वा। अत्रोदाहरणानि बहूनि क्रमशः सन्ति; यथा—'कुक्कुटोसि', 'देवो व॥', 'प्रजापतिश्छन्दः', 'अग्नेष्ट्वा' इत्येवमादयोऽक्षरप्रदेशाः भवन्ति। काचिद् = ऊष्मा, द्वित्वे = जिह्वामूलीयोपध्मानीयत्वयोः, प्रतिष्ठिता = तत्स्वरूपं प्राप्ता, ज्ञेयेति शेषः। विसर्गापेक्षया अनयोरुच्चारणे द्वैगुण्यात् द्वित्वोपपत्तिः। काचिद् = ऊष्मा, समानजातिका = विवृत्तितां गता (जानीयादिति), काचिद् = ऊष्मा = विसर्गः, ऊष्मप्रदायिनी—ऊष्माणं = अन्तर्वायुं, प्रददाति = बहिर्विमुच्य प्रकटयति, इत्यूष्मप्रदायिनी। इत्थमन्वर्थत्वात् विसर्गस्य स्वरूपमेव पर्यवसितं भवति, विसर्गस्वरूपा इति यावत्। यथा—'आशुः शिशानो' इत्यादयो विसर्गप्रदेशाः भवन्ति।

हिन्दी—ऊष्मा (विसर्ग) के अनेक स्वरूप होते हैं—कोई ऊष्मा अक्षर का सेवन करती है, कोई (ऊष्मा) जिह्वामूलीय और उपध्मानीय द्वित्व रूप से उस स्वरूप को प्राप्त करती है। विसर्ग की अपेक्षा इन दोनों के उच्चारण में द्वैगुण्य होने से द्वित्व है। कोई ऊष्मा विवृत्ति को प्राप्त करती है और कोई ऊष्मा अन्तर्वायु को देती हुई बाहर छोड़कर प्रकट होती है। अन्वर्थ होने के कारण विसर्ग के स्वरूप में पर्यवसित होती है।

ऊष्मणः उच्चारणानुसारेण उष्णप्रदायित्वं प्रकटयति आचार्यः—

यथा बालस्य सर्पस्य निःश्वासो लघुचेतसः।
एवमूष्मा प्रयोक्तव्या हकारपरिवर्जिता ॥ ७४ ॥

अन्वयः—लघुचेतसः बालस्य सर्पस्य निःश्वासः (यथा श्रूयते) एवम् हकारेण परिवर्जिता ऊष्मा प्रयोक्तव्या।

व्याख्या—लघुचेतसः = स्वल्पसत्त्वस्य, बालस्य = अप्राप्तयौवनस्य, भाषायां 'पोवा' इति ख्यातस्य, सर्पस्य = नागस्य, सरीसृपस्य, निःश्वासः = मुखान्निर्गतस्वल्पवायुवेगस्य (यथा = येन प्रकारेण) (श्रूयते = आकर्ण्यते शृणोति वा), एवम् = अनेन प्रकारेण तादृशेन वा, ऊष्मा = विसर्गः, प्रयोक्तव्या = समुच्चारणीया। नन्वत्र शङ्कते यत्—तस्य निःश्वासो हकारसदृशत्वेनावभासते तत् किमत्र कारणम्? ऊष्मणः = विसर्गस्योच्चारणं हकारत्वेन करणीयमित्यादिशत्याचार्यः। हकारपरिवर्जिता—हकारेण = हकारवर्णेन, परि-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

वर्जिता = परित्यक्ता, रहिता, प्रयोक्तव्या = व्यवहर्त्तव्येति । हकारवर्णत्वेन सा न स्वीकरणीया किञ्च तत्समाना ऊष्मश्रुतिर्यथा भवेत्तथा श्रावणीयेत्यर्थः । तथा चोदाहरणानि यथा–'देवो वः सविता' अत्र हकारसदृशो भवेत् । 'देवी ७. । तिस्रो' अत्र विसर्गस्तु हिकारसदृशो भवेत् । 'आखुस्ते पशुः' इत्यादौ हुकार-सदृशो भवेत् । एतादृशान्यन्यान्यप्युदाहरणान्यनेकानि सन्ति । विशेषतस्तु— 'हकारो नैव मन्तव्य इति शास्त्रव्यवस्थितिः । फणिनिःश्वाससदृशो विसर्गो भवति ध्रुवम्' ।। (ल० मा० शि० १८–२२) इत्यादौ ध्येयमिति ।

हिन्दी—ऊष्मा (विसर्ग) के उच्चारण के अनुसार उसके ऊष्मप्रदायित्व के विषय में आचार्य कहते हैं—जिस प्रकार स्वल्पशक्तियुक्त अतएव कमजोर सर्प के बच्चे (पोवा) का श्वास-प्रश्वास निकलता है, जैसा कि सुना जाता है, उसी प्रकार ऊष्मा (विसर्ग) का प्रयोग हकार को छोड़कर करना चाहिए । कहने का आशय यह है कि—ऊष्मा को अर्थात् विसर्ग को 'हकार' नहीं मानना चाहिए । अधिकांश लोग अज्ञानता के कारण विसर्ग को 'ह' समझते हैं जो समुचित नहीं है ।

अथोष्माणं समानजातिकामाहुः आचार्याः—

विवृत्तिप्रत्ययामूष्मां प्रवदन्ति मनीषिणः ।
तामेव प्रतिषेधन्ति आ-ई-ऊ-एनिदर्शनम् ।। ७५ ।।

अन्वयः—मनीषिणः ऊष्माम् विवृत्तिप्रत्ययां प्रवदन्ति । (कुत्रेति जिज्ञासायाम्) आ-ई-ऊ-ए-निदर्शनम्, (अत्र) ताम् एव प्रतिषेधन्ति ।

व्याख्या—मनीषिणः = वैदिकविद्वांसः, ऊष्माम् = विसर्गसमानश्रेणीकां, विवृत्तिप्रत्ययाम् = विवृत्या प्रतीयते इति प्रत्यया ताम्, प्रत्ययानां सहैवोच्चारणं कुर्वन्ति, ते तामूष्माणं समानजातिकां स्वीकारे प्रतिक्षेपं कुर्वन्ति, ते कदापि विसर्गं हकाररूपेण न स्वीकुर्वन्ति । प्रवदन्ति = प्रकर्षेण वदन्ति = कथयन्ति, माध्यमिकान्तरालरूपेण उच्चरन्ति । कुत्र = कस्मिन् स्थाने इति जिज्ञासायां— 'आ-ई-ऊ-ए' इति निदर्शनम् = उदाहरणमेतत् स्वरमात्रोपलक्षकम् । एतेन ह्रस्वे स्वरे परे वक्ष्यमाणायाः वत्सानुसारिण्याः विवृत्तेः 'वत्सानुसारिणी चादौ दीर्घा 'ताऽअस्य दर्शनम्' इति निदर्शनं सङ्गच्छते । अत्रोदाहरणं यथा—'गोजाऽ-ऋतजा' इत्यादावूह्यम् । (अत्र = अस्मिन् स्थाने) ताम् एव = तथोक्ताम् एव, समानजातीयत्वेन प्राप्तां हकारसमानोच्चार्यमाणताम् एव, प्रतिषेधन्ति =

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

निषेधं कुर्वन्ति। विवृत्ति हकारसदृशामुच्चारयितुं न च स्वीकारं कुर्वन्ति, अङ्गीकुर्वन्ति किन्तु माध्यमिकान्तरालरूपेणैव मानं मन्वते इति भावः। अत्र कानिचिदुदाहरणानि यथा—'यऽआ॑त्क्मु॒दा' (सं० २५।१३), 'यऽईशे' (२३।३), 'कया॒ त्वन्नऽऊत्या' (३६।७), पुरुषऽए॒वे' (३१।२)। स्वरमात्रे यथा—'आन॒ऽइन्द्रो' (२०।४८), 'इ॒माऽउ॑त्वा' (३३।८१), 'यऽओज॑सा' (७।४०) इत्येतानि सन्ति।

इति श्रीमहर्षियाज्ञवल्क्यविरचितायां शिक्षायां स्वरप्रकरणे क्षोपाह्व-
डॉ० नरेशशास्त्रिकृतायां 'शान्ति'-व्याख्यायां हस्तचालनविध्यधिकारः।

हिन्दी—ऊष्मा (विसर्ग) के सम्बन्ध में विशेष विचार करते हुए आचार्य कहते हैं कि—वैदिक विद्वान् ऊष्मा (विसर्ग) को विवृत्तिप्रत्यया अर्थात् विवृत्ति से प्रतीत होने वाला ऐसा मानते हैं। यह कहाँ होता है ? इस जिज्ञासा में कहते हैं कि आ, ई, ऊ और ए—ये निदर्शन (उदाहरण) हैं और ये स्वर-मात्र के उपलक्षक हैं। उससे ह्रस्व स्वर के परे कथ्यमान वत्सानुसारिणी जो विवृत्ति है उसका निदर्शन होता है।

यहाँ उस समानजातीयत्व में प्राप्त हकार के समान उच्चार्यमाणता को ही निवारण करते हैं, रोकते हैं अर्थात् विवृत्ति को हकार सदृश उच्चारण करने को नहीं स्वीकार करते हैं, किन्तु माध्यमिक अन्तराल के रूप से ही मानते हैं। उदाहरण संस्कृत व्याख्या में प्रस्तुत हैं।

अथ स्वरसंहिता-विधिः

कतिविधाः स्वरित(स्वर)भेदाः, के च ते, कानि च लक्षणानि—

अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम्।
जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टश्च तथाऽपरः॥ ७६॥
तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः।
पादवृत्तो भवेत्तद्वत् ताथाभाव्य इति स्वराः॥ ७७॥

अन्वयः—(अहम्) अष्टौ स्वरान् प्रवक्ष्यामि, तु तेषाम् एव हि लक्षणम् (च वर्णयामि)। (के ते स्वराः) (१) जात्यः, (२) अभिनिहितः, (३) क्षैप्रः, (४) तथा च अपरः प्रश्लिष्टः च, (५) तैरोव्यञ्जनसंज्ञः, (६) तैरोविरामकः, तद्वत् (७) पादवृत्तः भवेत्, (तथा च) (८) ताथाभाव्यः (इति अष्टौ) स्वराः (ज्ञेयाः) इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—(अहं याज्ञवल्क्य इति क्रियया आक्षेपः) अष्टौ = अष्टसंख्यकान्, स्वरान् = स्वरितान्, प्रवक्ष्यामि = जात्यादिरूपेण कथयिष्यामि वर्णयामि वा, तु = पुनः, तेषां = जात्याद्यष्टविधस्वराणाम्, एव = हि, लक्षणम् = स्वरूपं (च वर्णयामि = वर्णनं करोमि)। तथा च ते—जात्यः, अभिनिहितः, क्षैप्रः, तथा च अपरः = अन्यश्चतुर्थः प्रश्लिष्टः, च = पुनः, तैरोव्यञ्जनसंज्ञः, तैरोविरामकः, तथा = तद्वत्, पादवृत्तः, भवेत् = स्यात्, तथा चाष्टमः ताथाभाव्यः, इति अष्टसंख्यकाः, स्वराः = स्वरितभेदाः ज्ञेया इति।

हिन्दी—स्वरित (स्वर) के कितने भेद होते हैं, वे कौन-कौन हैं और उनके लक्षण क्या हैं ? इस विषय में मुनिवर याज्ञवल्क्य कहते हैं कि—आठ प्रकार के स्वरों के भेद कह रहा हूँ और उनके लक्षण भी कहूँगा, वे भेद हैं—(१) जात्य, (२) अभिनिहित, (३) क्षैप्र, (४) प्रश्लिष्ट, (५) तैरोव्यञ्जनसंज्ञ, (६) तैरोविरामक, (७) पादवृत्त और (८) ताथाभाव्य। इस प्रकार स्वरों (स्वरितों) के आठ भेद होते हैं। अब प्रसंग प्राप्त उनके लक्षण तथा उदाहरण क्रमशः कहूँगा।

तेषां स्वराणामुदाहरणसहितानि लक्षणानि यथा—

एकपदे नीचपूर्वः सयवो जात्य इष्यते।
अपूर्वोऽपि परस्तद्वत् 'धान्यं-सुप्ष्वा-स्वरित्यपि ॥ ७८ ॥

अन्वयः—एकपदे नीचपूर्वः सयवः जात्यः इष्यते (आचार्यैः), तद्वत् अपूर्वः अपि परः (जात्य इष्यते)। (यथा) 'धान्यं-सुप्ष्वा-स्वर् इति अपि।

व्याख्या—उपर्युक्तस्वराणां सोदाहरणानि लक्षणानि यथा—एकपदे = समानपदे, नीचपूर्वः = नीचः पूर्वो यस्य, अनुदात्तात् पर इति, सयवः = यकार-वकारान्यतरयुतः (स्वरितः), जात्यः = एतन्नामकः, इष्यते = कथ्यते (आचार्यैरिति), तद्वत् = तेनैव प्रकारेण (यकार-वकारान्यतरसहिते एकपदे इत्यर्थः), अपूर्वः = नास्ति पूर्वो यस्मात् सः, अपि = पुनः (अविद्यमानपूर्वः स्वरित इत्यर्थः), परः = अन्यः, जात्यः इष्यते। यथा = येन प्रकारेण, लक्षणे एवोदाहरणानि वर्णितानि सन्ति—धान्यं = 'धान्यमसि' (य० सं० १।२०)

इति नीचपूर्वः सयवस्स्वरितः। सुष्वा = सुप्ष्वा कामधुक्षे (तत्रैव १।२)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

इति सवकारः नीचपूर्वः स्वरितः। अपूर्वो यथा—'स्वर्द्दवेषु' (तत्रैव १८।६४) एतान्युदाहरणानि तत्तत्स्थानीयानि सन्ति।

हिन्दी—अब उपर्युक्त आठ स्वरों के सोदाहरण लक्षण कहते हैं—जब एक ही पद में अर्थात् समान पद में अनुदात्त से परे यकार अथवा वकार के सहित स्वरित को आचार्यों ने जात्य नाम से कहा है। अर्थात् यकार या वकार सहित एक पद में और पूर्व में यदि कोई स्वर विद्यमान नहीं हो तो ऐसा स्वरित अन्य जात्य कहलाता है। जैसे इसका उदाहरण है—'धान्यमसि', यह नीचपूर्व सयकार स्वरित है। 'सुप्प्वा कामधुक्षः' में सवकार नीचपूर्व स्वरित है एवं अपूर्व का उदाहरण—'स्वर्द्दवेषु' है। इस प्रकार जात्य स्वर के लक्षण तथा विभिन्न उदाहरण एक साथ आचार्यों ने प्रतिपादित किया है।

अभिनिहित-क्षैप्रस्वरयोर्लक्षणे—

ए-ओ आभ्यामुदात्ताभ्यामकारो निहतश्च यः।
स च यत्र प्रलुप्येत तं चाभिनिहितं विदुः॥ ७९॥
इ-उवर्णौ यदोदात्तावापद्येते यवौ क्वचित्।
अनुदात्ते परे नित्यं विद्यात् क्षैप्रस्य लक्षणम्॥ ८०॥

अन्वयः—उदात्ताभ्याम् ए-ओ आभ्यां यः निहतः अकारः (भवेत्) स च यत्र प्रलुप्येत तं च अभिनिहितं विदुः। आचार्या इत्युपरिष्टाद्योजनीयम्।

उदात्तौ इ-उवर्णौ यदा अनुदात्ते परे यवौ आपद्येते (तदा) नित्यं क्षैप्रस्य लक्षणं विद्यात्।

व्याख्या—उदात्ताभ्याम्=उदात्तश्च उदात्तश्च ताभ्याम्, ए ओ आभ्याम्=एताभ्याम्, उदात्तत्वगुणविशिष्टाभ्यामेकारौकाराभ्यां पर इत्यर्थः। यः, निहतः=अनुदात्तत्वविशिष्टः, अकारः, भवेदिति शेषः, स च=तादृशः अकारः, यत्र=यस्मिन् स्थाने एकारौकारान्यतरस्मिन्, प्रलुप्येत=पूर्वरूपवद्भावेन विलीयेत, तं च=एकारौकारान्यतरमेव, अभिनिहितम्=एतन्नामकं द्वितीयं स्वरितभेदम्, विदुः=जानन्ति विद्वांसः। उदाहरणानि यथा—'ते+अप्प्सरसाम्'=तेप्प्सरसाम् इत्यत्र, ओकारे यथा—'व्वेद, असि'=व्वेदोसि इत्यत्र सोपधविसर्गस्य अकारे चेति ओत्वे च॥ ७९॥

उदात्तौ=उदात्तत्वगुणसहितौ, इ-उवर्णौ=इकारोकारश्च, यदा=यस्मिन् काले, क्वचित्=कुत्रचित्, अनुदात्ते=अनुदात्तत्वविशिष्टेऽसवर्णे स्वरे परे, यवौ=क्रमशः यकारं वकारं च, आपद्येते=प्राप्नुतः, तदा=

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

तस्मिन् काले, नित्यम् = अनिवार्यरूपेण, क्षैप्रस्य = तृतीयस्वरितभेदस्य, लक्षणम् स्वरूपं, विद्यात् = जानीयात् । इवर्णस्योदाहरणं यथा—'त्रि + अ॒म्ब॒क॒म् = त्र्यम्बकम् । उवर्णस्य यथा — 'द्रु + अन्नं + द्वन्नः इति ।

हिन्दी — उदात्तत्व गुण से सहित जो एकार-ओकार, उससे परे जो अनुदात्तत्वविशिष्ट अकार हो और वह तादृश जो अकार जहाँ एकार-ओकार एक दूसरे में पूर्वरूप की तरह विलीन हो जाय तो एकार-ओकार में एक 'अभिनिहित' नाम का दूसरा स्वरितभेद होता है ।

उदात्तत्वविशिष्ट इकार तथा उकार जब कहीं अनुदात्तत्वविशिष्ट असवर्ण स्वर के परे यकार और वकार आ जाय तब निश्चित रूप से 'क्षैप्र' नाम का तृतीय स्वरितभेद होता है। ऐसा लक्षण जानें । इवर्ण जैसे— 'त्रि + अम्बकम् = त्र्यम्बकम्, उवर्ण का — 'द्रु + अन्न = द्वन्नं इति ।

चतुर्थभेदस्य स्वरितस्य प्रश्लिष्टस्य लक्षणोदाहरणे—

इकारो यत्र दृश्येत इकारेणैव संयुतः ।
उदात्तश्चानुदात्तेन प्रश्लिष्टो भवति स्वरः ॥ ८१ ॥

अन्वयः—उदात्तः इकारः अनुदात्तेन इकारेण एव च संयुतः यत्र दृश्येत (तदा) स्वरः प्रश्लिष्टः भवति ।

व्याख्या — उदात्तः = उदात्तत्वविशिष्टः, इकारः = इवर्णः, अनुदात्तेन अनुदात्तत्वविशिष्टेन, इकारेण = इवर्णेन, एव = निश्चयेन, च = पुनः, संयुतः = दीर्घीभावेन सहितः, यत्र = यस्मिन् स्थाने, दृश्येत = दृष्टिपथं भवेत्, तदा = तत्समये, स्वरः = सन्धिना निष्पन्नः, स्वरितः = स्वरः, प्रश्लिष्टः=एतन्नामकः, चतुर्थः स्वरितभेदकः, भवति = जायते । अत्रोदाहरणं यथा — अ॒भि + इ॒न्ध॒ता॒म् इत्यत्र सवर्णदीर्घीभूतः सिठं० सवर्णे दीर्घम् इति जायमानः ईकारः उदात्तः वानुदात्तः इत्यपोद्य 'इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तपरꣳ स्वरितम्' इति स्वरितः सन् इवर्णं उभयतो ह्रस्वः प्रश्लिष्टः (शु० य० प्रा० १।११६) ।

हिन्दी—स्वरित के चतुर्थ भेद प्रश्लिष्ट के लक्षण-उदाहरण—उदात्तत्व गुण से युत इकार अनुदात्तत्वगुणविशिष्ट इकार (इवर्ण) के साथ यदि संयुत होकर दीर्घीभाव में दिखाई दे तो सन्धि से उत्पन्न स्वरित (स्वर) का चतुर्थ भेद 'प्रश्लिट' होता है । जैसे — 'अभि + इन्धताम्' यहाँ सवर्णदीर्घीभूत— 'सिठं० सवर्णे दीर्घम्' इससे उत्पन्न ईकार 'उदात्तः वानुदात्तः' 'इवर्णमुभयतो ह्रस्वमुदात्तपूर्वमनुदात्तपरꣳ स्वरितम्' इससे स्वरित होकर इवर्ण उभयतो ह्रस्वः

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

प्रश्लिष्टः' (शु० य० प्रा० ४।१३३) इससे प्रश्लिष्टसंज्ञक होता है। यहाँ किसी पुस्तक के मूल में 'यकारो दृश्यते यत्र' पाठ है, वहाँ अर्थ होगा—उदात्त व अनुदात्त मिलकर (दोनों के योग से) जहाँ यकार स्वर देखा जाता है वहाँ प्रश्लिष्ट स्वर होता है।

स्वरितस्य पञ्चम-षष्ठभेदयोः तैरोव्यञ्जन-तैरोविरामयोर्लक्षणोदाहरणे—

उदात्तपूर्वः स्वरितो व्यञ्जनेन युतो यदि।
एष सर्वो बहुस्वारस्तैरोव्यञ्जन उच्यते ॥ ८२ ॥
अवग्रहात् परो यस्तु स्वरितः स्यादनन्तरः।
तैरोविरामं तं व्विद्यादुदात्तो यद्यवग्रहः ॥ ८३ ॥

अन्वयः—यदि व्यञ्जनेन युतः स्वरितः उदात्तपूर्वः (भवेत्) एषः बहुस्वारः सर्वः तैरोव्यञ्जन उच्यते ॥ ८२ ॥

यः तु स्वरितः अवग्रहात् अनन्तरः परः यः तु स्वरितः स्यात् (स च) अवग्रहः (यदि चेत्) उदात्तः (भवेत्) (तदा) तं तैरोविरामं विद्यात् ॥ ८३ ॥

व्याख्या—यदि = चेत्, व्यञ्जनेन=व्यञ्जनवर्णेन—स्पर्शादिवर्णेन (कादयो भावसानाः स्पर्शाः), युतः = सहितः, स्वरितः = स्वरितत्वगुणविशिष्टो वर्णः, उदात्तपूर्वः = उदात्तः पूर्वो यस्मात् स उदात्तपूर्वः = उदात्तात् परो भवेदित्यर्थः, तथा चोक्तं प्रातिशाख्ये—'उदात्तादयः परे (अभिनिहितप्रभृतयः) सप्त', एषः बहुस्वारः—बहवः = अनेके, स्वराः = स्वरिताः, यस्मिन् पदसमूहे सः, बहुस्वरितविशिष्टः, सर्वः पदसमूहः = पदानां समूहः अखिलः, तैरोव्यञ्जनः—तिरः = नीचत्वेनान्तर्हितो व्यज्यते इति तिरोव्यञ्जनः, स एव तैरोव्यञ्जनः; उच्यते = कथ्यते। तथा च निष्कर्षश्चात्र—स्वरितान्तोदात्तादि शब्दसमूहे स्वरितानां निघातेनान्तर्धानात् तैरोव्यञ्जनता। अत्र कानिचिदुदाहरणानि यथा—इडे' + रन्ते' + हव्ये + काम्ये + चन्द्रे + ज्योते' + अदिति + सरस्वति + महि + विश्रुति = 'इडे रन्ते हव्ये काम्ये चन्द्रे ज्योतेदिति सरस्वति महि व्विश्रुति' ॥ ८२ ॥

यः, तु = च, स्वरितः = स्वरः, अवग्रहात् = पञ्चविध-कृत्तद्धितादि-वृत्तिप्रदर्शनाय कृतात् विच्छेदात्, अनन्तरः = व्यवधानरहितः, यः, तु = च, स्वरितः, स्यात् = भवेत्, दृश्येत (स च) अवग्रहः = छिन्नस्य वृत्तिपूर्वखण्डस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विरामात्मकः, (यदि चेत्) उदात्तः = उदात्तत्वविशिष्टः (भवेत्तदा), तम् = उदात्तावग्रहात् परं स्वरितम्, तैरोविरामः—तिरः = तिर्यग्, विरम्यते उदात्तः अनेनेति तिरोविरामः, स एव तैरोविरामः तं षष्ठं भेदम्, विद्यात् = जानीयादिति । अत्रोदाहरणं यथा—'गोपंतुाविति्गो । पंतौ' इत्यत्र द्वितीयावृत्तौ यो गकारोत्तरः ओकारः उदात्तावग्रहः, तस्मात् परो यः पकारोत्तरवर्त्ती स्वरितोऽकारः स तैरोविरामसंज्ञको भवति ।

हिन्दी—स्वरित (स्वर) के पञ्चम तथा षष्ठ भेद वाले तैरोव्यञ्जन तथा तैरोविराम के लक्षण तथा उदाहरण के प्रसंग में आचार्य कहते हैं कि—यदि व्यञ्जन वर्ण अर्थात् स्पर्शादि (क से म तक) वर्ण के सहित स्वरितगुणविशिष्ट वर्ण उदात्त है पूर्व जिससे (अर्थात् उदात्त से परे हो) ऐसा जो अनेक स्वर वाला पदसमूह है वह तैरोव्यञ्जन नाम का पाँचवाँ स्वरित भेद कहलाता है । निष्कर्ष यह हुआ कि स्वरितान्त उदात्तादि शब्दसमूह में स्वरितों के विघात से अन्तर्धा होना तैरोव्यञ्जन है । उदाहरण संस्कृत व्याख्या से अवगत करें ॥ ८२ ॥

और जो कि स्वरित कृत्तद्धित आदि पाँच अवग्रह से (वृत्तिप्रदर्शन के लिए किये गये विच्छेद से) व्यवधान रहित जो स्वरित हो या दिखाई दे और वह अवग्रह यदि उदात्त हो तो उस उदात्त अवग्रह से परे जो स्वरित वह जो तिरछा जिससे विरमित हो, ऐसा तैरोविराम नाम का छठा स्वरित जानना चाहिए । जैसे—'गोपंतुाविति्गो । पंतौ' आदि में द्वितीयावृत्ति में जो गकारोत्तर ओकार उदात्त अवग्रह है, उससे परे जो पकारोत्तरवर्त्ती स्वरित अकार वह तैरोविरामसंज्ञक छठा स्वरित होता है ।

स्वरितस्य सप्तमाष्टमभेदयोः पादवृत्त-ताथाभाव्ययोर्लक्षणोदाहरणे—

स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते ।
पादवृत्तो भवेत् स्वारः 'श्वित्रऽआदित्य' दर्शनम् ॥ ८४ ॥
उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः ।
ताथाभाव्यो भवेत् स्वारस् 'तनू-नप्त्रे' निदर्शनम् ॥ ८५ ॥

अन्वयः—च यत्र स्वरिते स्वरे (परे सति) विवृत्तिः दृश्यते (तदा) स्वारः पादवृत्तो भवेत् । यथा 'श्वित्रऽआदित्य' दर्शनम् (ज्ञेयम्) ॥ ८४ ॥

उदात्ताक्षरयोर्मध्ये (यदि) नीचः अवग्रहः भवेत् (तदा) स्वारः 'ताथाभाव्यः' भवेत् । 'तनू-नप्त्रे' निदर्शनं (भवति) ॥ ८५ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—च=पुनः, यत्र=यस्मिन् स्थाने, स्वरिते=स्वरितत्वगुण-विशिष्टे, स्वरे=अकारादौ स्वरवर्णे (अचः स्वराः) (परे सति), विवृत्तिः =स्वरयोर्मध्ये सन्ध्यभावलक्षणा, दृश्यते=अवलोक्यते भवति वा, (तदा) स्वारः=स्वरितत्वविशिष्टो वर्णः; पादवृत्तः=पदस्यायं विरामो विवृत्तिलक्षणः, पादः तेन सह वृत्यते=विभज्यते (संहिता) इति पादवृत्तः इति नामकः स्वरितस्य सप्तमो भेदः, भवेत्=भूयात् भवति वा। यथोक्तं नारदीयशिक्षायां—'स्वरे चेत् स्वरितं यत्र विवृता यत्र संहिता। एतत् पादान्तवृत्तस्य लक्षणं शास्त्रचोदितम्' ॥ अत्रोदाहरणं यथा—'श्चित्रऽआदित्यानाम्' इति ज्ञेयम् ॥८४॥

उदात्ताक्षरयोर्मध्ये, तु=यदि, नीचः=अनुदात्तत्वविशिष्टाक्षरः (नीचै-रनुदात्तः), अवग्रहः=वृत्तिच्छेदलक्षणो विरामः, भवेत्=स्यात् (तदा), स्वारः=स्वरितः, ताथाभाव्यः=तथाभाव एव ताथाभाव्यम्, तदस्यास्तीति ताथाभाव्यः, एतन्नामकोऽष्टमो भेदः, भवेत्=भूयात् भवति वा। (यतः) 'उदात्ताच्चानुदात्तꣳस्वरितमि'ति 'निहितमुदात्तस्वरितम्' (य० प्रा० ४।१३५–१३६) इति तु 'अनवग्रहे' (तत्रैव ४।१३७) इत्युत्तरेण सूत्रेण पर्युदस्तम्। उदाहरणञ्चात्र—'तनू-नप्त्रे' इति। माध्यन्दिनानां तु 'तनू नप्त्रऽइति तनू। नप्त्रे' इत्यत्र द्विरावृत्तस्य तनूशब्दस्थस्य अवगृहीतस्य 'नु'-कारस्य उदात्तात् परत्वेन प्राप्तं स्वरितमपोद्य उदात्ते परे निहितमेव ॥ ८५ ॥

हिन्दी—स्वरित के सप्तम और अष्टम भेद वाले पादवृत्त तथा ताथाभाव्य का लक्षण-उदाहरण आचार्य कहते हैं—और जहाँ स्वरितत्वगुणविशिष्ट स्वर में—उसके पर होने पर (जहाँ) विवृत्ति (स्वरों के मध्य में सन्धि का अभाव लक्षण) दिखाई दे अथवा हो तब स्वरितत्ववर्णविशिष्ट पादवृत्त नाम का स्वरित का सातवाँ भेद होता है। पादवृत्त का शाब्दिक अर्थ होगा—पद का जो यह विराम विवृत्तिलक्षण—पाद, उसके साथ विभक्त होने वाली संहिता, वही पादवृत्त कहलाता है। उदाहरण—'श्चित्रऽआदित्यानाम्' यह जानना चाहिए ॥ ८४ ॥

और उदात्त अक्षरों के बीच में यदि नीच (अनुदात्त) अवग्रह (ऽ) हो तब स्वरित 'ताथाभाव्य' नाम का आठवाँ भेद होता है। तथाभाव ही ताथाभाव्य होता है, वह हो जहाँ वहाँ ताथाभाव्य होता है। उदाहरण है—'तनू-नप्त्रे', माध्यन्दिनों का तो 'तनू नप्त्रऽ इति तनू। नप्त्रे' यह उदाहरण होगा। विशेष—संस्कृत व्याख्या से ज्ञात करें।

CC-0. National Archives Kathmandu Collection

माध्यन्दिनविरुद्धत्वात् स्वरितो न ताथाभाव्यः, व्यञ्जनव्यवधानेऽपि संहितायां स्वरितविधिं तदपवादश्च यथा—

माध्यन्दिनविरोधी स्यात् ताथाभाव्यस्तु यः स्वरः ।
स्वरौ चैवात्र दृश्येते भिन्नोदात्तानुदात्तकौ ॥ ८६ ॥
उदात्तान्निहितः स्वारः स्वरितात् प्रचयो भवेत् ।
उदात्तात्स्वरितात्पूर्वो नान्यमापद्यते स्वरम् ॥ ८७ ॥

अन्वयः—तु ताथाभाव्यः यः स्वरः स्यात् (तर्हि) माध्यन्दिनविरोधी स्यात्, (यतः) अत्र भिन्नोदात्तानुदात्तकौ एव स्वरौ दृश्येते ॥ ८६ ॥

उदात्तात् निहितः स्वारः, स्वरितात् प्रचयः भवेत्, (यदि) उदात्तात् स्वरितात् (वा) वा पूर्वः (तदा) अन्यं स्वरं न आपद्यते ॥ ८७ ॥

व्याख्या—तु=यदि, ताथाभाव्यः=ताथाभाव्यसंज्ञकः, यः=स्वरितानां मध्ये पठितः, स्वरः=स्वरितः, स्यात्=भवेत् (तर्हि), माध्यन्दिनविरोधी =माध्यन्दिनशाखासमधीतोदाहरणविरुद्धः, स्यात्=भवेत् । (यतः=यस्मात् कारणात्) अत्र=माध्यन्दिनशाखासमधीतप्रकृतोदाहरणस्थले—'तनूनप्त्रऽ-इति तनू । नप्त्रे' इत्यादौ । भिन्नोदात्तानुदात्तकौ—भिन्नौ=पृथक् स्थितौ उदात्तोऽनुदात्तश्च यत्र तौ, एवेति निश्चयेन, स्वरौ=स्वरश्च स्वरश्च तौ, दृश्येते =प्राप्येते । अतो नायं स्वरितः माध्यन्दिनानाम्, किन्तु कम्प एव । तथा चोक्तं वर्णरत्नप्रदीपशिक्षायाम्—'माध्यन्दिनविरोधी स्यात् ताथाभाव्यस्तु यः स्वरः । भिन्नौ यतोऽत्र दृश्येते तावुदात्ताऽनुदात्तकौ ॥ तस्मान्माध्यन्दिनी-यानां पदे कम्पो विधीयते' ॥ ८६ ॥

उदात्तात्=उदात्तत्वयुताद्वर्णात् (परः तेन व्यञ्जनव्यवहितोऽपि), निहितः=अनुदात्तः, स्वारः=स्वरितः (भवेत् इति, अत्रापि आवृत्त्या योज्यम्) । अत्र उव्वटाचार्याः—'प्रागुवर्णादक्षराणामेकीभावः' (शु० य० प्रा० ४।१३०) इत्यादिना स्वराणाम् अक्षराणामेकीभावस्य पूर्वो विधिः, इदानी-मक्षराणां व्यञ्जनव्यवहितानां यः स्वरसंहितायां भवति स उच्यते—'उदात्ता-च्चानुदात्तꣳस्वरितम्' इति । यथा—'स्वा+हा=स्वाहा' इत्यं स्वरितस्थलं निरूप्य प्रचितं निरूपयति—स्वरितात्=स्वरितत्वविशिष्टादक्षरात् (परोऽनु-दात्तो व्यञ्जनव्यवहितोऽपि), प्रचयः=उदात्तमयः, भवेत्=स्यात्, तथा चोक्तं—'स्वरितात् परमुदात्तमयम्' । यथा—गुणानाम्+त्वा='गुणानान्त्वा' इति । (यदि) अनुदात्तत्वविशिष्टाक्षरः व्यञ्जनव्यवहितोऽपि—उदात्तात्

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

=उच्चस्वरात्, स्वरितात् वा, पूर्वः=आदिभूतः, तदा, अन्यम्=स्वरित-प्रचयान्यतरात्मकम्, स्वरम्=स्वरत्वम्, न=नहि, आपद्यते=प्राप्नोति, किन्तु अनुदात्त एव भवति। अलमतिविस्तरेणात्र।

हिन्दी—ताथाभाष्य स्वरित का माध्यन्दिनविरुद्धत्व तथा व्यञ्जन के व्यवधान होने पर भी संहिता में स्वरितविधि और उसका अपवाद—इस विषय में आचार्य कहते हैं—यदि ताथाभाष्यसंज्ञक जो स्वरितों के मध्य में पठित स्वर हो तो माध्यन्दिनविरोधी होगा, क्योंकि यहाँ अलग-अलग स्थित उदात्त और अनुदात्त ही स्वर दिखाई देते हैं। अतः माध्यन्दिनों का यह स्वरित नहीं है, किन्तु कम्प ही है॥ ८६॥

और—उदात्तत्व के सहित वर्ण से परे (व्यञ्जन से व्यवहित होने पर भी) जो निहित स्वर अनुदात्त स्वरित होता है (यहाँ भी आवृत्ति से जोड़ना चाहिए) और स्वरितत्वविशिष्ट अक्षर से (पर अनुदात्त व्यञ्जन से व्यवहित होने पर भी) उदात्तमय हो और यदि उच्च स्वर से पूर्व अन्य (स्वरित तथा प्रचय में अन्यतर) स्वरत्व को प्राप्त नहीं होगा, अनुदात्त ही रहेगा॥ ८७॥

निहितः (अनुदात्तत्वविशिष्टः स्वरः) कुत्र कथं वा भवति—

पदकाले यः स्वरितः संहितायां तथैव च।
स्वरितश्चेद् भवेत् पश्चात् स एव निहितः स्वरः॥ ८८॥

अन्वयः—पदकाले यः स्वरितः संहितायां च तथा एव, चेत् पश्चात् स्वरितः भवेत् स एव निहितः स्वरः भवति।

व्याख्या—पदकाले=पदपाठसमये, यः स्वरितः=स्वरः, संहितायाम्, च=अपि, तथा=चोदात्तस्वरितपरत्वाभावे स्वरित इत्यर्थः, एवेत्यवधारणे, यथा—'स्व ÷ + देवेषु स्वर्द्देवेषु'। संहितायां (क्वचित् अपवादस्वरूपमाह—) चेत्=यदि, पश्चात्=अनन्तरं स्वरितस्य अग्रे, स्वरितः=द्वितीयस्वरितः, भवेत्=स्यात् आगच्छेद्वा, सः=प्रथमः स्वरितः, एवेति निश्चये, निहितः=अनुदात्तत्वविशिष्टः, स्वरः, भवति=सम्भवति जायते वा। अत्र स्वरित-परत्वमुदात्तपरत्वस्याप्युपलक्षणं भवति। तथाहि—प्रातिशाख्ये उक्तमस्ति—'निहितमुदात्तस्वरितपरम्'। उदात्तपरत्वे निहितत्वं यथा—'स्वः ÷ + द्यौ ÷ = स्वद्यौ ÷ इति। स्वरितपरत्वे यथा—'स्व ÷ + स्व ÷ = स्व ؟ स्व ÷ इति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—निहित (अनुदात्तत्वविशिष्ट) स्वर कहाँ और कैसे होता है ? इस विषय में आचार्य कहते हैं कि पदपाठ के समय जो स्वरित और संहिता में यदि स्वरित के बाद फिर स्वरित ही हो तो वही 'निहित' स्वर कहलाता है। प्रातिशाख्य में भी कहा गया है कि—'निहित उदात्तस्वरित पर होता है'।

स्वरितप्रचययोः स्थलं कुत्र भवति—

उदात्तान्निहितः स्वार्यः स्वारोदात्तौ न तत्परौ।
स्वरो यश्च तथाभूतो ज्ञेयः स प्रचयः सदा ॥ ८९ ॥

अन्वयः—उदात्तात् निहितः तत्परौ स्वारोदात्तौ (यदि) न (भवेताम्) तदा स्वार्यः (कार्यः), यः स्वरः तथाभूतः, सः सदा प्रचयः ज्ञेयः।

व्याख्या—उदात्तात्, परः=पश्चाद्वर्ती, निहितः, तत्परौ=तस्मादनुदात्तात् परौ इति तत्परौ, स्वारोदात्तौ=स्वरितश्च उदात्तश्च, यदि, न=नहि, भवेताम्, तदा=एतादृश्यामवस्थायाम्, स्वार्यः=स्वरितः (कार्यः=करणीयः), यः स्वरः=अनुदात्तः, तथाभूतः=स्वरिततुल्यः, स्वरः, सदा=सर्वदा, प्रचयः=एतन्नामकः, ज्ञेयः=ज्ञातव्य इति।

हिन्दी—उदात्त के पश्चात् वाला जो अनुदात्त उस अनुदात्त से परे जो स्वरित और उदात्त यदि न हो तो स्वरित मानना चाहिए तथा वह स्वर अनुदात्त स्वरित के समान उसे सर्वदा प्रचय नाम से जानना चाहिए।

प्रचये स्वरितसमत्वस्य कथमुपपादनम्—

उच्चानुदात्तयोर्योगे स्वरितः स्वर उच्यते।
ऐक्यं तत्प्रचयः प्रोक्तः सन्धिरेष मिथोऽद्भुतः ॥ ९० ॥

अन्वयः—स्वरितः स्वरः उच्चानुदात्तयोः योगे उच्यते, तत् ऐक्यं प्रचयः प्रोक्तः। एषः सन्धिः मिथः अद्भुतः (आचार्यैरुक्तः)।

व्याख्या—स्वरितः=एतदाख्यः समाहारः (समाहारः स्वरितः), स्वरः (अचः स्वराः), उच्चानुदात्तयोः=उदात्तत्वानुदात्तयोः (उच्चैरुदात्तः, नीचैरनुदात्तः), योगे=समाहारे, उच्यते=कथ्यते (वैयाकरणैरिति)। तत्=तयोः=उदात्तानुदात्तयोः (तयोः स्थाने तदिति लुप्तविभक्तीकं पदम्), ऐक्यम्=एकताभावं=उदात्तत्वादिभेदराहित्यम्, एवेति निश्चये, प्रचयः=एकश्रुतिरूपः स्वरः, प्रोक्तः=प्रकर्षेण उक्तः (पाणिन्यादिभिर्वैयाकरणैः), तथाहि तद्वचनानि यथा—'स्वरितात् संहितायामनुदात्तानाम्' (पा० सू० १।२।३९), 'स्वरितात् परमनुदात्तमुदात्तम्' । अत्र विमर्शः—एकश्रुतौ उदात्तानुदात्त-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगस्य अनुदात्ते उदात्तमयत्वविधानेनापि सूच्यते। मयटः प्राचुर्यार्थत्वादनुदात्तस्य उदात्तबाहुल्ये जातेऽर्थात् किञ्चिदनुपात्तमपि शिष्टम् इति भावः। एतेन प्रचयस्य स्वरितसमता स्पष्टैव। एषः=उच्चनीचैक्यरूपः, पूर्वप्रतिपादितः स्वरितप्रचयजात्याद्यन्यतमः, मिथः=परस्परम्, अद्भुतः=तीक्ष्ण-मृदु-मृदुतर-मृदुतमान्यतमविलक्षणः (इत्याचार्यैरुक्तः)। यदि 'एषः' इत्यस्मिन् स्थाने 'एषाम्' इति क्वचित् पुस्तके स्यात्तदा एषां स्वरितादिषु सप्तम्यर्थे षष्ठी व्याख्येया।

हिन्दी—प्रचय में स्वरित के समत्व का कैसे उपपादन होता है, इस विषय में आचार्य कहते हैं—स्वरित-स्वर उदात्त और अनुदात्त के योग में होता है, ऐसा कहा जाता है। यह जो उदात्त और अनुदात्त का योग एकताभाव अर्थात् उदात्तत्वादि भेदराहित्य ही प्रचय=एकश्रुतिरूप स्वर पाणिनि आदि आचार्यों ने भी कहा है। यह जो ऊँच-नीच रूप पूर्वकथित स्वरित-प्रचय-जात्यादि में अन्यतम (का) परस्पर अद्भुत अर्थात् मृदु-मृदुतर-मृदुतम-अन्यतम विलक्षण संमिश्रण आचार्यों ने कहा है वह सर्वथा आश्चर्यजनक है।

स्वरितसमत्वे (उच्चनीचयोगोत्पन्ने) स्वरितस्य कस्मिन् अंशे उदात्तत्वं कुत्र वा अनुदात्तत्वम्—

मात्रिकं वा द्विमात्रं वा स्वरितं यदिहाक्षरम्।
तस्यादितोर्द्धमात्रा वै शेषं च परतो भवेत्॥ ९१॥

अन्वयः—इह मात्रिकं वा द्विमात्रं वा स्वरितं यद् अक्षरं तस्य आदितः अर्धमात्रा (अर्द्धम्) (उदात्तस्य) वै परतः शेषं भवेत्॥ ९१॥

व्याख्या—इह=अस्यां संहितायाम्, मात्रिकम्=एकमात्रिकं, वा=अथवा, द्विमात्रं=द्विमात्रिकं स्वरं, वा=भूयोऽपि, स्वरितम्=स्वरिताक्षरम्, यद्=यत्किमपि, अक्षरम्, तस्य=चर्चिताक्षरस्य, आदितः=प्रारम्भतः, अर्द्धमात्रा=अर्द्धम् उदात्तस्य, अथ च, परतः=अन्त्यार्धमात्रा (अन्त्यार्द्धम्), शेषम्=अनुदात्तम्, भवेत्=स्यादिति। अत्र महर्षेः पाणिनेः प्रमाणं यथा—'तस्यादित उदात्तमर्धह्रस्वम्' इति ह्रस्वग्रहणमविवक्षितम्॥ ९१॥

हिन्दी—स्वरित के समत्व में अर्थात् उच्च-नीच योग के उत्पन्न होने से स्वरित का किस अंश में उदात्तत्व है तथा कहाँ कितना अनुदात्तत्व है, इस विषय में आचार्य कहते हैं—संहिता में चाहे एकमात्रिक (ह्रस्व) अथवा द्विमात्रिक (दीर्घ) का स्वरित वर्ण वाला जो अक्षर उसके प्रारम्भ से अर्ध-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मात्रा उदात्त की होती है और उत्तरार्ध की आधी मात्रा अनुदात्त की होती है। महर्षि पाणिनि ने भी इसकी पुष्टि की है—'तस्यादित उदात्तमर्धंह्रस्वम्' इति निर्देशात्।

नीचोच्चसम्पन्ने स्वरिते ऊर्ध्वं हस्तचालनं किंवा अधोमुखम्—

उच्चस्थानगते हस्ते स्वरितं नोपपद्यते।
अधस्तात्तु यदा गच्छेत् स्वरितं न तदा भवेत्॥ ९२॥

इति श्रीयाज्ञवल्क्यशिक्षायां स्वरप्रकरणम्।

अन्वयः—हस्ते उच्चस्थानगते स्वरितं न उपपद्यते। यदा तु अधस्तात् (हस्तो) गच्छेत् तदा अपि स्वरितं न भवेत्॥ ९२॥

व्याख्या—हस्ते=पाणौ, उच्चस्थानगते=भ्रुवः प्रदेशे नीयमाने सति, स्वरितं=स्वरितस्थानं, न=नहि, उपपद्यते=प्राप्नोति, कारणञ्चात्र—स्वरितैकदेशस्य उदात्तस्य प्रदर्शिते अपि अनुदात्तस्य अप्रदर्शनात्। यदा=यस्मिन् अवसरे च, तु=निश्चयेन, अधस्तात्=हृदयप्रदेशे, (करः) गच्छेत्=प्राप्नुयात्, तदा=तस्यामवस्थायामपि, स्वरितं न भवेत्। स्वरितोत्तरार्धस्यानुदात्तस्य प्रदर्शने कृतेऽपि उदात्तस्य अप्रदर्शनात्। इति मध्ये एव हस्तस्य स्थित्या स्वरितत्वम् उपपन्नं स्यादिति भावः।

हिन्दी—नीच-उच्चसम्पन्न स्वरित में हस्तसंचालन ऊपर की ओर हो अथवा अधोमुख? इस आशंका के समाधान में आचार्य कहते हैं—हाथ के उच्च स्थान में जाने पर अर्थात् भौंहप्रदेश में प्राप्त होने पर स्वरित की उपपत्ति नहीं होती, स्वरित के एकदेश उदात्त के प्रदर्शित होने पर भी अनुदात्त का अप्रदर्शन होने से और जब कि—नीचे हृदयप्रदेश में हाथ जाय तो भी स्वरित नहीं हो, क्योंकि स्वरित के उत्तरार्ध के अनुदात्त का प्रदर्शन होने पर भी उदात्त का अप्रदर्शन होगा। इस प्रकार मध्य में ही हाथ की स्थिति से स्वरित उपपन्न होगा।

इति श्रीमहर्षियाज्ञवल्क्य-विरचितायां शिक्षायां स्वरप्रकरणे
क्षोपाह्व डॉ० नरेशशास्त्रिकृतायां 'शान्ति'व्याख्यायां
स्वरसंहिताप्रकरणं पूर्वार्द्धं समाप्तम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ याज्ञवल्क्य-शिक्षायामुत्तरार्द्धे

वर्णप्रकरणम्

वर्णानां विवरणं, ते किं वर्ण-दैवत-लिङ्गाः ? इत्युपपादनम् —

स्वराः । स्पर्शान्तस्योष्माणः । कण्ठ्य-जिह्वामूलीय-तालव्य-मूर्द्धन्य-दन्त्योष्ठ्य-यमाऽनुस्वार-विसर्जनीयोपध्मानीय-नासिक्या-ऽनुनासिक्य-रङ्गाः । नामाऽऽख्यातोपसर्ग-निपाताश्च किं वर्ण-दैवत-लिङ्गाः ।

अन्वयः — व्याख्या—स्वराः = अकारादयो ह्रस्व-दीर्घ-प्लुताः (अचः स्वराः, अचश्च—अइउण्, ऋलृक्, एओङ्, ऐऔच्); यथा — अ आ आ ३, इ ई ई ३, उ ऊ ऊ ३, ऋ ॠ ॠ ३, ऌ, ॡ ॡ ३, ए-ए ३, ऐ ऐ ३, ओ ओ ३, औ औ ३ इति त्रयोविंशतिसंख्यका भवन्ति । लौकिकवर्णसमाम्नाये प्रोक्ताः । स्वरस्य शाब्दिकव्युत्पत्तिस्तु 'स्वर्यते शब्द्यते व्यञ्जनमेभिः, स्वेन राजन्त इति वा' ।

स्पर्शाः—ककारादारभ्य मकारपर्यन्तं (कादयो मावसानाः स्पर्शाः); यथा — कवर्गं = क ख ग घ ङ, चवर्गं = च छ ज झ ञ, टवर्गं = ट ठ ड ढ ण, तवर्गं = त थ द ध न, पवर्गं—प फ ब भ म—एषां संख्या पञ्चविंशतिः । अन्तस्थाः = यरलवा इति चतुःसंख्यकाः (यरलवा अन्तस्थाः), ऊष्माणः = शषसहा इति चतुर्विधाः, ते स्पर्शान्तस्थोष्माणः । समेषामेतेषां संख्या त्रयस्त्रिंशद् व्यञ्जनानि भवन्ति । कण्ठाद्योष्ठ्यान्ताः (अकुहविसर्जनीयानां कण्ठः, इचुयशानां तालु, ऋटुरषाणां मूर्धा, ऌतुलसानां दन्ताः, उपूपध्मानीयानामोष्ठौ) इत्यनुपदं व्याख्यास्यमानाः वर्णसमाम्नायोक्ताः अकारादयः । ये च वर्णसमाम्नाये निर्द्दिष्टा न सन्ति किन्तु प्रयोगं निर्वाहयन्ति तेऽयोगवाहाः यमादयो रङ्गान्ताश्च पृथगुपदेक्ष्यमाणाः वर्णाः तथा नामादयो वर्णसमूहरूपाणि पदानि च । किं वर्णकाः किं रूपकाः किं जातीयाश्च । अत्र वर्णपदस्य रूपजातिवाचकयोर्द्वयोरेकशेषेण प्रयोगः । किं दैवताः, किं लिङ्गाः (सन्तीति शेषः) ? इत्येष प्रश्नः ।

हिन्दी—अब याज्ञवल्क्यशिक्षा के उत्तरार्ध में वर्णप्रकरण प्रारम्भ होता

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

है। शिक्षाशास्त्र में 'मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह' इस शाश्वत नियम के अनुसार पूर्वार्ध में स्वर की व्याख्या करके अब वर्णों के वर्ण, दैवत और लिङ्ग के विषय में विचार किया जाता है—स्वरों के प्रथमतः तीन भेद होते हैं—ह्रस्व, दीर्घ और प्लुत। लौकिक वर्णसमाम्नाय में वर्णित अ आ आदि २३ स्वर हैं। स्वर के पश्चात् व्यञ्जन वर्ण—जिसे स्पर्श, अन्तस्थ और ऊष्मा कहते हैं—स्पर्श = क से लेकर म तक पच्चीस, अन्तस्थ = य र ल व चार, ऊष्मा = श ष स ह चार इस प्रकार तैंतीस व्यञ्जन होते हैं। ककारादि में कण्ठ से लेकर ओष्ठपर्यन्त उच्चारण स्थान हैं। जो वर्णसमाम्नाय में निर्दिष्ट नहीं हैं और प्रयोग का निर्वाह करते हैं वे अयोगवाह यमादि रङ्गान्त अलग-अलग कहे गये वर्णनामादि वर्णसमूह रूप पद, उनके कौन-से वर्ण, रूप जाति हैं एवं दैवत और लिंग कौन-से हैं—यही इस प्रकरण का प्रश्न है, जिनका उत्तर आगे दिया जा रहा है।

स्वरादीनां वर्णादिविचारः—

तत्र स्वराः शुक्ला नानादैवत्याः। स्पर्शाः कृष्णाः। अन्तस्थाः कपिलाः। ऊष्माणोऽरुणाः। यमा नीलाः। अनुस्वारः पीतः। विसर्जनीयः श्वेतः। जिह्वामूलीयो रक्तः। उपध्मानीयः पीतः। नासिक्यो हरितः। अतिनीला अनुनासिक्याः। शबलो रङ्गः॥ ३॥

अन्वयार्थौ—तत्र = स्वरादीनां वर्णादिविचारक्रमे, स्वराः = अच्विशिष्टाः वर्णा अकारादयः, शुक्लाः = श्वेतवर्णाः, नानादैवत्याः = अनेकविधदैवतस्वरूपाः। स्पर्शाः = ककारादारभ्य अकारपर्यन्तवर्णाः, कृष्णाः = कृष्णवर्णाः भवन्ति। अन्तस्थाः = यरलवाः, कपिलाः = कपिलवर्णाः। ऊष्माणः = शषसहाः, अरुणाः = ईषद्रक्ताः। यमाः = कुं खुं गुं घुं इति अपञ्चमैरित्यादौ वक्ष्यमाणाः चत्वारः (वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे यमो नाम मध्ये पूर्वसदृशो वर्णः। इत्थं विंशतिः। चतुष्ट्वन्तु वर्गाद्यत्वेन वर्गद्वितीयत्वेन वर्गतृतीयत्वेन वर्गचतुर्थत्वेन चेति बोध्यम्। नीलाः = नीलवर्णाः। अनुस्वारः = अं इत्यचः परो, त्रिविधो ँ ं ः कारः, पीतः = पीतवर्णः)। हुं इति नासिक्यः (नासामात्रेणोच्चारणात्), हरितः = हरितवर्णः, अनुनासिक्याः अँ इत्यचः परोऽर्धानुस्वारः शरः पूर्वो रेफवर्जाद्यणः पूर्वश्च तथा वर्गपञ्चमाः (मुखसहितनासिकयोच्चारणात्) अतिशयेन नीलवर्णा भवन्ति। रङ्गः ँ इत्यचः परोऽर्धानुस्वारः

CC-0. Nepal Sanskrit University. Digitized by eGangotri. Adyar Library and Research Centre Collection.

रेफात्पूर्वोऽचः पूर्वश्च सार्धैकाङ्कयुतः सार्धद्व्यङ्कयुतो वा, शबलः = चित्र-विचित्र-वर्णो विज्ञेयः ।

हिन्दी — स्वरादि के वर्ण आदि विचारक्रम में प्रथमतः वर्ण का विचार किया जाता है—स्वर = अच्विशिष्ट वर्ण अकारादि का सफेद वर्ण तथा अनेक दैवत स्वरूप हैं । स्पर्श = ककार से लेकर मकारपर्यन्त काले वर्ण वाले होते हैं । अन्तस्थ = य र ल व—ये कपिल वर्ण के हैं । ऊष्मा=श ष स ह कुछ लाल वर्ण के होते हैं । यम का रंग नीला होता है, अनुस्वार का पीला, विसर्जनीय सफेद तथा जिह्वामूलीय लाल रंग के होते हैं । इसी प्रकार उपध्मानीय का रंग पीला, नासिक्य वर्ण का रंग हरा और अनुनासिक वर्ण का रंग अत्यन्त नीला होता है । किन्तु रंगसंज्ञक वर्णों की आकृति चितकबरे (चित्र-विचित्र) रंग की है ।

वर्णानां कानि दैवतानि —

कण्ठ्या आग्नेया अकारादयः । जिह्वामूलीया नैर्ऋत्या ककारादयः । तालव्याः सौम्याश्चकारादयः । मूर्द्धन्या वायव्याष्टकारादयः । दन्त्या रौद्रास्तकारादयः । ओष्ठ्या आश्विनाः पकारादयः । शेषा वैश्वदेवा यमादयः ॥ ४ ॥

अन्वयः — अकारादयः कण्ठ्याः आग्नेयाः, ककारादयः जिह्वामूलीयाः नैर्ऋत्याः, चकारादयः तालव्याः सौम्याः, टकारादयः मूर्द्धन्याः वायव्याः, तकारादयः दन्त्याः रौद्राः, पकारादयः ओष्ठ्याः आश्विनाः, शेषाः यमादयः वैश्वदेवाः (भवन्ति) ।

व्याख्या—अकारादयः कण्ठ्याः = कण्ठान्निर्गताः कण्ठस्थानीयाः वर्णाः, आग्नेयाः = अग्निदैवतकाः भवन्ति । ककारादयः जिह्वामूलीयाः वर्णाः नैर्ऋत्य-दैवतकाः स्युः, तालव्याः = तालुस्थानीयाः चकारादयः (इचुयशानां तालुः), सौम्याः = सोमदैवतकाः भवन्ति, टकारादयः = टकारप्रभृतयः, मूर्द्धन्याः = मूर्द्धास्थानीयाः (ऋटुरषाणां मूर्द्धा) वर्णाः, वायव्याः = वायुदैवतकाः भवन्ति, तकारादयः = तकारप्रभृतयः, दन्त्याः = दन्तस्थानीयाः (लृतुलसानां दन्ताः), रौद्राः = रुद्रदैवतकाः भवन्ति । पकारादयः = पकारप्रभृतयः, ओष्ठ्याः = ओष्ठ-स्थानीयाः, आश्विनाः=अश्विनीकुमारदैवतकाः सम्भवन्ति । शेषाः = उक्तातिरिक्ताः, यमादयः=यमाऽनुस्वार-नासिक्याऽनुनासिक्य-रङ्गाः रेफश्च, वैश्वदेवाः = विश्वेदेवदैवत्याः भवन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—वर्णों के कौन-कौन से दैवत (देवता) हैं, इस विषय में आचार्य कहते हैं—अकार आदि जो कण्ठ से उच्चरित होते हैं उनका अग्नि देवता, ककार प्रभृति जिह्वामूलीय जीभ से उच्चरित होने वाले वर्णों का नैर्ऋत्य देवता, चकार आदि तालु से उच्चरित वर्णों का सोम देवता, टकार आदि मूर्द्धा (मस्तक) से उच्चरित होने वाले वर्णों का वायु देवता, तकार आदि दाँत से उच्चरित होने वाले वर्णों का रुद्र देवता, पकार प्रभृति ओठ से उच्चरित होने वाले वर्णों का देवता अश्विनीकुमार तथा उक्त वर्णों के अतिरिक्त यम (अनुस्वार, अनुनासिक, रङ्ग और रेफ) के विश्वेदेव (दैवत) देवता हैं।

अक्षराणां के जातिविशेषाः—

स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये।
द्वितीयाश्च तृतीयाश्च चतुर्थाश्चापि भूमिपाः॥ १॥
वर्गाणां पञ्चमा वैश्या अन्तस्थाश्च तथैव च।
ऊष्माणश्च हकारश्च शूद्रा एव प्रकीर्त्तिताः॥ २॥

अन्वयः—स्वराः तु ब्राह्मणाः ज्ञेयाः, च ये वर्गाणां प्रथमाः तथा द्वितीयाः, तृतीयाः, चतुर्थाः च अपि तु भूमिपाः ज्ञेयाः। अपि च वर्गाणां (मध्ये) पञ्चमाः वैश्याः, च अन्तस्थाः तथैव (ज्ञेयाः), ऊष्माणः हकारः च शूद्रा एव प्रकीर्त्तिताः (विद्वद्भिर्वैदिकैरिति)।

व्याख्या—स्वराः (अचः स्वराः)=अकारादयः, ब्राह्मणाः=ब्राह्मण-जातिविशेषाः, ज्ञेयाः=विज्ञेयाः। च=पुनः, ये वर्गाणां=कवर्गादिपञ्चकानां, प्रथमाः=प्राथमिकाक्षराणि कचटतपाः इति तथा, द्वितीयाः=खछठथफाः इति, तृतीयाः=गजडदबाः इति, चतुर्थाः=घझढधभाः, अपि तु भूमिपाः=क्षत्रियाः विज्ञेयाः, वर्गाणां=कवर्गादिपञ्चकानां मध्ये, ये पञ्चमाः=ङञणनमाः, ते वैश्याः=वैश्यज्ञातयः, च=पुनः, अन्तस्थाः=यरलवाः, तथैव=तेनैव प्रकारेण, वैश्यजातयः ज्ञेयाः, ऊष्माणः=सषशहाः, च=पुनः, हकारः=औरसः, शूद्राः=शूद्रजातयः, प्रकीर्त्तिताः बुधैर्विद्वद्भिरिति।

हिन्दी—अक्षरों (वर्णों) की कौन-कौन जातियाँ होती हैं, इस क्रम में आचार्य कहते हैं—अकारादि स्वरों को ब्राह्मणजातीय जानना चाहिए और वर्गों के (कवर्गादि पाँच वर्ग) प्रथम अर्थात् आद्य अक्षर क च ट त प, द्वितीय—ख छ ठ थ फ, तृतीय—ग ज ड द ब और चतुर्थ—घ झ ढ ध भ इनके

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

क्षत्रिय वर्ण होते हैं। कवर्गादि पाँचों वर्ग के पञ्चम अक्षर ङ ञ ण न म ये वैश्य वर्ण के होते हैं और अन्तस्थ वर्ण—य र ल व इन्हें भी वैश्य जाति के मानें एवञ्च ऊष्मा—स ष श ह और औरस हकार इन्हें वैदिक विद्वानों ने शूद्र जाति के वर्ण बताया है।

पदानां रूपाणि—

शुक्लवर्णानि नामानि आख्याता रोहिता मताः।
कपिलास्तूपसर्गाश्च कृष्णाश्चैव निपातकाः॥ ३॥

अन्वय।—नामानि शुक्लवर्णानि, आख्याताः रोहिताः मताः, उपसर्गाः तु कपिलाः, निपातकाः च कृष्णाः मताः।

व्याख्या—(पदानां रूपाणि यथा)—नामानि=संज्ञकानि—'रामो हरिः करी भूभृत् भानुः कर्ता च चन्द्रमाः। तस्थिवान् भगवान् आत्मा'—इत्यादीनि, शुक्लवर्णानि=शुक्लरूपाणि, आख्याताः=तिङन्ताः 'भवन्ति' इत्यादयः, रोहिताः=लोहिताः, रक्तवर्णाः; 'रोहितो लोहितो रक्तः' इत्यमरः, मता आचार्यैः। उपसर्गाः=प्रपरेत्यादयः, तु=निश्चयेन, कपिलाः=कपिलवर्णाः, अथ च—निपातकाः=चादयः, निपाता एव निपातकाः इत्यव्ययमात्रोपलक्षकम्, कृष्णाः=कृष्णवर्णाः मताः।

हिन्दी—अब पदों का स्वरूप कैसा होता है, इस विषय में आचार्य कहते हैं—सुबन्त तथा तिङन्त से निष्पन्न शब्द (सुप्तिङन्तं पदम्) को पद कहते हैं, अतः नामवाचक राम, हरि, करी आदि सुबन्त शब्दों (पदों) के शुक्ल (सफेद) रूप होते हैं अर्थात् सफेद वर्ण के हैं और आख्यात=तिङन्त पद 'भवति' आदि लाल वर्ण के माने गये हैं। अपरञ्च—उपसर्ग जो प्र, परा, अप, सम्, निस्, निर्, दुस्, दुर् आदि से प्रख्यात हैं वे कपिल वर्ण के माने गये हैं। और निपात जिसमें च आदि आते हैं, उनका रूप वैदिक विद्वानों ने काला रंग माना है।

पदानां गोत्राणि-दैवतानि च—

भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते।
वशिष्ठा उपसर्गाश्च निपाताः काश्यपाः स्मृताः॥ ४॥
सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते।
आग्नेयस्तूपसर्गः स्यान्निपातो वारुणः स्मृतः॥ ५॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—आख्यातं भारद्वाजकं नाम भार्गवं भाष्यते, उपसर्गाः च वशिष्ठाः, निपाताः काश्यपाः स्मृताः ॥ ४ ॥

सर्वम् आख्यातं तु सौम्यम्, नाम वायव्यम् इष्यते, उपसर्गः तु आग्नेयः स्यात्, निपातः वारुणः स्मृतः ।

व्याख्या—अधुना आख्यात-नाम-उपसर्ग-निपातानां गोत्राणि कथ्यन्ते, तद्यथा क्रमेण, आख्यातम्=तिङन्तं 'भवति' इत्यादि रूपं, भारद्वाजकम्=भारद्वाजगोत्रम्, नाम, भार्गवम्=भार्गवगोत्रम्, भाष्यते=उच्चैर्घोष्यते, उपसर्गाः=प्रादयः, वशिष्ठाः=वशिष्ठगोत्राः, निपाताः=निपाताश्च, काश्यपाः=काश्यपगोत्राः, स्मृताः=कथिताः, आचार्यैर्वेदार्थप्रतिपादकैरिति ॥ ४ ॥

पददैवतानि यथा—सर्वम्=अखिलम्, आख्यातम्=आख्यातपदम्, सौम्यम्=सोमदेवत्यम्, नाम=नामपदं, वायव्यम्=वायुदेवत्यम्, इष्यते=कथ्यते आचार्यैरिति । उपसर्गः तु=प्रादयस्तु, आग्नेयः=अग्निदेवत्यः, स्यात्=भवेत्, अपि च निपातः=अव्ययमात्रोपलक्षकः, वारुणः=वरुणदेवत्यः, स्मृतः=प्रतिपादितः महामुनिभिरिति ॥ ५ ॥

हिन्दी—पदों के गोत्र तथा देवता कौन-कौन से हैं—इस विषय में आचार्य कहते हैं कि आख्यात का भारद्वाज गोत्र, नाम—भार्गवगोत्रीय, उपसर्गों का वशिष्ठ गोत्र और निपात काश्यप गोत्र के माने गये हैं ।

दैवत (देवता)—समस्त आख्यात पद के सोमदेवताक, नाम पद के वायुदेवता आचार्यों ने कहा है और उपसर्ग अग्निदेवताक हैं एवं निपात के वरुण देवता हैं, ऐसा मुनियों ने कहा है ।

अक्षराणां दैवत्यं लिङ्गानि च—

आदित्यो मुनिभिः प्रोक्तः सर्वाक्षरगणस्य च ।
स्वरा विसर्जनीयाश्च यमाः पुंल्लिङ्गकाः स्मृताः ॥ ६ ॥
प्रथमाश्च तथाऽन्तस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः ।
शेषाक्षराणि षण्ढानि प्राहुर्लिङ्गविवेचकाः ॥ ७ ॥

अन्वयः—मुनिभिः सर्वाक्षरगणस्य च (पदस्य) (देवता) आदित्यः प्रोक्तः । स्वराः विसर्जनीयाः च यमाः पुंल्लिङ्गकाः स्मृताः (मुनिभिः इति) । (वर्गेषु) प्रथमाः तथा अन्तस्थाः स्त्रीलिङ्गाः परिकीर्त्तिताः (मुनिभिः) । शेषाक्षराणि षण्ढानि इति लिङ्गविवेचकाः प्राहुः ॥ ६-७ ॥

CC-0. Nepal Sanskrit Academy. Kathmandu. Collection

व्याख्या—मुनिभिः = मनु-याज्ञवल्क्य-पाणिन्यादिभिः, सर्वाक्षरगणस्य—सर्वेषामक्षराणां गणस्तस्य = सर्ववर्णसमूहस्य, चकारात् पदस्य च देवता, आदित्यः = सूर्यः, प्रोक्तः = कथितः । अथाक्षरलिङ्गानि यथा—स्वराः = अचः स्वराः, विसर्जनीयाः = विसर्गाः (विसर्जनीयस्य सः), यमाः एते, पुँल्लिङ्गकाः = पुँल्लिङ्गाः, स्मृताः = कथिताः । वर्गेषु = कवर्गादिषु, प्रथमाः = कचटतपाः, तथा = तथैव, अन्तस्थाः = यरलवाः वर्णाः, स्त्रीलिङ्गाः, परिकीर्त्तिताः = प्रख्याताः सन्ति । शेषाक्षराणि = ये वर्गेषु द्वितीय-तृतीयपञ्चमाक्षराणि, ऊष्माणः = शषसहाः, अनुस्वार-जिह्वामूलीय-उपध्मानीय-नासिक्य-अनुनासिक्य-रङ्गाश्च, षण्ढानि = नपुंसकलिङ्गानि भवन्तीति, लिङ्गविवेचकाः—लिङ्गानि विवेचयन्ति ये ते लिङ्गविवेचकाः = लिङ्गविवेचनकर्तारो वैयाकरणाः आचार्याः, प्राहुः = कथयन्ति ।

हिन्दी—वर्णों (अक्षरों) के देवता और लिङ्ग कौन-कौन-से हैं, इस विषय में मुनियों ने कहा है—समस्त अक्षरसमूह के देवता आदित्य (सूर्य) हैं, ऐसा याज्ञवल्क्य आदि मुनियों ने स्पष्ट किया है ।

अब लिंगविचार के प्रसंग में वे कहते हैं कि स्वर, विसर्ग और यम पुँल्लिङ्ग कहे गये हैं । वर्ग के प्रथम अक्षर (क च ट त प) तथा अन्तस्थ वर्ण (य र ल व) स्त्रीलिंग घोषित किये गये हैं—मुनियों के द्वारा । शेष अक्षर जो वर्गों में द्वितीय, तृतीय और पञ्चम वर्ण, ऊष्मा, अनुस्वार, जिह्वामूलीय, उपध्मानीय, नासिक्य, अनुनासिक्य और रङ्ग ये सब वर्ण लिङ्गविवेचक आचार्यों द्वारा नपुंसकलिंग कहे गये हैं ।

इति महर्षियाज्ञवल्क्यप्रणीतायां (प्रोक्तायां) शिक्षायां वर्णप्रकरणे
वर्णदैवताद्यधिकारः प्रथमः पूर्णतामगात् ।

वर्णानां संस्कारप्रदर्शनार्थं सन्धिमेवानाह—

सन्धिश्चतुर्विधो भवति—लोपाऽऽगमविकाराः प्रकृतिभावश्चेति । तत्र लोपो यथा—अ॒य॒क्ष्मा ँ. मा, अ॑य॒क्ष्मा मा (शु० य० सं० १।१) । श॒ततेजा ँ. व्वायु ँ., श॒ततेजा व्वायु ँ. (शु० य० सं० १।२४) । ति॒ग्मतेजा ँ. द्विषत ति॒ग्मतेजा द्विष॒तः । (शु० य० सं० १।२४) इति ।

आगमो यथा—प्र॒त्यङ् सोम॒ ÷, प्र॒त्यङ्क्सोमं ÷ (सं० १०।३१) । प्राङ्सोम॒ ÷ प्राङ्क्सोम॒ ÷ (सं० १९।३) । अ॒स्मा॒न् सी॒त॒ अस्म्मान्त्सीते (सं० १८।६१) । शीत॒ समुद्रान् शीत्समुद्रान् (सं० १३।१३) इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकारो यथा—आ इ॒दम् एदम् (सं० ४।१)। आ इ॒मे एमे (स० ३३।६०) आ इष्ट॑य ÷ एष्ट॑य ÷ (स० १८।४३)। प्रकृतिभावो यथा—आ॒शुः शिशा॑नः आ॒शुः शिशानः (स० १७।११) इति। यु॒ञ्जा॒न ँ. प्रथमम्, यु॒ञ्जान ँ. प्रथमम् (सं० ११।१)। अदि॑ति॒ ँ षोड॑शाक्षरेण, अदि॑ति॒ ँ षोड॑शाक्षरेण (सं० ९।३४)। नम॑ ÷ अ॒स्तु॒। नमो॑ऽस्तु (सं० १६।६४)। इति।

अन्वयार्थौ—सन्धिः = द्वयोर्वर्णयोरनुस्वारविसर्गयोश्च मेलनं सन्धिर्भवति, चतुर्विधः = चतुष्प्रकारकः, भवति = जायते। लोप-आगम-विकाराः, प्रकृतिभावश्च इति। लोपः = वर्णस्य अदर्शनम् (अदर्शनं लोपः), आगमः = नूतनवर्णानामागमनम्, प्रकृतिभावः = यथावत् स्थितिः, इति भेदात्, सन्धिः = संहिता, चतुर्विधो भवति। प्रत्येकस्योदाहरणानि क्रमेण मूले प्राप्तानि भवन्ति; तद्यथा—लोपस्य—'अ॒यु॒क्ष्मा ँ. मा = अयु॒क्ष्मामा, शततेजा ँ. व्वायु ँ. = शततेजा व्वायु ँ, आगमो यथा—प्र॒त्यङ्सोम॑ ÷ = प्रत्यङ्क्सोम॑ ÷। विकारो यथा—आ इ॒दम् = एदम्, आ इमे = एमे, आ इष्टय = ÷ एष्टय ÷, प्रकृतिभावो यथा—आ॒शुः शिशा॑नः = आ॒शुः शिशानः, यु॒ञ्जान ँ प्र॑थ॒मम् = युञ्जान ँ. प्रथमम् अदिति ँ षोडशाक्षरेण = अदिति ँ षोडशाक्षरेण, नम॑ ÷ अ॒स्तु॒ = नमो॑ऽस्तु॒ इति।

हिन्दी—अब आचार्य वर्णों के संस्कारप्रदर्शन हेतु सन्धि के भेदों का विवरण कहते हैं। वस्तुतः सन्धि मुख्य रूप से चार प्रकार की होती है—लोप, आगम, विकार और प्रकृतिभाव। किन्तु व्याकरण के अनुसार पञ्चसन्धि कहलाती है। लघुसिद्धान्तकौमुदी में विभिन्न सूत्रों द्वारा सन्धि का निर्देश दिया गया है। लोप = किसी वर्ण का अदर्शन होना ही लोप है। आगम = किसी वर्ण का आगम, विकार = दो वर्णों को मिलकर एक तीसरे वर्ण का आदेश हो जाना, प्रकृतिभाव = प्रकृतिभाव का तात्पर्य अपने ही रूप में स्थिति का होना। ये सन्धियाँ चार प्रकार की होती हैं। उदाहरण मूल तथा व्याख्या में सुस्पष्ट हैं।

विवृत्तेः उच्चारणप्रकारं तत्स्वरूपञ्च—

आकाशस्था यथा विद्युत् स्फुटिता मणिसूत्रवत्।
एषच्छेदा विवृत्तीनां यथा बालपु कर्तरी॥ ८॥

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते।
विवृत्तिस्तत्र विज्ञेया 'यऽईशे' तु निदर्शनम् ॥ ९ ॥

अन्वयः—यथा आकाशस्था विद्युत् मणिसूत्रवत् स्फुटिता (सती) एषः विवृत्तीनां छेदः, यथा बालेषु कर्त्तरी (ध्वनिं करोति तद्वत्)। यत्र द्वयोः स्वरयोः मध्ये सन्धिः न दृश्यते तत्र विवृत्तिः विज्ञेया; यथा—'यऽईशे' तु निदर्शनम् ॥ ८–९ ॥

व्याख्या—यथा = येन प्रकारेण, आकाशस्था = आकाशे स्थिता, विद्युत् = तडित् ('तडित् सौदामिनी विद्युत् चञ्चला चपला अपि' इत्यमरः), मणिसूत्रवत् = मणिसूत्रेणेव (तरसा) स्फुटत्वं प्राप्ता सती (ध्वनिता भवतीति), एषः = उपस्थितः, तडित्स्फोटध्वनिः, विवृत्तीनाम् = सन्धिविश्लेषाणां सन्धिभङ्गानां वा, छेदः = विश्लेषः कर्त्तव्यः (अर्थात् तावत्कालमेव विवृत्तेः उच्चारणं कर्त्तव्यमिति), ध्वन्याकारमुदाहरति – यथा = यद्वत्, बालेषु = कचेषु (केशकर्त्तनसमये), कर्तरी = कर्तरिका = केशकर्तनी, यथा शीघ्रतया (तरसा) 'कुट्' इति ध्वनिं विदधाति तथैवात्रापि विवृत्तेः समुच्चारणे ध्वनिः कर्त्तव्यः ॥ ८ ॥

विवृत्तेः स्वरूपम् – यत्र = यस्मिन् स्थाने, द्वयोः = उभयोः, स्वरयोः, मध्ये = अन्तराले, सन्धिः = मेलनम्, न = नहि, दृश्यते = अवलोक्यते, तत्र = एतादृशे स्थाने, विवृत्तिः = विश्लेषः, विज्ञेया = ज्ञातव्येति। अत्रोदाहरणं तत्साधनिका च यथा – 'यऽईशे' इत्यत्र यः इति पदे स्थितस्य विसर्गस्य प्रातिशाख्योक्त–'कण्ठ्यपूर्वो यकारमरिफितः' इत्यनेन यत्वे, तथा च 'यवयोः पदान्तयोः स्वरमध्ये लोपः' इति तस्य लोपे। अकार-इकारयोः स्थाने 'कण्ठ्यादि वर्णं एकारम्' इत्येकारसन्धौ प्राप्ते 'न परकालः पूर्वंकाले पुनः' अनेन निषिद्धः, एतेन विवेकेन पृथग्भावेन वर्त्तते इति विवृत्तिः इति निरुक्त्या 'य' इति पदम् 'ईशे' इति पदात् विच्छिद्योच्चार्यं मध्ये याऽर्धमात्रिकाविरतिः सन्ध्यभावात् भवति सा विवृत्तिरिति ॥ ९ ॥

हिन्दी—आचार्य विवृत्ति के उच्चारण प्रकार और उसके स्वरूप को कहते हैं— जिस प्रकार आकाश में स्थित (चमकने वाली) बिजली मणियों में गुंथे हुए सूत्र के समान स्फुटित होने पर ध्वनि होने में जितना समय लगता है उतने ही समय में विवृत्ति का उच्चारण होना चाहिए। इसको और स्पष्ट करते हुए आचार्य कहते हैं— जिस प्रकार केश (बाल) काटते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समय छुरा से 'कुट्' शब्द निकलता है उसी तीव्रता में विवृत्ति का उच्चारण करें ॥ ८ ॥

विवृत्ति-लक्षण—जहाँ दो स्वरों के बीच में सन्धि न दिखायी दे वहाँ विवृत्ति जानना चाहिए। जैसा कि शुक्लयजुर्वेदसंहिता के 'यऽईशे' इस मन्त्र में हुआ है। इसकी साधनिका शुक्लयजुर्वेद के प्रातिशाख्य में दी गयी है, जो कि संस्कृत टीका में संक्षेप से उल्लिखित है ॥ ९ ॥

विवृत्तेः कति भेदाः भवन्ति—

पिपीलिका पाकवती तथा वत्सानुसारिणी।
वत्सानुसृजिता चैव चतस्रस्ता विवृत्तयः ॥ १० ॥

अन्वयः—ताः विवृत्तयः पिपीलिका पाकवती तथा वत्सानुसारिणी वत्सानुसृजिता च एव चतस्रः (सन्ति) ॥ १० ॥

व्याख्या—ताः = पूर्वप्रतिपादितलक्षणसमुल्लसिताः विवृत्तयः, पिपीलिका = प्रथमा, पाकवती = द्वितीया, तथा = अपि च, वत्सानुसारिणी = तृतीया, वत्सानुसृजिता = चतुर्थी विवृत्तिः, अनेन प्रकारेण चतस्रः विवृत्तयो भवन्तीति।

हिन्दी—पूर्व पद्य द्वारा विवृत्ति का सामान्य लक्षण कहा गया है, अब उसके कितने भेद हैं, इस विषय में आचार्य कहते हैं कि पहली विवृत्ति का नाम पिपीलिका है, दूसरी पाकवती, तीसरी वत्सानुसारिणी और चौथी वत्सानुसृजिता नाम की विवृत्ति है। इस प्रकार चार विवृत्तियाँ होती हैं।

चतसृणां विवृत्तीनां सदृष्टान्तानि लक्षणानि—

पिपीलिकाऽऽद्यन्तदीर्घा नाभ्याऽआसीन्निदर्शनम्।
पाकवत्युभयोर्ह्रस्वा व्विनऽइन्द्रेति दर्शनम् ॥ ११ ॥
वत्सानुसारिणी चादौ दीर्घा ताऽअस्य दर्शनम्।
अन्ते वत्सानुसृजिता तानऽआवोढमश्विना ॥ १२ ॥

अन्वयः—आद्यन्तदीर्घा पिपीलिका 'नाभ्याऽआसीत्' निदर्शनम्, उभयोः ह्रस्वा पाकवती 'व्विनऽइन्द्रे'ति दर्शनम्, आदौ च दीर्घा वत्सानुसारिणी, 'ताऽअस्य' दर्शनम्, अन्ते वत्सानुसृजिता 'तानऽआवोढमश्विना'।

व्याख्या—विवृत्तेः आदौ अन्ते च स्थूलता दीर्घाक्षरसम्भवात्। मध्यभागे च स्वस्या निपतनात् कृशतया पिपीलिका अनुसारिदृश्यम्। तस्मात्कारणात्

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

अस्या अपि पिपीलिकात्वं सिद्धयति। उदाहरणञ्चात्र—'नाभ्याऽआसीत्' अत्रोभयतो दीर्घयोगात् सुस्पष्टा भवति। अपरञ्च—ह्रस्वद्वययोगात् (उभयोः ह्रस्वा) ग्रस्यमानतया पाकवती इत्याख्या द्वितीया विवृत्तिर्भवति, यथा—'व्विनऽइन्द्र' इत्युदाहरणे विवृत्तेः पाकवतीत्वम्। तेन अत्र विवृत्तेःस्वल्पाश्रुतिः प्रतीयते ॥ ११ ॥

आदौ च दीर्घा=दीर्घापेक्षया ह्रस्वस्य अल्पकायत्वात् वत्सत्वम्, तम् अनुसरन्त्या विवृत्तेः वत्सानुसारिणीत्वम्। यथा—'ताऽअस्य' इत्यत्र विवृत्तेः आदौ दीर्घत्वात् वत्सानुसारिणीत्वम्। अत्र विवृत्तेः ह्रस्वेन सह सम्बन्धात् सहमिलितेव श्रुतिः श्रूयत इति भावः, अन्ते=ह्रस्वेन संसृष्टतया विवृत्तेः वत्सानुसृजितात्वम्। यथा—तानऽआवोढ' इत्यत्र विवृत्तेः अन्ते दीर्घत्वात् आदिह्रस्वेन सहोच्चारणात् च वत्सानुसृजितात्वम्। एवं चतसृणाम् अपि विवृत्तीनाम् उच्चारणकालस्तु अर्धमात्रिक एव ॥ १ ॥

हिन्दी—उपर्युक्त चार विवृत्तियों के (उदाहरणों) के साथ लक्षण यहाँ प्रस्तुत किये जाते हैं—विवृत्ति के आदि और अन्त में जहाँ पर दोनों ओर दीर्घ वर्ण हों, वहाँ पिपीलिका (जन्तुवत्) नाम की विवृत्ति होती है। इसका उदाहरण है—संहितोक्त 'नाभ्याऽआसीत्'। यहाँ अवग्रह चिह्न (ऽ) के पूर्व और पर दोनों ओर दीर्घ वर्ण हैं, अतः लक्षण के अनुसार यह **पिपीलिका** विवृत्ति का उदाहरण हुआ। और जब कि इसके विपरीत दोनों ओर ह्रस्व वर्ण हों और उसी प्रकार सन्धिविच्छेद हुआ हो तो ऐसी परिस्थिति में **पाकवती** नाम की विवृत्ति होती है। यथा—'व्विनऽइन्द्र' इस मन्त्र में स्पष्ट दिखायी दे रहा है, यहाँ सांकेतिक मन्त्र के मध्य में जो अवग्रह का चिह्न (ऽ) है, उसके दोनों ओर ह्रस्व वर्ण 'न'—'इ' होने से पाकवती नाम की विवृत्ति का यह उदाहरण हुआ।

,अब वत्सानुसारिणी विवृत्ति के विषय में आचार्य लक्षणोदाहरण कहते हैं—इस विवृत्ति में संधि-विश्लेष के साथ प्रारम्भिक वर्ण दीर्घ होता है और पीछे का वर्ण ह्रस्व; जैसा कि—'ताऽअस्य' इस मंत्रभाग में देखा जा सकता है। और वत्सानुसारिणी के ठीक विपरीत जहाँ आद्यक्षर ह्रस्व और परवर्ण दीर्घ होता है, उसे 'वत्सानुसृजिता' नाम की विवृत्ति कहते हैं। इसका उदाहरण भी स्पष्ट है'—तानऽआवोढमश्विना' इस मंत्रभाग में। मिलाइए—यहाँ पर अवग्रह (ऽ) से पूर्व 'न' ह्रस्व वर्ण है तथा उससे पर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्ण 'आ' दीर्घ है, साथ ही सन्धि का अभाव भी है, अतः यह 'वत्सानुसृजिता' विवृत्ति का स्पष्ट उदाहरण हुआ।

कतिविधाः स्वरभक्तयः—

करिणी कुर्विणी चैव हरिणी हरिता तथा।
तद्वद्धंसपदा नाम पञ्चैताः स्वरभक्तयः॥ १३॥

अन्वयः—करिणी, कुर्विणी, हरिणी, हरिता तथा तद्वत् हंसपदा नाम—एताः पञ्च (एव) स्वरभक्तयः (भवन्ति)॥ १३॥

व्याख्या—करिणी=प्रथमा स्वरभक्तिः, कुर्विणी=द्वितीया स्वरभक्तिः, हरिणी=तृतीया स्वरभक्तिः, हरिता=चतुर्थी स्वरभक्तिः, तथा=तेनैव प्रकारेण, तद्वत्=तत्तुल्या, हंसपदा=पञ्चमी स्वरभक्तिः, एताः=उपरि परिगणिताः, पञ्च (एव)=पञ्चसंख्यकाः (एव), स्वरभक्तयः भवन्ति। एवेति निश्चये।

हिन्दी—स्वरभक्तियाँ कितने प्रकार की होती हैं, इस विषय में आचार्य कहते हैं कि करिणी (पहली), कुर्विणी (दूसरी), हरिणी (तीसरी), हरिता (चौथी) तथा इसी प्रकार हंसपदा (पाँचवीं)—ये पाँच स्वरभक्तियाँ होती हैं।

उपर्युक्तानां पञ्चानां स्वरभक्तीनां मध्ये कुत्र का प्रसक्ता भवति—

करिणी रहयोर्योगे कुर्विणी लहकारयोः।
हरिणी रशयोर्योगे हरिता लशकारयोः॥ १४॥
या तु हंसपदा नाम सा तु रेफषकारयोः।

अन्वयः—रहयोः योगे करिणी, लहकारयोः कुर्विणी, रशयोः योगे हरिणी, लशकारयोः हरिता, या तु हंसपदा नाम सा तु रेफषकारयोः (योगे विज्ञेयेति शेषः)॥ १४॥

व्याख्या—रहयोः=रकारहकारयोः, योगे=संयोगे, करिणी=इत्याख्या स्वरभक्तिः (भवति), लहकारयोः=लकार-हकारयोः (संयोगे), कुर्विणी=इति नामधेया द्वितीया स्वरभक्तिर्भवति, रशयोः=रकार-शकारयोः संयोगे, हरिणी=इति नाम्नी स्वरभक्तिः, सुनिश्चिता भवति, तथैव—लशकारयोः=लकार-शकारयोः संयोगे, हरिता=इति संज्ञका चतुर्थी स्वरभक्तिर्भवतीति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

या = प्रख्याता अन्तिमा च, तु = निश्चयेन, हंसपदा = इति नाम्ना चर्चिता पञ्चमी स्वरभक्तिः, नाम = नामधेया, सा = एवम्भूता, तु = अवश्यमेव, रेफषकारयोः = रेफ-मूर्द्धन्यषकारयोर्योगे (ज्ञातव्येति शेषः)।

हिन्दी — उपर्युक्त पाँच प्रकार की स्वरभक्तियों के बीच में कहाँ किस स्वरभक्ति की प्रसक्ति होती है, इस विषय में आचार्य कहते हैं कि रकार और हकार के संयोग होने पर करणी नाम की स्वरभक्ति होती है, लकार और हकार के योग में कुर्विणी, रकार और शकार के योग में हरिणी तथा लकार-शकार के योग में हरिता; इनके अतिरिक्त जो पाँचवीं हंसपदा नाम की स्वरभक्ति होती है, वह रेफ तथा मूर्द्धन्य षकार के योग में होती है, ऐसा जानना चाहिए।

आसामुदाहरणानि यथा क्रमेण—

देवम्बर्हिश्च करिणी 'उपबल्हेति' कुर्विणी ॥ १५ ॥
हरिणी दर्शतमिति शतवल्शेति हारिता।
व्वर्षो व्वर्षीयसीत्याहुस्तथा हंसपदेति च ॥ १६ ॥

अन्वयः—'देवम्बर्हिश्च (हिः च) करिणी, 'उपबल्ह' इति कुर्विणी, 'दर्शतम्' इति हरिणी, 'शतवल्श' इति हारिता, तथा 'व्वर्षो व्वर्षीयसी' हंसपदा इति च आहुः।

व्याख्या — अत्र शुक्लयजुर्वेदसंहितोक्तानि मन्त्रप्रतीकान्युदाहरणानि सन्ति क्रमेण। तत्र 'देवम्बर्हिश्च' इति करिण्याः उदाहरणम्, 'उपबल्ह' इत्यत्र कुर्विणी नाम्नी स्वरभक्तिर्विज्ञेया, अपि च—'दर्शतम्' इति हरिण्या उदाहरणं प्रोक्तमस्ति। अपरञ्च 'शतवल्शा' इति हारितायाः स्वरभक्तेः उदाहरणं भवति। तथा = अन्यच्च—'व्वर्षो व्वर्षीयसी' इति तु 'हंसपदा' नाम्न्याः स्वरभक्त्याः उदाहरणमस्ति। इति आचार्याः याज्ञवल्क्यादयः, आहुः = ऊचुः।

हिन्दी — इन उपर्युक्त पाँचों स्वरभक्तियों के उदाहरण शुक्लयजुर्वेदसंहिता के विभिन्न मन्त्रों में प्राप्त होते हैं, जो इस प्रकार क्रम से हैं—'देवंबर्हि' यह करिणी नाम की स्वरभक्ति का उदाहरण है, इसी प्रकार 'उपबल्ह' यह कुर्विणी का, 'दर्शतम्' यह हरिणी का तथा 'शतवल्शा' यह हारिता का और 'व्वर्षो व्वर्षीयसी' यह 'हंसपदा' नाम की स्वरभक्ति का उदाहरण है। ऐसा आचार्यों ने सुनिश्चित किया है।

CC-0. Nepal Rashtriya Academy, Kathmandu Collection

स्वरभक्तिः कुत्र भवति—

रलाभ्यां पर ऊष्माणो यत्र स्युः स्वरितोदयाः ।
स्वरभक्तिरसौ ज्ञेया पूर्वमाक्रम्य पठ्यते ॥

अन्वयः—रलाभ्यां परे स्वरितोदयाः ऊष्माणो यत्र स्युः, असौ स्वरभक्तिः ज्ञेया, (एषा च) पूर्वम् आक्रम्य पठ्यते ।

व्याख्या—रलाभ्यां = रकार-लकाराभ्यां, परे = अनन्तरम्, स्वरितोदयाः = स्वरोदयाः, अच्परा: (अचः स्वराः) (न तु व्यञ्जनोदयाः), ऊष्माणः = शषसहाः, स्युः = भवेयुः, (तदा) असौ = पूर्वप्रतिपादिता, रेफोष्ममध्यस्थिता इति यावत्, स्वरभक्तिः = पूर्वर्चचिता स्वराणां भक्तिः, ज्ञेया = विज्ञेया, (तेन = तथाविधेन लक्षणेन) शुक्लयजुर्वेदसंहितोक्ते 'वर्ष्याय' इति मन्त्रे न प्रयुज्यते व्यञ्जनपरत्वात् ऊष्माणः, अतः षस्य द्वित्वम् अत्र भवति, एषा = स्वरितोदया स्वरभक्तिः, च = पुनः, पूर्वं = पूर्वनियमम्, आक्रम्य = अतिक्रम्य, रेफेण सह इति भावः, पठ्यते = पठनं क्रियते प्रोच्यते वा ।

हिन्दी—स्वरितोदय स्वरभक्ति कहाँ होती है, इस विचार क्रम में आचार्य कहते हैं—र और ल से परे स्वरितोदय किंवा स्वरोदय अर्थात् अच् से परे ऊष्मसंज्ञक वर्ण 'श ष स ह' हों, तब यह (स्वरभक्ति) रेफ और ऊष्मा के मध्य में रहने वाली स्वरभक्ति कहलाती है या जानना चाहिए। इससे 'वर्ष्याय' इत्यादि मन्त्र प्रतीक रूप में व्यञ्जन से पर होने पर ऊष्म का प्रयोग नहीं किया जाता है, इसलिए ष का द्वित्व हुआ है और यह पूर्वनियम को अतिक्रमण करके रेफ के साथ पढ़ा जाता है ।

स्वरभक्तेः प्रयोक्तारः कान् दोषान् परिवर्जयेत्—

स्वरभक्तिं प्रयुञ्जानस्त्रीन् दोषान् परिवर्जयेत् ।
इकारं चाप्युकारं च ग्रस्तदोषं तथैव च ॥ १७ ॥

अन्वयः—स्वरभक्तिं प्रयुञ्जानः त्रीन् दोषान् परिवर्जयेत् इकारं च अपि उकारं च ग्रस्तदोषं तथैव च (विवर्जयेत्) ।

व्याख्या—स्वरभक्तिविशेषस्य प्रयोगं कुर्वाणः याज्ञिको वैदिकः, त्रीन् = त्रिविधान् कथ्यमानदोषान्, परिवर्जयेत्—परितः = समन्ततः, वर्जयेत् = त्यागं कुर्यात् । ते दोषाः के सन्ति, येषां त्यागः अपेक्षित इत्याह—इकारं च = इवर्णं च, उकारम् = उवर्णं, च = पुनः, ग्रस्तदोषं = दोषेण युक्तं (स्थानकरण-

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

निष्पीडनात्मिका संवृतिताम् इत्याशयः। विवर्जयेत्=विशेषेण त्यागं कुर्यात्। अत्रायमाशयः—एकात्मिकैव स्वरभक्तिः समाचरणीयेति भावः। न चाऽकारो नाप्यैकारादयः। प्रतिज्ञासूत्रे तथा विधानात्।

हिन्दी—स्वरभक्ति का प्रयोग करने वालों को किन दोषों को छोड़ देना चाहिए, इस विषय में आचार्य कहते हैं—स्वरभक्ति का प्रयोग करने वाले वैदिक विद्वान् तीन दोषों को छोड़ दे। वे तीन दोष कौन हैं? इस जिज्ञासा में कहा जाता है कि इकार और उकार का उच्चारण तथा दोषग्रस्त, इन तीन दोषों को यत्नपूर्वक छोड़ देना चाहिए।

स्वरभक्तेः लक्षणं केन आख्यातम्—

एतल्लक्षणमाख्यातं याज्ञवल्क्येन धीमता।
सम्यक्पाठस्य सिद्धयर्थं शिष्याणां हितकाम्यया॥ १८॥

अन्वयः—धीमता याज्ञवल्क्येन शिष्याणां हितकाम्यया सम्यक्पाठस्य सिद्धयर्थम् (स्वरभक्तेः) एतत् लक्षणम् आख्यातम्।

व्याख्या—धीमता=बुद्धिमता, याज्ञवल्क्येन=एतदाख्ययोगिवरेण महर्षिणा याज्ञवल्क्येन, शिष्याणाम्=अन्तेवसतां विद्यार्थिनाम्, हितकाम्यया=कल्याणेच्छया (यतो मन्त्राणां वर्णतोऽपि हीनपाठादनिष्टोत्पत्तिरतो मन्त्राणाम् इति दीक्षिताः), सम्यक्पाठस्य=सुविचारिताध्ययनस्य, सिद्धयर्थम्=अध्ययनप्रयोजनसिद्धयर्थं (स्वरभक्तेः), एतत्=पूर्वोक्तम्, लक्षणम्=करिणीकुर्विणीत्यादिरूपम्, आख्यातम्=व्याख्यातमिति। अत्र विशेषः—सम्यक्पाठस्य स्थाने क्वचित् 'सम्यग्वर्णान्' इति पाठे 'एको वर्णः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः' इति श्रुतेः अनुग्राहिका अवगन्तव्या।

हिन्दी—स्वरभक्ति का यह विलक्षण लक्षण किसने प्रस्तुत किया, इस जिज्ञासा में आचार्य स्वयं कहते हैं—अथवा किसी प्रबुद्ध शिष्य ने कहा—बुद्धिमान् एवं विवेकी योगिवर महर्षि याज्ञवल्क्य ने शिष्यों की हितकामना से क्योंकि मंत्रों के वर्ण से भी हीनपाठ अनिष्टोत्पत्ति का कारण होता है, अतः संशुद्ध पाठ की सिद्धि के लिए स्वरभक्ति का यह लक्षण कहा गया है।

ऋलृवर्णयोरप्युच्चारणविधिमाह—

अर्धमात्रास्वरं किञ्चित् पृथङ्न्यूनमिवोच्चरन्।
ऋकारे च तृकारे च ह्रस्वपूर्वमनसाऽपि च॥ १९॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—ऋकारे च लृकारे अपि च हृत्कण्ठमनसा किञ्चित् पृथक् अर्धमात्रास्वरं न्यूनम् इव उच्चरन् (स्यात्), (इयमेव विधिः ऋलृवर्णयोरप्युच्चारणस्य)।

व्याख्या—ऋकारे = ऋकारवर्णे, च = पुनः, लृकारे = लृवर्णे, अपि, हृत्कण्ठमनसा = हृदा कण्ठेन मनसा च (रकारलकाराभ्याम्), किञ्चित् = यत्किञ्चित्, पृथक् = पार्थक्यरूपेण, अर्धमात्रास्वरम् = स्वरभक्तिस्वरम्, एकारसदृशम् इत्यर्थः, न्यूनम् इव = एकारोच्चारणतोऽल्पमेव, उच्चरन् = उच्चारणं कुर्वन्, न तु द्विमात्रिकैकारोच्चारणरूपां स्वरभक्ति प्रयुञ्जीतेत्यर्थः। हृत्कण्ठमनसेत्यत्रैकत्वं तु प्राण्यङ्गत्वात् इति विवेकः।

हिन्दी—ऋकार और लृकार के उच्चारण में हृदय, कण्ठ और मन तीनों से रकार-लकार का थोड़ा कम अलग रूप से अर्धमात्रा स्वर का (स्वरभक्ति स्वर के एकार के समान) उच्चारण करना चाहिए, किन्तु द्विमात्रिक एकारोच्चारण रूप स्वरभक्ति का प्रयोग न करें।

एकारौकारयोः मात्राविधानं किम् ?—

आद्या मात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत्।
तालव्यस्य तथौष्ठ्यस्य द्वितीया च यथाक्रमात् ॥ २० ॥

अन्वयः—एकार-ओकारयोः आद्या मात्रा कण्ठ्यस्य भवेत्, द्वितीया (मात्रा) च यथाक्रमात् (भवेत्)।

व्याख्या—एकारौकारयोः=एकारे ओकारे च, आद्या=प्रथमा (अद्वितीया) मात्रा, कण्ठ्यस्य = कण्ठवर्णस्य—अकारस्य (अकुहविसर्जनीयानां कण्ठः), भवेत् = स्यात्। द्वितीया मात्रा च, यथाक्रमात् = यथाक्रमानुसारेण। अत्र अव्ययीभावे 'नाव्ययीभावादतोऽम्त्वपञ्चम्याः' इति पाणिनीयसूत्रेणेति पर्युदासेनामभावः। अर्थात्—एकारे तालव्यस्य इकारस्य (इचुयशानां तालु), ओकारे ओष्ठ्यस्य उकारस्य (उपूपध्मानीयानामोष्ठौ) भवेत्। तेनात्र न ह्रस्वता प्रत्येतव्येति भावः। ए-ओग्रहणम् ऐ औ इत्यनयोरप्युपलक्षणम्। तथा च पाणिनीयशिक्षायामेतत् स्पष्टम्—'ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ। अर्धमात्रा तु कण्ठ्यस्य ह्येकारैकारयोर्भवेत् ॥ ओकारौकारयोर्मात्रा, तयोर्विवृतसंवृतम्'।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

हिन्दी—एकार-ओकार की मात्रा कहाँ कितनी होती है, इस विषय में

आचार्य कहते हैं—एकार और ओकार में पहली आधी मात्रा कण्ठ से उच्चरित अकार की होनी चाहिए और दूसरी आधी मात्रा यथाक्रम से एकार में तालव्य इकार की तथा ओकार में ओठ से उच्चरित उकार की होनी चाहिए। उससे यहाँ ह्रस्वता नहीं है। ए-ओ का ग्रहण ऐ-औ का भी उपलक्षक है।

ओङ्कारस्य कति प्लुतस्थानानि—

ॐकारस्तु प्लुतो ज्ञेयः प्लुतमग्ना द्वितीयकम्।
लाजीनिति तृतीयञ्च शाचीनिति चतुर्थकम्॥ २१॥
पञ्चमं तु विवेशाधः-स्विदासीदिति षष्ठकम्।
सप्तमन्तूपरिस्विदा ह्यष्टमं नैव विद्यते॥ २२॥

अन्वयः—ॐकारः प्लुतः तु ज्ञेयः, अग्ना द्वितीयकं प्लुतम्, लाजीन इति तृतीयं च, शाचीन् इति चतुर्थकम्, पञ्चमं तु विवेशः, अधःस्विद् आसीत् इति षष्ठकम्, उपरिस्विदा तु सप्तमं हि अष्टमं न एव विद्यते॥ २१-२२॥

व्याख्या—ॐकारः=त्रिगुणात्मकः त्र्यक्षरविशिष्टः (अ+उ+म्) परब्रह्मस्वरूपः अत एव प्रणवः, प्लुतः=मात्रात्रयसम्पन्नः त्रिमात्रिकः ('एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम्'॥) तु=निश्चये, ज्ञेयः। 'अग्ना' इति द्वितीयकं प्लुतं, 'लाजीन्' इति तृतीयं (प्लुतमिति सर्वत्र योज्यम्), 'शाचीन्' इति चतुर्थकम्, पञ्चमं तु=निश्चयेन 'विवेशः', अपि च—'अधःस्विद् आसीत्' इति षष्ठकम् (षष्ठमेव षष्ठकम्), अपरञ्च—'उपरिस्विदा' तु=इति तु सप्तमम्, उपर्युक्तान्येतानि तथैकमोङ्कारपदं सम्भूय सप्तसंख्यकान्येव पदानि प्लुतसमन्वितानि संहितायां सन्ति, अष्टमम्, हि=निश्चयेन, एभ्योऽतिरिक्तमन्यत् किमपि प्लुतयुतं पदं नास्ति इति सुनिश्चितम्, नैव विद्यते=नास्त्येव।

हिन्दी—त्रिगुणात्मक (सत्त्व-रज-तम) तीन अक्षरों के योग से बना (अ+उ+म्) परब्रह्मस्वरूप (ओमित्येकाक्षरं ब्रह्म) अतएव प्रणव (ॐ) ओंकार को प्लुत (त्रिमात्रिक) जानना चाहिए। इसी प्रकार 'अग्ना' द्वितीय प्लुत स्थान है, 'लाजीन्' यह तृतीय, 'शाचीन्' यह चतुर्थ और पाँचवाँ 'विवेश' तथा 'अधःस्विद् आसीत्' छठा और 'उपरिस्विद्' सातवाँ प्लुत स्थान है। इस प्रकार उपर्युक्त ए स्थान एवं ओंकार पद को

CC-0. Nepal Sanskrit Academy, Kathmandu. Digital Collection

मिलाकर सात ही पद प्लुत से युक्त हैं, इनके अतिरिक्त आठवाँ संहिता में है ही नहीं।

ऌकारस्य दीर्घत्वनिवारणम्—

ऌकारस्य तु दीर्घत्वं नास्ति वाजसनेयिनः।

अन्वयः—वाजसनेयिनः ऌकारस्य दीर्घत्वं तु न अस्ति इति मन्वते।

व्याख्या—वाजसनेयिनः—वाजस्य=अन्नस्य (वाजमन्नम्), सनिः=दानं (दानमेकं कलौ युगे), प्रतिदिनमन्नदानकर्तेति भावः; यस्य सः वाजसनिः=देवरातस्तदपत्यं वाजसनेयः=याज्ञवल्क्यः, सः अस्य अस्ति इति तस्य अनुयायिनः=वाजसनेयीसंहिताध्यायिनः, ऌकारस्य=ऌवर्णस्य, दीर्घत्वम्=दीर्घभावम्, तु=अपि, न=नहि, अस्ति=विद्यते।

हिन्दी—अन्न का निरन्तर दान करने वाले जो वाजसनि अर्थात् देवरात (देवरात का नाम ही निरन्तर वाज=अन्न, सनि=दान करने के कारण वाजसनि हो गया और वाजसनि के जो अपत्य हुए वे वाजसनेय कहलाये। वाजसनेय से याज्ञवल्क्य का ग्रहण होता है, उनके जो अनुयायी है अर्थात् वाजसनेयी संहिता के अध्ययन करने वाले हैं, उनके मत में ऌ वर्ण का दीर्घभाव नहीं होता अर्थात् वे दीर्घभेद नहीं मानते हैं।

यद्यनेकत्र स्वरिताभावस्तदा कथं स्वारो विधीयते—

नैतत् स्वरितपूर्वाङ्गे नापराङ्गे कथञ्चन।
न स्वरे न च मात्रायां कथं स्वारो विधीयते॥ २३॥

अन्वयः—स्वरितः पूर्वाङ्गे एतत् न, कथञ्चन अपराङ्गे अपि न, स्वरे न, मात्रायां न (तर्हि) कथं स्वारः विधीयते।

व्याख्या—अनेकव्यञ्जनसंयुक्तावसरे, स्वरितस्य=स्वर उदात्तादिः अस्य सञ्जात इति 'तारकादिभ्य इतच्' इति पाणिनिसूत्रेण तारकादित्वात् इतच् प्रत्ययः, तस्य—उदात्तादिस्वरविशिष्टस्य वर्णस्येत्यर्थः, पूर्वाङ्गे=पूर्वभागस्थिते वर्णे, एतत् स्वरणम्=उदात्तादिप्रयुक्तं हस्तचालनादि इति यावत्, न=नहि, भवति। कथञ्चन=केनापि प्रकारेण, पराङ्गे, ना=नहि, स्वरे=अचि (अचः स्वराः), न=न च, मात्रायां='देवम्बर्हिरित्यादौ विहितायां स्वरभक्तिनाम्न्याम्, न=नहि, (तर्हि) कथं=केन प्रकारेण स्वर एव स्वार उदात्तादिः, विधीयते=विधातव्य इत्येष प्रश्नः। अग्रिमे श्लोकेऽस्योत्तरं भवति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—स्वरित की स्थिति के विषय में आचार्य कहते हैं कि पूर्वाङ्ग में यह स्वरित नहीं है, अपरांग में भी स्वरित का रहना कदापि संभव नहीं है; इतना ही नहीं स्वरित न स्वर में है ओर न मात्रा में। यदि इन स्थानों पर नहीं है तो फिर कहाँ है? इसका उत्तर अग्रिम पद्य में दिया गया है।

विचक्षणः स्वारङ्कुत्र कुर्यात्—

पराङ्गस्य तु यत्पूर्वं पूर्वाङ्गस्य तु यत्परम्।
उभयोरर्द्धसंयोगे स्वारङ्कुर्याद्विचक्षणः ॥ २४ ॥
संयोगे तु परं स्वार्यं परं संयोगनायकम्।
संयुक्तस्य तु वर्णस्य न स्वार्यं पूर्वमक्षरम् ॥ २५ ॥

अन्वयः—पराङ्गस्य तु यत् पूर्वम्, पूर्वाङ्गस्य यत् परम्, उभयोः अर्द्ध-संयोगे विचक्षणः स्वारं कुर्यात् ॥ २४ ॥

संयोगे तु परं स्वार्यं, परं संयोगनायकम्, (अतः) संयुक्तस्य वर्णस्य तु पूर्वम् अक्षरं न स्वार्यम् ॥ २५ ॥

व्याख्या—पराङ्गस्य = परे अङ्गीभूतस्य, शु० य० प्रातिशाख्ये लक्षितस्य संयोगादि—यम-क्रमज-क्रमजोत्तराऽवसितान्यतमभिन्न-संयोगाऽवयववर्णस्य, तु = निश्चये पादपूर्त्यौ च, यत् = यत् किमपि, पूर्वम् अर्धम् (अस्ति), उत्तर-त्रापि तथा। पूर्वाङ्गस्य = संयोगाद्यवसितान्ताऽन्यतमस्य संयोगावयववर्णस्य, तु = निश्चयरूपेण, यत् = यत् किमपि, परम् अर्धम्, उभयोः = पराङ्ग-पूर्वाङ्गयोः, अर्धसंयोगे = पूर्वार्द्धपरार्धयोगे, विचक्षणः = विपश्चिद्वैदिकः, स्वर-सञ्चालने पण्डितः, स्वारम् = उदात्तादिकम्, कुर्यात् = प्रयोगं कुर्यात् ॥ २४ ॥

संयोगे = व्यञ्जनवर्णानां संयोगे, परम् = पराङ्गभूतं व्यञ्जनम्, स्वार्यम् = स्वराङ्गीभूतं, स्वरसंहितम्, कुर्यात् = सम्पादयेत् (कुतः = कथमिति), परम् = पराङ्गभूतं व्यञ्जनम्, संयोगनायकम्—संयोगेषु नायकम् = नेतारं मुख्यम् (भवति), अत्र विशेषः—पदयोर्विच्छेदे तेनैव व्यञ्जनेन उत्तर-पदस्याऽऽरम्भणीयत्वात्। (अतः = अस्मात् कारणात्) संयुक्तस्य = संयोगं प्राप्तस्य, वर्णस्य = अक्षरस्य, तु = निश्चयेन, पूर्वम् = पूर्वाङ्गे स्थितम्, अक्षरम् = व्यञ्जनवर्णम्, (उत्तरस्वरेण), न = नहि, स्वार्यम्। कारणञ्चात्र—तस्य पूर्वाङ्गव्यञ्जनस्य पूर्वस्वरेण सह विरतत्वात्।

हिन्दी—वैदिक विद्वान् 'स्वार' का प्रयोग कहाँ करें, इस विषय में आचार्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कहते हैं--परांग के (अर्थात्—पर में अंगीभूत शुक्लयजुर्वेद प्रातिशाख्य में लक्षित एवं चर्चित—संयोगादि यम-क्रमज-क्रमजोत्तर-अवसित-अन्यतमभिन्न संयोगावयव वर्ण के तो जो पूर्व अर्ध हैं और पूर्वाङ्ग के संयोग से अवसितान्त-पर्यन्त तक में अन्यतम संयोगावयव वर्ण का जो आधा दोनों परांग और पूर्वाङ्ग में (का) आधा संयोग होने पर पूर्वार्ध और परार्ध के योग में स्वर-संचालन में निपुण वैदिक विद्वान् स्वार (उदात्तादि) का प्रयोग करे।

संयोग में तो पर को स्वरयुक्त करना चाहिए, क्योंकि संयोग का नायक 'पर' (परांगभूत संयोग) होता है। संयुक्त वर्ण के पूर्व अक्षर को स्वर युक्त नहीं करना चाहिए। कहने का तात्पर्य यह है कि संयुक्त वर्ण में न्यूनतम दो वर्ण होते हैं, इनमें पूर्व वर्ण को उत्तर वर्ण के स्वर से जोड़ना नहीं चाहिए। क्योंकि उसके पूर्वाङ्ग व्यञ्जन का पूर्व स्वर के साथ ही विरत हो जाता है।

स्वरेण सन्धौ व्यञ्जनस्य कथमङ्गता भवति—

अवग्रहे पदच्छेद उदात्तो दृश्यते यदि।
स्वरान्तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम् ॥ २६ ॥

अन्वयः—अवग्रहे पदच्छेदे यदि उदात्तः दृश्यते, (तदा) स्वरान्तं स्वरितं प्राहुः, (यतः) सन्धौ तु परं स्वार्यते (न पूर्वम्)।

व्याख्या—अवग्रहे=समासादिविशिष्टपदानां पदपाठकाले पदप्रकृति-प्रदर्शनार्थं विच्छेदे, पदच्छेदे=संहितापाठस्य पदपाठकाले पदानां छेदे च, यदि =चेत्, उदात्तः=उदात्तस्वरः, दृश्यते=अवलोक्यते, स्वरिते परे, तदा= तस्मिन् काले, स्वरान्तं—स्वरस्य=उदात्तस्वरस्य, अन्तम्=अन्ते स्थितं व्यञ्जनम् इति, संहिताकाले, स्वरितं=स्वरितस्वरेण स्वरयितव्यम्, प्राहुः= प्रोचुः। अत्रोदात्तस्वरितग्रहणं स्वरमात्रस्योपलक्षणम्। यतः=यस्मात् कारणात्, सन्धौ=व्यञ्जनस्य परेण स्वरेण संहितायाम्, तु=पुनः, पूर्वाङ्गव्यञ्जनेऽपि परम्, स्वार्यते=स्वरमिवाचरते, न पूर्वम्, पदच्छेदेऽवसानगतस्य व्यञ्जनस्य पूर्वाङ्गत्वेन पूर्वस्वरस्योदात्तस्य प्राप्तौ सन्धौ जाते पुनः परस्याङ्गताऽनेन निर्धार्यते इति भावः।

हिन्दी—स्वर के द्वारा सन्धि में व्यञ्जन की कैसे अंगता होती है, इस विषय में आचार्य कहते हैं कि यदि अवग्रह और पदच्छेद में (पदपाठ) स्वरितपरक उदात्त स्वर दिखायी दे अर्थात् हो तो (ऐसी स्थिति में)

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

उदात्त स्वर के अन्तिम वर्ण को स्वरित कहा गया है तथा सन्धि में पर वर्ण में पूर्व वर्ण को आत्मसात् करना चाहिए।

व्यञ्जने परं कथं स्वायँम्—

स्वरसन्धिविधानेन नीचोच्चत्वं विधीयते।
व्यञ्जनाद्वा स्वराद्वापि तत्सन्धौ स्वर उच्यते ॥ २७ ॥

अन्वयः—स्वरसन्धिविधानेन व्यञ्जनाद् वा स्वराद् वा अपि (परेषाम् अक्षराणाम्) नीच-उच्चत्वं विधीयते तत् सन्धौ अपि स्वर उच्यते।

व्याख्या—स्वरसन्धिविधानेन = स्वरसन्धेः विधानं तेन, व्यञ्जनाद् = व्यञ्जनवर्णात्, स्वराद् = स्वरवर्णाद् वापि, परेषाम् अक्षराणाम्, नीचोच्चत्वं—नीचम् = अनुदात्तम्, उच्चत्वम् = उदात्तत्वम्, विधीयते = क्रियते, भवति, तत् = तस्मात् कारणात्, सन्धौ = व्यञ्जनानां स्वरैः संहितायाम्, अपि = च, स्वर उच्यते = स्वरः कथ्यते। तथा च प्रातिशाख्ये—'प्रागुवर्णादक्षराणामेकीभावः' इत्यधिकारेण अक्षराणाम् एकीभावत्वम् उक्त्वा स्वराणाम् 'उदात्ताच्च' इत्यादिना व्यञ्जनव्यवहितानाम् अपि स्वरसन्धिः उक्तः प्रातिशाख्ये। तेन 'सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्' इति सव्यञ्जने स्वरे सन्धिस्वरस्य दर्शनात् व्यञ्जनेऽपि स्वरणं फलितम्।

हिन्दी—व्यञ्जन वर्ण के पर रहने पर उसमें स्वरितत्व (स्वर) कैसे होता है, इस विषय में आचार्य कहते हैं—स्वरसन्धि के विधान से नीच (अनुदात्त = नीचैरनुदात्तः) उच्चत्व (उदात्त = उच्चैरुदात्तः) को प्राप्त करता है, अर्थात्—अनुदात्त भी उदात्त हो जाता है तथा व्यञ्जन अथवा स्वर वर्णों के बाद जो वर्ण रहता है, वहाँ सन्धि में स्वर होता है।

[उदात्तादनुदात्ते तु वामाया भ्रुव आरभेत्।
[1]स्वरिते चानुदात्तं च क्रमात् दक्षिणतो न्यसेत् ॥
[2]स्वरितादुत्तरे येऽत्र प्रचयांस्तान् प्रचक्षते।
एकस्वरानापि च तानाहुस्तत्त्वार्थचिन्तकाः ॥
प्रचया यत्र दृश्यन्ते तत्र हन्यात् स्वरं बुधः।
स्वरितः केवलो यत्र मृदुं तत्र निपातयेत् ॥]

---

१. उदात्तस्वरितोदात्ताः (मूलपाठः)।
२. स्वरितादनुदात्ताः (मूलपाठः)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतानि पद्यान्युपर्युक्तानि याज्ञवल्क्य-शिक्षायाः स्वरप्रकरणे ५७, ५९, ६१ पद्येषु व्याख्यातानि सन्ति ततोऽवधेयानि ।

हिन्दी--उपर्युक्त ये तीनों पद्य याज्ञवल्क्यशिक्षा के स्वरप्रकरण में श्लोक सं० ५७, ५९ और ६१ संख्यक पद्यों में व्याख्यात है, इनका अर्थ वहीं से ज्ञात करना चाहिए ।

व्यञ्जनानां स्वराङ्गता कथं भवति—

दुर्बलस्य यथा राष्ट्रं हरते बलवान् नृपः ।
एवं व्यञ्जनमासाद्य अकारो हरति स्वरम् ॥ २८ ॥

अन्वयः—बलवान् नृपः यथा दुर्बलस्य राज्ञः राष्ट्रं हरते, एवम् अकारः व्यञ्जनम् आसाद्य स्वरं प्रति हरते ।

व्याख्या--बलवान्=बलशाली, अत्यधिकबलयुक्तः, नृपः—नॄन् पातीति नृपः=सम्राट्, दुर्बलस्य=बलरहितस्यात एव क्षीणस्य, राज्ञः=सामन्तभूपतेः, राष्ट्रं=तदधीनं राज्यम्, हरते=हरणं करोति, स्वाधीनं करोति, एवम्=अनेनैव प्रकारेण, अकारः=अवर्णः, व्यञ्जनं=व्यञ्जनवर्णम्, आसाद्य=प्राप्य, स्वरं=स्वरवर्णं, प्रति, हरति=आहरति । अत्र अकार इत्यनेन अचः उपलक्षणम्, तेन व्यञ्जनं स्वाङ्गिस्वरेण एव समानस्वरम् इति भावः ।

हिन्दी—अब प्रश्न यह उठता है कि क्या व्यञ्जन वर्ण भी कभी स्वर हो जाता है ? हाँ, हो जाता है—इसे समुचित उदाहरण के द्वारा आचार्य स्पष्ट करते हैं—जैसे सर्वप्रभुतासम्पन्न बलशाली आक्रामक बड़ा राजा (सम्राट्) अपने से दुर्बल छोटे राजा का राज्य हड़प लेता है, और जिस प्रकार बड़ी मछली छोटी मछली को निगल जाती है, उसी प्रकार अकार=अवर्ण व्यञ्जन वर्ण को प्राप्त कर अपने अंगी स्वर के साथ समान स्वर वाला हो जाता है । इसी को अग्रिम पद्यों में स्पष्ट किया गया है ।

व्यञ्जनस्य सस्वरत्वं कथं कुत्र जायते—

स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ॥ २९ ॥

अन्वयः--स्वरः उच्चः, स्वरः नीचः, स्वरः एव स्वरितः (भवति), (अतः) त्रैस्वर्यं स्वरप्रधानं, तेन व्यञ्जनं सस्वरम् (ज्ञेयमिति) ।

CC-0. Nepal Sanskrit Academy. Kathmandu. Digitized by eGangotri

व्याख्या—स्वरः=अकारादिवर्णः, (अचः स्वराः), उच्चः=उच्च-स्थानीय उदात्तः, स्वरोऽकारादिरेव, नीचः=अनुदात्तः (नीचैरनुदात्तः), स्वरः=अकारादिः एव च स्वरितः (भवति), अतः=अस्मात् कारणात्, त्रैस्वर्यम्=उदात्तादित्रयम्, स्वरः=अकारादिः, प्रधानं=मुख्यतया नीचोच्चादि-विधौ समुद्दिष्टं यत्र तत् स्वरप्रधानम् (ज्ञेयम्)।

हिन्दी—व्यञ्जन वर्ण का स्वरत्व में कहाँ कैसे परिवर्तित हो जाता है, इस विषय में आचार्य कहते हैं—स्वर अर्थात् अकारादि वर्ण उच्चस्थानीय उदात्त होते हैं तथा स्वर=अकारादि ही नीच=अनुदात्त होते हैं और अकारादि स्वर ही स्वरित हैं। इसलिए त्रैस्वर्य (उदात्त, अनुदात्त और स्वरित) स्वर अकारादि-प्रधान मुख्य रूप से नीच-उच्च के विधान में कथित है, अतः वहाँ वह स्वर प्रधान है, यह जानना चाहिए। इस प्रकार अकारादि स्वर से व्यञ्जन वर्ण भी सस्वर है, समानोदात्तादि है, यह सिद्ध होता है।

स्वर-व्यञ्जनयोः सामानाधिकरण्यम्—

मणिवद् व्यञ्जनान्याहुः सूत्रवत् स्वर इष्यते।
व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सस्वरः॥ ३०॥

अन्वयः—मणिवद् व्यञ्जनानि आहुः, स्वरः सूत्रवत् इष्यते, यत्र (अच्) सस्वरः तिष्ठति, (तत्र) व्यञ्जनानि अनुवर्तन्ते।

व्याख्या—मणिवद्=यथा कस्यामपि मालायां मणिः सुमेरुरिव तिष्ठति तद्वत्, व्यञ्जनानि=व्यञ्जनवर्णानि; आहुः=मणिवत् कथयन्ति, मालाया-मनुस्यूतीकरणे सूत्रस्यावश्यकता भवति, स्वरः सूत्रवत् इष्यते=कथ्यते। अनेन प्रकारेणोदाहरणेन संयोज्य निःसृष्टार्थम् उत्तरार्धेन व्यज्यते—यत्र=यस्मिन् स्थाने, अच्, सस्वरः=स्वरेण सहितः, उदात्तादिसहितः, तिष्ठति=स्थितो भवति, तत्र=तस्मिन् स्थाने, तमचं (तम् अचम्) व्यञ्जनानि अपि अनुवर्तन्ते। तेन स्वरेणैव व्यञ्जनानि अपि स्वरयितव्यानि।

हिन्दी—स्वर और व्यञ्जन का समानाधिकरण कैसे होता है, इसे स्पष्ट करते हुए आचार्य कहते हैं—जिस प्रकार माला में मणियाँ सूत्र (पिरोये जाने का सूत) के अधीन होती हैं (सूत्र तो मुख्य रूप से मणि का आधारभूत होता है), उसी प्रकार व्यञ्जन वर्ण भी स्वर के अधीन होते हैं। इस दृष्टान्त के साथ आचार्य कहते हैं—मणि के समान व्यञ्जन वर्ण कहे गये हैं, स्वर

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तो सूत्र के समान माने गये हैं। जहाँ अच् स्वर सहित उदात्तादिविशिष्ट रहता है वहाँ उस अच् का व्यञ्जन वर्ण अनुगमन करते हैं। इससे यह स्पष्ट हुआ कि स्वर से ही व्यञ्जनों को भी स्वर युक्त करना चाहिए।

विस्वरं कं विजानीयात्—

उदात्तं नानुवर्त्तेत नीचं न स्वरितं तथा।
विस्वरं तं विजानीयाद् दीर्घह्रस्वविवर्जितम् ॥ ३१ ॥

अन्वयः—(यो वर्णः) उदात्तं न नीचं तथा स्वरितं न अनुवर्त्तेत, (अत एव) दीर्घ-ह्रस्वविवर्जितं तं विस्वरं विजानीयात्।

व्याख्या—(यो वर्णः) उदात्तम्=उच्चस्थितं वर्णम् उदात्तम्, न=नहि, नीचम्=अनुदात्तम्, तथा=तथैव, स्वरितम्=स्वरितवर्णम् (समाहारः स्वरितः), न=नहि, अनुवर्त्तेत=अनुगमनं कुर्यात्, अत्र कारणम्—अवग्रहादि-पदच्छेदे स्वरसन्धिराहित्यं विद्यते। अत एव दीर्घ-ह्रस्वादिमात्राविवर्जितं व्यञ्जनात्मकं तं वर्णं—विस्वरं=नीचादिस्वरविहीनं, विजानीयात्=यत्न-पूर्वकं एतद् ज्ञानं कुर्यात्। अत्रायमभिप्रायो यत्—अर्थात् केवलो व्यञ्जनः उदात्तादिस्वरेण न स्वरणीय इति।

हिन्दी—विस्वर किसे जानना चाहिए, इस विषय में आचार्य कहते हैं—जो वर्ण उदात्त और अनुदात्त का अनुगमन नहीं करता अर्थात् उसकी अधीनता नहीं स्वीकार करता, वह स्वर पूर्व स्वर की भाँति नहीं है। अतः ह्रस्व-दीर्घ से रहित अथवा ह्रस्व-दीर्घ के प्रतिकूल उच्चारण को 'विस्वर' इस नाम से जानना चाहिए।

व्यञ्जनबाहुल्येषु पदेषु कथं स्वरनियमनम्—

हरि-वरुण-वरेण्याश्च धारा-पुरुषौ तथा।
विश्वानरं विहायैकं शेषा रः स्वरिता नराः ॥ ३२ ॥

अन्वयः—हरि-वरुण-वरेण्याः च धारा-पुरुषौ तथा एकं विश्वानरं विहाय, शेषाः नराः रः स्वरिताः भवन्ति।

व्याख्या—हरि-वरुण-वरेण्य-धारा-पुरुषाः इत्येते पञ्चशब्दाः, तथा=तथैव, विश्वानर इति पदघटितम् एकं नरशब्दं, विहाय=त्यक्त्वा, शेषाः=एतदतिरिक्ताः नरशब्दाः, रः=रकारः, स्वरितो येषु ते,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रेफविशिष्टाक्षरे स्वरितत्वसमन्विताः भवन्ति इति । एतेषामुदाहरणानि शुक्लयजुर्वेदसंहितायां तत्तत्स्थलेषु यथा—'योजान्विन्द्रते हरी', हरिवान्नऽइन्द्रः, व्वातस्य जूतिं वरुणस्य, तत्सवितुर्व्वरेण्यम्, घृतस्य धारा' इत्यादिषु रेफविशिष्टाक्षरस्य स्वरितत्वम् । तथा च—'व्विश्वानराय व्विश्वाभुवे' इत्यत्र विश्वानरघटितनरशब्दे रेफविशिष्टाक्षरस्य स्वरितत्वं न । अन्यत्र नरशब्देषु 'व्विश्वान्नरः' इत्येवमादिषु तु रेफविशिष्टाक्षरस्यैव स्वरितत्वम् इति ।

हिन्दी—व्यंजन वर्णबाहुल्य पदों में स्वर-नियमन कैसे होता है—इस विषय में आचार्य कहते हैं कि हरि-वरुण-वरेण्य और धारा पुरुष तथा विश्वानर इन सबों को छोड़कर, इनके अतिरिक्त जहाँ नरपरक रेफ हों उन्हें स्वरित जानना चाहिए । इनके उदाहरण शुक्लयजुर्वेदसंहिता के विभिन्न मंत्रों में प्राप्त होते हैं; जैसे कि—'मती योजान्विन्द्र ते हरी', 'हरिवान्न इन्द्रः' इत्यादि में रेफविशिष्ट अक्षर का स्वरितत्व होगा तथा 'व्विश्वानराय व्विश्वाभुवे' यहाँ विश्वानर शब्दघटित नर शब्द में रेफविशिष्ट अक्षर का स्वरितत्व नहीं होगा । अन्यत्र नर शब्दों में जैसे 'व्विश्वान्नरः' ऐसे स्थलों में तो रेफविशिष्ट अक्षर का ही स्वरितत्व हो ऐसा नियम है ।

रेफविशिष्टाक्षरे स्वरितविशिष्टत्वनियमस्य कुत्र कुत्रापवादः—

द्वौ वरुणौ वस्वरितौ उदुत्तमं त्वँ-व्वरुणौ ।
धाकारे चोरुधारायां तथा धारे च दोहने ॥ ३३ ॥

अन्वयः—उदुत्तमं व्वरुण त्वँ व्वरुण (इति) द्वौ वरुणौ वस्वरितौ (ज्ञेयौ) च उरुधारायां धाकारे च धारशब्दे दोहने च एव (स्वरितत्वम्) ।

व्याख्या—शुक्लयजुर्वेदसंहितायां प्रोक्तौ—'उदुत्तमं व्वरुण', 'त्वँव्वरुण' इति द्वौ वरुणौ, वस्वरितौ—वकारः स्वरितो ययोः तौ वस्वरितौ = वकारविशिष्टाक्षरे स्वरितत्वयुक्तौ विज्ञेयौ । च = पुनः, उरुधारायां = 'धुक्ष्वोरुधारा पयस्वती' इत्यत्र उरुधाराशब्दे, तथा 'धारयामा नमोभिः' इत्यादौ धारशब्दे, च = पुनः, दोहने = दोहनात्मककर्मणि विनियुक्तमन्त्रघटिते शतधारशब्दे, 'व्वसोः' पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम्०' इत्यत्र शतधारशब्दे धारशब्देनैव [illegible] सिद्धे पुनः दोहने विशिष्योपादानम् अत्रैव स्यात् सहस्रधारे मा भूत् इति नियमार्थम् । धाकारे एव स्वरितत्वम् । स्वरित-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकरणाच्च स्वरितत्वलाभः, न तु रेफविशिष्टाक्षरे स्वरितत्वं बोध्यम् इत्याशयः ।

हिन्दी--रेफविशिष्ट अक्षर में स्वरितविशिष्टत्व नियम का कहाँ-कहाँ अपवाद होता है, इस विषय में आचार्य कहते हैं—शुक्लयजुर्वेदसंहिता में कथित 'उदुत्तमं व्वरुण' तथा 'त्वं व्वरुण' में स्थित द्रो वरुण हुए। यहाँ वकार-विशिष्ट अक्षर को स्वरितत्व युक्त जानें। और 'घुक्वोरुधारा' एवं 'धारया मा नमोभिः' में आये उरुधारा तथा धार पदों के धा वर्ण को भी स्वरित जानना चाहिए।

विमर्श—धार शब्द से ही शतधार सिद्ध होने पर फिर दोहन का विशेष रूप से उपपादन निश्चय हेतु है, जिससे 'सहस्रधारे' में न हो इसे नियमित करने के लिए है।

स्वरितानां विविधरूपाणि—

(क) [मात्रिकं वा द्विमात्रं वा स्वार्यते यदिहाक्षरम् ।
तस्यादितोऽर्द्धमात्रा स्याच्छेषं तु परतो भवेत् ॥

(ख) उच्चस्थानगते हस्ते स्वरितं नोपपद्यते ।
अधस्तात्तु यदा गच्छेत् स्वरितं नापि तद्भवेत् ॥

(ग) उच्चादुच्चतरं नास्ति नीचान्नीचतरं तथा ।
अक्षराणि च तुल्यानि प्रचितान्युच्चगानि च ॥

(घ) स्वर उच्चः स्वरो नीचः स्वरः स्वरित एव च ।
स्वरप्रधानं ह्रस्वर्यं व्यञ्जनं तेन सस्वरम् ॥

(ङ) मणिवद् व्यञ्जनान्याहुः सूत्रवत्स्वरतोऽभ्यसेत् ।
व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सस्वरः ॥

(च) आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः ।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः ॥

(छ) उदात्तं नानुवर्त्तेत नीचं न स्वरितं तथा ।
विस्वरं तं विजानीयाद् दीर्घह्रस्वविवर्जितम् ॥]

अन्वयार्थ विवृतौ—एषु पद्येषु क ख इत्यङ्किते पद्ये याज्ञवल्क्यशिक्षायां स्वरप्रकरणे व्याख्याते। तथैव ग-चिह्नाङ्कितं पद्यं तत्रैव ५८–५९ चर्चितम्,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्णप्रकरणे च घ-ङ-छचिह्नितानि पद्यानि व्याख्यातानि सन्ति। केवलं 'च'-चिह्नितं प्रकीर्णकाऽधिकारे व्याख्यास्यते।

हिन्दी--इन उपर्युक्त पद्यों में क ख चिह्नित पद्य या० व० शि० स्वर-प्रकरण में व्याख्यात हैं, साथ ही ग चिह्नाङ्कित पद्य भी वहीं व्याख्यात है और घ ङ च चिह्नित पद्य वर्णप्रकरण में व्याख्यात हैं। इनकी व्याख्या वहाँ तत्तद् स्थलों में देखना चाहिए। केवल च चिह्नित पद्य प्रकीर्णकाधिकार में व्याख्यात होगा।

मोक्षं कुत्र न कारयेत्—

प्रथमा यत्र दृश्यन्ते सन्धिस्थानेषु पूर्वतः।
स्ववर्गीयेण संयुक्ता मोक्षं तत्र न कारयेत्॥ ३४॥

अन्वयः—यत्र सन्धिस्थानेषु स्ववर्गीयेण संयुक्ताः प्रथमाः पूर्वतः दृश्यन्ते, तत्र मोक्षं न कारयेत्।

व्याख्या--यत्र=यस्मिन् स्थाने, सन्धिस्थानेषु=द्विरुक्त्यादिसंहितासु, स्ववर्गीयेण=क्रमजादि-समान-स्थानकरणेन स्पर्शेन, संयुक्ताः=सम्मिलिताः, प्रथमाः=कचटतपाः, पूर्वतः=पूर्वस्वराङ्गीभूताः, दृश्यन्ते=अवलोक्यन्ते, उपलभ्यन्ते, तत्र=समानस्पर्शयोर्मध्ये, मोक्षम्=स्थानकरणविमोकम्, न=नहि, कारयेत्=कुर्वीत। स्वार्थे णिच्, संहितापाठ इति। अत्रायमाशयः—स्थानकरणसंयोगरूपेण एकेन प्रयत्नेन मुखसन्धारणविशेषात् पूर्वं स्पर्शं स्थानकरणविच्छेदम् अकृत्वैव उच्चार्यं, द्वितीयं पूर्वसजातीयवर्णम् स्थानकरणविच्छेदेन उच्चारणीयम्। उदाहरणानि संहितायामनेकत्र विद्यन्ते।

हिन्दी--स्थान आदि से निर्दिष्ट नियमों के त्याग से मोक्ष होता है। ऐसा मोक्ष कहाँ नहीं करना चाहिए, इस विषय में आचार्य कहते हैं—जहाँ सन्धिस्थानों में पूर्व से किंवा पूर्व स्वरसंयुक्तपूर्वक प्रथम वर्ण (कवर्गादि पाँच वर्गों के क्रमशः—क च ट त प) दिखाई दें और वे वर्ण अपने वर्ग के समान वर्ण के साथ प्रयुक्त हुए हों तो वहाँ मोक्ष नहीं करना चाहिए।

'स्पर्शान्तस्य स्थानकरणविमोक्षः' इति प्रातिशाख्योक्तप्राप्तं पदान्तविच्छेदं मोक्षं कुत्र न कुर्वीत—

तकारान्ते पदे पूर्वे चवर्गे परतः स्थिते।
मोक्षं तत्र न कुर्वीत यत्र शेषे निरर्थकम्॥ ३५॥

CC-0. Nepal Sanskrit University. Kathmandu Collection

अन्वयः—तकारान्ते पदे पूर्वे (सति) परतः चवर्गे स्थिते (सति) तत्र मोक्षं न कुर्वीत । 'यच्च शेपे' निदर्शनम् ।

व्याख्या—तकारान्ते=तकारः अन्ते यस्य एतादृशे मन्त्रे पदे, पूर्वे=पूर्वार्द्धपदे, परतः उत्तरार्धे च, चवर्गे=ववर्णे, स्थिते=वर्तमाने, सति=तस्यामवस्थायाम्, तत्र=तस्मिन् स्थाने, मोक्षं=पदान्तविच्छेदं मोक्षं, न=नहि कुर्वीत । अत्रोदाहरणं यथा 'यच्च शेपे' इत्यत्र पूर्वार्द्धपदस्यान्ते 'यत्' इत्यस्य तकारः एवमेव 'च शेपे' इत्युत्तरपदस्य चकार अवस्थितः, अतोऽस्य उच्चारणे मोक्षो न कर्त्तव्यः । इति=एतत्, निदर्शनम्=उपलक्षणम्, भवति । तथाविधेनाचरणेन पदद्वयनिष्ठस्यापि समानवर्णद्वयस्य संहितायां संयोगादिवर्णेन स्थानकरणविमोक्षः । यथा संहितायाम्—'युड्ङःसि', 'तद्देवामाम्' इत्यादौ । तथाहि—'द्विवर्णमेकं वर्णवद् धारणात् स्वरमध्ये समानपदे' इति प्रातिशाख्योक्ते उव्वटाचार्याः कथयन्ति—समानपदग्रहणेन च संहिता लक्ष्यते । पदविच्छेदे (धारणा) न भवति । यथा—'इमम् मे' इति । किञ्च 'स्पर्शान्तस्ये'ति भाष्येऽपि—अन्येन प्रयत्नेन अन्यत् पदमारब्धव्यम् । अत्र अलमत्यधिकेन विमर्शेण ।

हिन्दी—स्पर्श वर्ण के अन्त का स्थानकरणविमोक्ष प्रातिशाख्य में कहा गया है, तदनुसार पदान्तविच्छेद स्वरूप मोक्ष को कहाँ नहीं करना चाहिए, इस विषय में आचार्य कहते हैं—मंत्र के प्राथमिक (पूर्वार्ध) पद में यदि तकार अन्त में पाया जाय तथा उत्तरार्ध के आदि में चकार स्थित हो तो ऐसी स्थिति में वहाँ मोक्ष नहीं करना चाहिए । यह बात उदाहरण से स्पष्ट किया जाता है कि संहिता में 'यच्च शेपे' इस मन्त्र में 'यत्' पूर्वार्ध पद के अन्त में तकार और 'च शेपे' उत्तरपद के आदि में चकार विद्यमान है, अतः इसके उच्चारण में मोक्ष नहीं करना चाहिए ।

यत्तु केषाञ्चिन्मते शरि प्रथमाः स्वद्वितीयत्वं प्राप्नुवन्ति तन्निवारणं यथा—

ककारान्ते पदे पूर्वे सकारे परतः स्थिते ।
ख सवर्णं विजानीयात् 'भिषक् क्सीसे' निदर्शनम् ॥ ३६ ॥
टकारान्ते पदे पूर्वे सकारे परतः स्थिते ।
ठ सवर्णं विजानीयात् 'सम्राट्ट्सम्भृत' दर्शनम् ॥ ३७ ॥

CC-0. Nanaji Deshmukh Library, BJP, Jammu. Collection. Digitized by eGangotri

(पकारान्ते पदे पूर्वे सकारे परतः स्थिते ।
फ सवर्णं विजानीयादप्स्वग्न इति दर्शनम् ॥)
पकारान्ते पदे पूर्वे शकारे परतः स्थिते ।
फ सवर्णं विजानीयादनुष्टुप्शारदीति च ॥ ३८ ॥

अन्वयः—(मन्त्रस्य) पूर्वे ककारान्ते पदे, परतः सकारे स्थिते ख सवर्णं विजानीयात्, 'भिषक्सीसे' निदर्शनम् । पूर्वे टकारान्ते पदे परतः सकारे स्थिते ठ सवर्णं विजानीयात्, 'सम्राट्सम्भृत दर्शनम् । (पूर्वे पकारान्ते पदे परतः सकारे स्थिते फ सवर्णं विजानीयात्, 'अप्स्वग्न' इति दर्शनम् ।) पूर्वे पकारान्ते पदे परतः शकारे स्थिते फ सवर्णं विजानीयात्, 'अनुष्टुप्शारदीति' च ।

व्याख्या—शरि प्रथमाः स्वद्वितीयत्वं कुत्र कुत्र धारयन्ति इति जिज्ञासायामाहाचार्यः—'भिषक्सीसे', 'सम्राट्सम्भृतः', 'अनुष्टुप्शारदी' इत्यादिषु स्थानेषु 'असस्थाने मुदि द्वितीय ठंः शौनकस्य' इति प्रातिशाख्योक्तनिर्देशात् शौनकाचार्यमते द्वितीयाः ख-ठ-फाः क्रमशः भवन्ति इति । इत्यत्र आचार्येण स्वमतप्रदर्शनाय 'भिषक्सीसे' इत्यादि प्रकृत्या निदर्शनेन माध्यन्दिनानां यजुर्वेदिनां मते द्वितीयवर्णाः न भवन्तीति विज्ञापितम् अस्मात्कारणात् तैः प्रकृत्यैव पठ्यन्ते न द्वितीयापत्तिं कृत्वा 'अप्स्वग्ने' इत्युदाहरणघटितं पद्यं तु 'अनुष्टुप् शारदी'तिवत् व्याख्येयम् ।

हिन्दी—आचार्य शौनक के मत में शर् प्रत्याहार (श ष स) के परे वर्ग के प्रथम अक्षर 'क ट प' अपने वर्ग के द्वितीय अक्षर (ख ठ फ) को प्राप्त होते हैं, इस विषय का निवारण करते हुए कहते हैं कि यदि पूर्व में ककारान्त पद के रहते हुए यदि पर में सकार हो तो उसको ख सवर्ण जानना चाहिए । ऐसी स्थिति में क-स के बीच सवर्ण खकार का आगम होता है और वह 'क्' होकर ही रहता है; जैसे 'भिषक्सीसे' । इसी प्रकार यदि पूर्व में टकारान्त पद हो तथा आगे पर में सकार हो तो ट का सवर्ण ठ जानना चाहिए; यथा—सम्राट् + सम्भृत के बीच एक ठकार का आगम होगा और पूर्व स्थित ट के कारण ठ का भी वही स्वरूप हो जायेगा—'सम्राट्ट् सम्भृत' । ऐसे ही पूर्वार्द्ध पद के अन्त में यदि पकार विद्यमान हो और उत्तर पद के प्रारम्भ में सकार पड़ता हों तो दोनों के मध्य में 'फ' का आगम होगा और उसका रूपान्तर पकार ही हो जायेगा । यथा—अनुष्टुप + शारदी = अनुष्टुप्शारदीति च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साम्प्रतं सस्थानेऽपि मुदि आपस्तम्बमुनिमतेन या द्वितीयापत्तिस्तस्याः निरसनम् —

तकारान्ते पदे पूर्वे सकारे परतः स्थिते।
थ सवर्णं विजानीयात् 'तत्सवितुर्निदर्शनम्' ॥ ३९ ॥
नैतन्माध्यन्दिनीयानां सस्थानत्त्वात्तयोर्द्वयोः।
सस्थानेऽपि द्वितीयं स्यादापस्तम्बस्य यन्मतम् ॥ ४० ॥

अन्वयः—तकारान्ते पदे पूर्वे सति परतः सकारे (च) स्थिते थ सवर्णं विजानीयात्, 'तत्सवितुर्निदशनम्'। सस्थाने अपि द्वितीयं स्यात् इति यत् आपस्तम्बस्य मतम् एतत् (मतं) माध्यन्दिनीयानां तयोः द्वयोः सस्थानत्वात् न (इष्यते)।

व्याख्या — तकारान्ते — तकारः = तवर्णः अन्ते यस्य तस्मिन्, पदे पूर्वे = पूर्वतः, सति = विद्यमाने, परतः = परस्मात्, सकारे = सकारवर्णे, स्थिते = विद्यमाने, थ सवर्णं = समानवर्णकं, विजानीयात् = विद्यात्। अत्र = अस्मिन् स्थाने, निदर्शनम् = उदाहरणम्, 'तत्सवितुरि'ति।

सस्थानेऽपि = स्थानसहितेऽपि, द्वितीयं = द्वितीयवर्णं स्यात् इति = इत्येवं, यत् = प्रस्तुतम्, आपस्तम्बस्य = एतन्नामकस्य मुनेः आचार्यस्य, मतम् अस्ति, एतत् = तत् (मतं) माध्यन्दिनीयानाम् = कात्यायनादिप्रातिशाख्यकाराणां, तयोः = तसयोः, द्वयोः = उभयोः, स्थानिनिमित्तयोरिति यावत्, सस्थानत्वात् = समानस्थानोत्पन्नत्वात्, न = नह्येव, इष्यते = भावयते।

हिन्दी — सम्प्रति स्थान समान होने पर आपस्तम्ब मुनि के मत से जो द्वितीय आपत्ति हुई है उसका निराकरण आचार्य करते हैं — यदि तकारान्त पद पूर्वार्द्ध में स्थित हो, दूसरी ओर प्रारम्भ में सकार हो तो दोनों के मध्य थ सवर्ण का आगम होगा। जैसा कि 'तत्सवितुः' में दर्शनीय है। स्थान सहित होने पर भी द्वितीय वर्ण हो — यह जो मुनिवर आपस्तम्ब का मंत है वह मत माध्यन्दिनीय कात्यायन आदि ऋषियों को मान्य नहीं है।

कसवर्णं तसवर्णञ्च कदा विजानीयात् —

(क) ङकारान्ते पदे पूर्वे सकारे परतः स्थिते।
कसवर्णं विजानीयात् 'प्राङ्वसोम' इति दर्शनम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(ख) नकारान्ते पदे पूर्वे सकारे परतः स्थिते।
तसवर्णं विजानीयात् 'त्रीन्त्समुद्द्रान्' निदर्शनम् ॥

अन्वयः—ङकारान्ते पूर्वे पदे, परतः सकारे स्थिते कसवर्णं विजानीयात्। 'प्राङ्क्सोम' इति निदर्शनम्। (च) नकारान्ते पूर्वे पदे, परतः सकारे स्थिते तसवर्णं विजानीयात्। 'त्रीन्त्समुद्द्रान्' इति निदर्शनम् (भवति)।

व्याख्या—उपर्युक्तयोः क-खपद्ययोरर्थः यद्यपि याज्ञवल्क्यशिक्षायाः वर्ण-प्रकरणे वर्णागमे व्याख्यातोऽस्ति, तथापि विस्तरेण यथा—ङकारान्ते = ङकारः अन्ते यस्य एवम्भूते, पूर्वे = पूर्वभागे भवेत्, अथ च परतः = उत्तरार्धे, सकारे = सकारवर्णे, स्थिते = विद्यमाने, क सवर्णं = वर्णसहितं, विजानीयात् = ज्ञेयः, यथा—'प्राङ्क्सोम' इत्यत्र कवर्गीय आगमः सञ्जातः, इति निदर्शनम् = उदाहरणम्।

नकारान्ते = नकार अन्ते यस्य तस्मिन्, पूर्वे = पूर्वपादे, नकारान्तपदं यदि स्यात्, परतः = उत्तरपादे सकारे स्थिते तकारस्य, सवर्णं = समानवर्णकं जानीयात्। यथा—'त्रीन्त्समुद्द्रान्' इत्यत्र तवर्गीयो दकारः सञ्जातः, एतदेव निदर्शनम् = उदाहरणमस्ति।

हिन्दी—उपर्युक्त क ख पद्यों का अर्थ यद्यपि याज्ञवल्क्यशिक्षा के वर्ण-प्रकरण वर्णागम में व्याख्यात है, फिर भी सौकर्य के लिए यहाँ भी दिया जा रहा है—जहाँ पद्य के पूर्वार्ध में ङकार अन्त में हो और अग्रिम पाद के प्रारम्भ में सकार हो तो वहाँ क वर्ग का सवर्ण आगम ङ् हो जायेगा। इसका उदाहरण 'प्राङ्क्सोम' है।

पाणिनिप्रोक्तस्य पाक्षिकस्य तुगागमस्य वारणम्—

नकारान्ते पदे पूर्वे श्मश्रुभिः परतः स्थिते।
छकारं न प्रयुञ्जीत 'ञश' सन्धि समुच्चरेत् ॥ ४१ ॥

अन्वयः—नकारान्ते पदे पूर्वे (सति), परतः श्मश्रुभिः (इति पदे) स्थिते सति छकारं न प्रयुञ्जीत, 'ञश' सन्धि समुच्चरेत्।

व्याख्या—नकारान्ते = नकारः अन्ते यस्य एतादृशे पदे, पूर्वे = पूर्वभागे, प्रथमचरणान्ते नकारः यदि स्यात्, परतः = अग्रिमे द्वितीये चरणे 'श्मश्रुभिः' इति पदे स्थिते सति पाणिनिमते झयः परत्वाभावात्। अत्र च प्रातिशाख्य-प्रोक्तनियमेन 'शकारे च' इत्यनेन नस्य नत्वे कृते 'परश्चास्पर्शपरश्च' मिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्पर्शपरत्वात् छत्वाऽप्राप्तेः शकारस्य स्थाने छकारं न प्रयोक्तव्यः। किन्तु नकारस्य चुत्वेन 'ञ्श' सन्धिम् आदित्याञ्श्मश्रुभिरिति समुच्चारणं कुर्यादिति।

हिन्दी—यदि पद के पूर्वार्द्ध का अन्त नकार वर्ण से हो या नकार पूर्वार्द्ध पद के अन्त में हो तथा उत्तरार्ध पद शकारविशिष्ट 'श्मश्रु' से प्रारम्भ होता हो तो वहाँ छकार (चवर्ग का दूसरा वर्ण) नहीं होता है, अतः उसका प्रयोग वर्जित है। उदाहरण जैसे 'आदित्याञ्श्मश्रुभिः' है। यहाँ प्रातिशाख्य नियम से 'शकारे च' इससे नकार का अत्व करने पर 'परश्चास्पर्शपरश्च' इससे अस्पर्श परत्व होने से छत्व की अप्राप्ति से शकार के स्थान में छकार का प्रयोग नहीं करना चाहिए, किन्तु नकार के चुत्व से ञ्श सन्धि को 'आदित्याञ्श्मश्रुभिः' यह उच्चारण करना चाहिए।

नकारविकारस्य प्रतिषेधः—

नकारान्ते पदे पूर्वे त्वं पदे परतः स्थिते।
सकारं न प्रयुञ्जीत 'चिकित्वान्त्वमि'दं यथा॥
मकारान्ते पदे पूर्वे सवर्णे परतः स्थिते।
मसवर्णं विजानीयाद् 'इमम्मे' इति दर्शनम्॥

अन्वयः—नकारान्ते पदे पूर्वे (सति) 'त्वमि'ति पदे परतः स्थिते सति सकारं न प्रयुञ्जीत, यथा—'चिकित्वान् त्वम्' इति।

मकारान्ते पूर्वे पदे, परतः सवर्णे स्थिते मसवर्णं विजानीयात्, 'इमम्मे' इति दर्शनम्।

व्याख्या—नकारान्ते=नकारः अन्ते यस्य, अर्थात् यस्य पदस्य पूर्वार्धे अन्ते नकारः स्यात् तथा च 'त्वम्' इति पदे, परतः=उत्तरार्धभागे विद्यमाने सति, यथा—'चिकित्वान् त्वम्' (संहितोक्ते) इत्यत्र प्रातिशाख्योक्त 'नुः' इत्यधिकृत्य 'तथयोः समिति नकारस्य सकारे तथा च 'अनुनासिकमुपधा-प्रागन्तस्यायाः' इत्यधिकारेण उपधानुनासिक्ये च प्राप्ते निषेधति—सकारं=सकारवर्णं, न=नहि, प्रयुञ्जीत=प्रयोगं कुर्यात्। तथाहि—'न तमे। निर्ज्जगन्वान् तमसि। धामञ्छत्रूंश्चिकित्वांस्त्वम्पूषन्नव्वंन्निति च' इति नकारस्य विकाराभावं निपात्यते। तेनात्र यथा—'चिकित्वान्त्वम्' एतदुदाहरणं सिद्धयति। मकारान्ते=मकारः अन्ते यस्य, तस्मिन् पदे, पूर्वे=पूर्वार्द्धे स्थिते सति; अर्थात् प्रथमचरणस्यान्ते मकारे स्थिते सति, तथा च परतः=द्वितीयचरणे;

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समानवर्णे स्थिते सति, मसवर्णं विजानीयात्। यथा 'इमम् मे' इत्यत्र 'मोऽनुस्वारः' इति पाणिनीयसूत्रेण अनुस्वारे कृते 'वा पदान्तस्ये'ति वैकल्पिकपरसवर्णविधानात् पक्षे अनुस्वारप्रसङ्गः। प्राप्तिरूपः सः अत्र परसवर्णरूपमकारविधानेन निवार्यते, तेन—'इमम्मे' इत्येव भवति, अनुस्वारप्रयोगो न।

हिन्दी—यहाँ नकार-विकार प्रसंग में आचार्य कहते हैं—यदि प्रथम पद का अन्तिम वर्ण नकार हो और आगे के पद के प्रारम्भ में तकारविशिष्ट 'त्वम्' हो तो सकार का प्रयोग नहीं करना चाहिए; जैसा कि—'चिकित्वान्त्वम्' में, यहाँ न-त्वम् के बीच में सकार नहीं हुआ है।

इसी प्रकार पूर्व पद के 'अन्त में मकार हो तथा आगे भी सवर्ण अक्षर प्राप्त हो वहाँ सवर्ण म ही होगा। जैसा कि 'इमम्मे' में हुआ है, यहाँ मकार के स्थान में अनुस्वार बाधित हुआ है।

अनुस्वारस्य दीर्घ-लघुभेदांश्च आह—

वर्णे तु मात्रिके पूर्वे ह्यनुस्वारो द्विमात्रिकः।
द्विमात्रिके मात्रिकः स्यात् संयोगाद्यश्च यो भवेत् ॥ ४२ ॥

अन्वयः—मात्रिके वर्णे पूर्वे (सति) अनुस्वारः द्विमात्रिकः (ज्ञेयः)। द्विमात्रिके मात्रिकः स्यात् यः च संयोगाद्यः भवेत्।

व्याख्या—मात्रिके=एकमात्रिके ह्रस्वे, वर्णे=अक्षरे, पूर्वे सति=पूर्वभागे विद्यमाने सति, अनुस्वारः=ठँ(गूं)कारः, द्विमात्रिकः=दीर्घः (द्विमात्रो दीर्घ उच्यते) (ज्ञेयः=जानीयात्)। कथमत्र मात्राद्वयमिति तत्राह—प्रातिशाख्ये 'अनुस्वारो ह्रस्वपूर्वोऽध्यर्धमात्रापूर्वा' इति। अत्रायमाशयः—अनुस्वारः ठँ (गूंकारः)। अध्यर्द्धमात्रा सार्धैकमात्राकालो भवति, यदि च ह्रस्वो वर्णः पूर्वस्मिन् स्थाने भवेत्। पूर्वा चाऽर्धमात्रा पूर्वो ह्रस्वो वर्णश्च अर्धमात्राकालो भवति। तेन ह्रस्वे गुरुत्वं कृत्वा ठँकारे उच्चारिते—'गणपति ठँ हवामहे' इत्यत्र 'तिऽगूँ ह' इति श्रुतिर्भवति।

अनुस्वारस्य दीर्घात्मकं भेदं प्रदर्श्य लघुभेदो यथा—द्विमात्रिके=दीर्घे वर्णे पूर्वे सति, अनुस्वारः ꣳकारः, मात्रिकः=एकमात्रिको ह्रस्वः स्यात्। एवञ्च मात्रिकत्वमपि प्रातिशाख्योक्तमेव ग्राह्यम्। तदनुसारेण 'ताꣳसवितुः' इत्यस्मिन् स्थाने 'ताऽगुं सवितुः' इति श्रुतिर्जायते। अपरञ्च—यश्च संयोगाद्योऽनुस्वारः भवेत् सोऽपि चकारात् ह्रस्व एव गुरुभूतः स्यात् न च द्विमात्रिकः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—अनुस्वार का दीर्घ-लघु भेद तथा संयोगादि से युक्त अनुस्वार का गुरुत्व होने पर भी द्विमात्रिक (दीर्घ) नहीं होगा, इस विषय में आचार्य कहते हैं—एकमात्रिक ह्रस्व वर्ण के पूर्व भाग में रहने पर अनुस्वार गूंकार को द्विमात्रिक दीर्घ जानना चाहिए और यदि पूर्व में द्विमात्रिक वर्ण रहे तो भी उच्चारण एकमात्रिक होगा तथा यदि वह पूर्व वर्ण संयुक्त रहे तो भी उच्चारण एकमात्रिक ही होगा। जैसा कि क्रम से—'गणपतिꣳहवामहे' में 'तिऽगूँ ह' ऐसी श्रुति होती है, 'ताꣳसवितुः' इस स्थान पर 'ताऽगुं सवितुः' होता है।

अधुना संयोगाद्यनुस्वारमेव आधृत्य पुनः स्पष्टीकरणम्—

अनुस्वारस्योपरिष्टात् संयोगो यत्र दृश्यते।
ह्रस्वं तं तु विजानीयात् 'सꣳस्थामि'ति दर्शनम् ॥ ४३ ॥

अन्वयः—यत्र अनुस्वारस्य उपरिष्टात् संयोगः दृश्यते (तत्र) तं तु ह्रस्वं विजानीयात्। 'सꣳस्थाम्' इति दर्शनम्।

व्याख्या—यत्र = यस्मिन् स्थाने दीर्घाद् वा ह्रस्वाद् वा (परस्य), अनुस्वारस्य उपरिष्टात् = अग्रे, संयोगो दृश्यते = अवलोक्यते, तत्र = एतादृश्यामवस्थायाम्, तम् = अनुस्वारम्, ह्रस्वं = ह्रस्ववर्णात्मकं, विजानीयात् = ज्ञानं कुर्यात्, न तु दीर्घम्। किन्तु गुरुत्वं ह्रस्वेऽपि संयोजनीयम्; प्रतिज्ञासूत्रादिनिर्देशात्। 'सꣳस्थाम्' इति दर्शनमुदाहरणं विद्यते।

हिन्दी—जैसा कि ऊपर में कहा गया है—एकमात्रिक ह्रस्व या द्विमात्रिक दीर्घ वर्ण के पश्चात् अनुस्वार हो एवञ्च अनुस्वार के पश्चात् संयुक्ताक्षर दृष्टिगोचर हो तो उस अनुस्वार को ह्रस्व ही मानना चाहिए। जैसा कि—'सꣳस्थाम्' यहाँ पर हुआ है।

अपवादरूपेणानुस्वारस्य द्विमात्रिकत्वमपि भवतीति व्यवस्थापनम्—

अनुस्वारो द्विमात्रः स्यादृवर्णव्यञ्जनादिगः।
ह्रस्वाद्वा यदि वा दीर्घात् 'दे॒वाना॒ꣳ हृदये' यथा ॥ ४४ ॥

अन्वयः—ऋवर्णव्यञ्जनादिगः अनुस्वारः ह्रस्वाद् वा यदि वा दीर्घाद् द्विमात्रः स्यात्, यथा—'दे॒वाना॒ꣳ हृदये' (इत्यत्र भवति)।

व्याख्या—ऋवर्णव्यञ्जनादिगः = ऋवर्णपरं व्यञ्जनवर्णमिति—अत्र शाकपार्थिवादित्वात् समासे विहिते ऋवर्णं व्यञ्जनस्य आदौ गच्छति आप्नोति

CC-0. Nanaji Deshmukh Samskrit Academy and Digital Preservation

इति ऋवर्णव्यञ्जनादिगः, अनुस्वारः ह्रस्वात्=ह्रस्ववर्णात्, यदि वा=चेद् वा, दीर्घात्=दीर्घवर्णात्, परः अनुस्वारो भवेत् तदा सर्वत्रैव, द्विमात्रः=द्विमात्रिकोऽनुस्वारः कर्त्तव्यः। न तु 'द्विमात्रिके मात्रिकः' इति पूर्ववचनात् एकमात्रिक इति निष्कर्षः।

हिन्दी—अपवाद रूप से अनुस्वार द्विमात्रिक होता है—इस विषय में आचार्यवचन है कि यदि पद के पूर्वार्ध में ह्रस्व या दीर्घ वर्ण के पश्चात् अनुस्वार रहे और उस अनुस्वार के पश्चात् व्यञ्जन युक्त वर्ण हो तो वहाँ द्विमात्रिक (दीर्घ) ही ज्ञात करना चाहिए। यहाँ उदाहरण प्रस्तुत है—'देवान्ना॰ऽहृदये'। यहाँ ऋवर्णपरक व्यञ्जन हकार के उदय में अनुवार दीर्घ से भी नकारोत्तर आकार से परे दीर्घ का ही प्रयोग होता है, ह्रस्व का नहीं।

मन्त्रेषु अनुस्वारस्य सर्वत्र ह्रस्वत्वविधानम्—

अनुस्वारस्तु यो दीर्घादक्षराद्यो भवेत् परः।
स तु ह्रस्व इति ज्ञेयो मन्त्रेष्वेव विभाषया॥ ४५॥

अन्वयः—यः अनुस्वारः दीर्घात् अक्षरात् यः परः भवेत्, स तु ह्रस्व इति (सर्वत्र) ज्ञेयः, विभाषया मन्त्रेषु एव (नान्यत्र)।

व्याख्या—यः अनुस्वारः (मन्त्रेषु) दीर्घात्=द्विमात्रिकात्, अक्षरात्=वर्णात्, यः, परः=परतरः (पश्चाद् वा), भवेत्=स्यात्, स तु=निश्चयेन, ह्रस्व इति=इत्येव, (सर्वत्र) ज्ञेयः=बुध्येत्। एष नियमः, विभाषया=ऋवर्णव्यञ्जनादिगत्वात् अनुस्वारस्य द्विमात्रिकत्वम् अन्यत्र ह्रस्वत्वम् इति व्यवस्थितविकल्पेन यदुक्तं तत्, मन्त्रेष्वेव=संहितोक्तमन्त्रेष्वेव, न तु मन्त्रातिरिक्तब्राह्मणादिविभागेष्वपि। अस्मात् कारणात् मन्त्रातिरिक्तस्थलेषु ऋवर्णव्यञ्जनादिगोऽप्यनुस्वारो दीर्घात्परश्चेत् न द्विमात्रिको दीर्घः प्रयोगो विधेयः किन्तु ह्रस्व एवेति निष्कर्षः।

हिन्दी—मन्त्रों में अनुस्वार का सर्वत्र ह्रस्वत्व-विधान के विषय में आचार्य का कथन है—जो अनुस्वार दीर्घ अक्षर से परे हो, उसका उच्चारण ह्रस्व ही होगा।—इसमें विशेष बात यह है कि विभाषा से ही अर्थात् जहाँ ऐसे नियम पाये जायें जो सन्दिग्ध हों; जैसे—'ऐसा न होगा या ऐसा भी हो सकता है'। किन्तु इतना ध्यान रहे कि ये नियम मन्त्रों पर ही व्यवहृत होते हैं—ब्राह्मण (शतपथ आदि) पर नहीं।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

कतिविधाः ऊष्मणः गतयः (विसर्गस्य)—

ओभावश्च विवृत्तिश्च श-ष-सा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥ ४६ ॥

अन्वयः—ओभावः च विवृत्तिः च श-ष-साः रेफः एव च जिह्वामूलम् उपध्मा च अष्टविधा गतिः (भवति) ।

व्याख्या—ओभावः=प्रथमा ऊष्मणः गतिः, च=पुनः, विवृत्तिः=द्वितीया गतिः, च=अपि च, श-ष-साः=क्रमेण तृतीया, चतुर्थी, पञ्चमी (गतिः), रेफः=ऊर्ध्वगामी अर्धाक्षरम् (जलतुम्बिकान्यायेन रेफस्य ऊर्ध्वगमनम्), जिह्वामूलम् उपध्मा च, अष्टविधा=अष्टभेदसम्पन्ना, गतिः=वर्णापत्तिर्भवतीति ।

हिन्दी—इससे पूर्व याज्ञवल्क्यशिक्षा के स्वरप्रकरण में आचार्य कह चुके हैं कि 'अक्षरं भजते काचित् काचिद् द्वित्वे प्रतिष्ठिता । समानजातिका काचित् काचिदूष्मप्रदायिनी' ॥ ये ऊष्म (विसर्ग) के स्वरूप कथित होने पर भी ओभावप्रापक उकारादि पद नहीं है, वहीं ओभावत्व ऊष्मा का स्वरूप है, सर्वत्र नहीं, इसी का विस्तार करते हुए कहते हैं कि—१. ओभाव, २. विवृत्ति, ३, ४, ५. श-ष-स, ६. रेफ, ७. जिह्वामूल और ८. उपध्मा—ये ऊष्मा (विसर्ग) के आठ प्रकार की गति (वर्णापत्ति) होती है, भेद होते हैं ।

कुत्र विसर्गविकृतित्वम् ओभावस्य—

यद्योभावप्रसन्धानमुकारादि परं पदम् ।
स्वरान्तं तादृशं विद्याद् यदन्यद् व्यक्तमूष्मणः ॥ ४७ ॥

अन्वयः—यदि उकारादि परं पदम् ओभावसन्धानम् (भवेत्) तदा तादृशं स्वरान्तं विद्यात्, यत् ऊष्मणः अन्यत्, तद् (अत्र) व्यक्तम् ।

व्याख्या—यदि=चेत्, उकारादि=उकारः आदिर्यस्य तत्, परम्=उत्तरार्धे, पदम्=पदे, ओभावप्रसन्धानम्=गुणकृत्येन ओत्वप्रापकम् (भवेत्), तदा=तादृशकाले, तादृशम्=ओत्वप्रापकम्, पूर्वं पदम्, स्वरान्तम्=अवर्णान्तम्, विद्यात्=जानीयात् । न विसर्गान्तम् इति भावः । इति यत् ऊष्मणः=विसर्गस्य सम्बन्धिनः, ओभावात् । अन्यत्=ओत्वान्तरम्, तद्=ऊष्मविकारातिरिक्तम् ओत्वम् अत्र=अस्मिन् स्थाने व्यक्तम्=सुस्पष्टीकृतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अत्रायमाशयः—यत्र परं पदम् उवर्णादि न भवेत् तत्रैव विसर्गविकृतित्वम्

ओभावस्य । यत्र च परं पदम् उवर्णादि भवति तत्र पुनर्नोष्मविकारत्वम् ओत्वस्य किन्तु तत्र गुणकृत्येनैवौत्वविकृतित्वम् इति । अत्रोदाहरणं यथा—'इषे त्वोर्ज्जे त्वा' इत्यत्र ऊर्ज्जेति परं पदम् उवर्णादि अस्ति । अतः ओभावप्रसन्धानमत्र पूर्वं पदं स्वरान्तं त्वा इति ज्ञेयम् । तेन ऊष्मविकारो नाऽत्र प्रत्येतव्यः, अन्यत्र 'कुक्कुटोसि' इत्यत्र परं पदं 'असि' इत्येतत् उवर्णादि नास्ति । अतः अत्र ओभावप्रसन्धानं पूर्वं पदं 'कुक्कुटः' इति विसर्गान्तं ज्ञेयम् ।

हिन्दी—यदि उकार आदि वर्ण उत्तरपद में हों तो वह 'उ' अपने से निकटवर्ती पूर्व के 'अ' से संयुक्त होकर गुणविधान के द्वारा 'ओ' के रूप में निष्पन्न तो होता है किन्तु वह विसर्ग का ओभाव भेद नहीं समझना, किन्तु स्वरान्त में तद्वत् जानना चाहिए । ऐसा तभी होगा जब अकार के बाद विसर्ग रहेगा ।

अष्टविधोष्मणः नामग्रहणपूर्वकमुच्चारणविधानप्रतिपादनम्—

ओभावमागता योष्मा तां तु केलिं विनिर्द्दिशेत् ।
विवृत्तिप्रत्यया चोष्मा विज्ञेया विकटाऽऽनना ॥ ४८ ॥
लीढातिलीढविद्युच्च श-ष-सेषु प्रकीर्त्तिताः ।
जिह्वामूले च रेफे च विज्ञेया विकटा शठा ॥ ४९ ॥
उपध्मानीयसहितां पुष्पिणीन्तां विनिर्द्दिशेत् ।
अन्यत्र या भवेदूष्मा सुलभां तां विनिर्द्दिशेत् ॥ ५० ॥

अन्वयः—या ऊष्मा ओभावम् आगता तां तु केलिं विनिर्द्दिशेत्, विवृत्तिप्रत्यया च ऊष्मा विकटानना विज्ञेया । शषसेषु (क्रमेण) लीढातिलीढविद्युत् च प्रकीर्त्तिताः । जिह्वामूले च रेफे च क्रमशः विकटा शठा विज्ञेया । उपध्मानीयसहितां तां पुष्पिणीं विनिर्द्दिशेत्, अन्यत्र या ऊष्मा भवेत् तां सुलभां विनिर्द्दिशेत् ।

व्याख्या—या = चर्चिता, ऊष्मा = विसर्गः, ओभावम् = अकारोकारविशिष्टम्, आगता = प्राप्ता, ताम्=एवम्भूतामूष्माणं, तु = निश्चयेन, केलिम् = इति संज्ञया, विनिर्द्दिशेत् = विशेषेण निर्देशं कुर्यात् । कारणञ्चात्र—तस्य समुच्चारणे प्रयासाभावात् । विवृत्तिप्रत्यया = विवृत्तिरूपं प्राप्ता च, ऊष्मा = विसर्गः, विकटानना = विकटाननं यस्याः सा विज्ञेया = ज्ञातव्या । तस्या उच्चारणे आननस्य विकटाकृतिरूपेण विधानात् । तथा च शभावे स्थितायां

CC-0. Nepal Sanskrit University, Kathmandu Collection

जिह्वामध्येन तालुनि उच्चारणात् लीढा (आस्वादितेत्यन्वर्थत्वात्), षभावे जिह्वाग्रं प्रतिवेष्टच मूर्धन्युच्चारणात् अतिलीढा, अपरञ्च सभावे जिह्वाग्र-भागेनोच्चार्यं वेगेन दन्तेभ्यो जिह्वाविश्लेषणात् विद्युत् नामधेया च प्रकीर्त्तिताः =परिगणिताः। जिह्वामूले=जिह्वामूलीयभावं प्राप्तायाम् ऊष्मणि हनुमूलेन उच्चारणात् मुखाकृतेः विकटात्वं जायते अतः सैषा विकटा ज्ञेया। रेफभावे प्राप्ते ऊष्मणि दन्तमूलस्थाने जिह्वायाः प्रतिवेष्टचाऽग्रेणोच्चारिते शठा ज्ञेया, उच्चारणे काठिन्यदोषात्। उपध्मानीयभावे (मुखाकृतेर्विकसितत्वात्) पुष्पिणीं कथयेत्। तथा चाष्टविधगतेः अन्यत्र या ऊष्मा तां सुलभेति विज्ञेया।

हिन्दी—पिछले पद्यों में जो आठ प्रकार की ऊष्मा कही गयी है उनका नामग्रहणपूर्वक उच्चारण-विधान के विषय में आचार्य कहते हैं कि—जो ऊष्मा (विसर्ग) ओभाव (अकार-उकारगुणविशिष्ट) में प्राप्त है, उसे 'केलि' नाम से जानना चाहिए, क्योंकि उसके उच्चारण में प्रयास का अभाव होता है। और जब कि विवृत्तिप्रत्यय वाली ऊष्मा 'विकटानना' कहलाती है, क्योंकि इसके उच्चारण में मुख को विकट आकृति के रूप में करना पड़ता है। ऐसे ही श-ष-स इन तीन भेद वाले विसर्गों को क्रमशः लीढा, अतिलीढा और विद्युत् नाम से जाना जाता है। लीढा में तालु और जिह्वा का संयोग होने से आस्वादन क्रिया होती है, अतः अन्वर्थ नाम है। अतिलीढा में अत्यन्त आस्वादन क्रिया होती है और विद्युत् नाम की ऊष्मा में जीभ के अग्रभाग से उच्चारण करके शीघ्रता से दाँतों से जीभ के विश्लेष से क्रिया होती है। एवमेव विकटा नाम की ऊष्मा में ठोढ़ी के मूल से उच्चारण होने से मुखाकृति में विकटत्व आ जाती है और 'शठा' ऊष्मा में दाँत के मूल स्थान में जीभ की घिरावट से आगे से उच्चारण किया जाता है। साथ ही उच्चारण में कठिनाई होने के कारण उपध्मानीय भाव (मुखाकृति का फैलाव) में पुष्पिणी नाम की ऊष्मा होती है। इन आठ प्रकार की ऊष्माओं के अतिरिक्त जो ऊष्मा होती है उसका नाम 'सुलभा' है।

अन्तस्थवर्णयोः वकार-यकारयोः उच्चारणवैशिष्ट्यमाह—

पादाद्यं च पदाद्यं च तथाऽवग्रहकालिकम्।
सुस्पृष्टं वं विजानीयात् तत्तत्कालनिबन्धनम् ॥ ५१ ॥
पादादौ च पदादौ च संयोगावग्रहेषु यः।
जशब्द इति विज्ञेयो योऽन्यः स य इति स्मृतः ॥ ५२ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अन्वयः—पादाद्यं च पदाद्यं च तथा अवग्रहकालिकं वं सुस्पृष्टं विजानीयात् तत्तत्कालनिबन्धनम् ॥ ५१ ॥

पादादौ च पदादौ च संयोगावग्रहेषु (च) यः जशब्द इति विज्ञेयः, यः अन्यः स य इति स्मृतः ॥ ५२ ॥

व्याख्या—पादाद्यम्—पादस्य आद्यम् = आदौ भवं (वकारं), च = पुनः, पदाद्यं = पदस्य आद्यम्, तथा = तथैव, अवग्रहकालिकम् = अवग्रहे स्थितं, वम् = वकारं, सुस्पृष्टम्=कालविलम्बेन गुरुभूतम्, विजानीयात् = उच्चारणं कुर्यात् अथवा ज्ञेयमिति । एतच्च, तत्तत्कालनिबन्धनम् = वकारस्य कालविलम्बेनोच्चारणीयम्, निर्दिष्टपादादिवकारोच्चारणाऽवसरे एव कार्यम्, अर्थवेलायां तु वकारेणार्थं करणीयमिति । अतः परं यकारस्य विषये—पादादौ—पादस्य= चरणस्य आदौ, पदादौ = पदस्य (सुप्तिङन्तं पदम्) आदौ, तथा च संयोगावग्रहेषु = संयोगश्च अवग्रहाश्च तेषु; संयोगश्चात्र प्रतिज्ञासूत्रोक्त-रेफ-हकार-यकारकारैरेव ग्राह्यः । एवम्भूतेषु यकारेषु 'ज' विभूषितः शब्दो विज्ञेयः, यः = एभ्यो भिन्नः यकारः स य एवोच्चारणीयः । एषामुदाहरणानि क्रमेण पादादौ यथा—'यज्ञेन' इति, पदादौ यकारो यथा—यज्ञम्, संयोगे यथा—'सूर्य्यं' 'गेह्याय' 'धाय्यारूपम्', अवग्रहेषु यथा—'यज्ञा यज्ञियं' = पदपाठकाले च—'यज्ञा यज्ञियमिति यज्ञा । यज्ञियम्' इत्थं विच्छेदे कृते यज्ञियपदस्य आदिभूतो यकारः तत्र तत्र सर्वोऽपि यः अन्तस्थानाम् आदिः, जशब्दः = जकाररूपध्वनिर्जायते, सुस्पृष्ट इति । अर्थात् यकारः चवर्गतृतीयत्वेन जकारेणोच्चारणीयः । अन्यो यो यकारः स तु ईषत्स्पृष्ट एव उच्चारणीयः । यकारस्य जकारोच्चारणं वेदेष्वेव तत्रापि विशिष्टस्थानेषु ।

हिन्दी—अन्तस्थ वर्ण जो वकार-यकार के उच्चारणवैशिष्ट्य में आचार्य कहते हैं—पाद एवं पद के प्रारम्भ में और अवग्रह काल में भी व (वकार) को पृथक्-पृथक् कालक्रमानुसार तत्तद्विशिष्ट स्पृष्ट वर्ण जानना चाहिए। यहाँ ध्यातव्य यह है कि यत्न दो प्रकार के होते हैं (यत्नो द्विधा)—आभ्यन्तर और बाह्य । इनमें आभ्यन्तर के पाँच भेदों में स्पृष्ट प्रथम है; कहा गया है—'तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्' अर्थात् स्पर्शों के स्पृष्ट प्रयत्न होते हैं । अब यकारोच्चारण के विषय में कहते हैं—पाद तथा पद के आदि में एवम् संयोग और अवग्रह में अर्थात् पाद एवं पद के प्रथमाक्षर यदि 'य' रहे एवं संयुक्त में वकार के साथ यकार रहे तो उसे उच्चारण के समय 'ज' उच्चारण

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

करना चाहिए और इनसे भिन्न स्थानों में जो यकार प्राप्त होगा उसे यही उच्चारण करना चाहिए। वस्तुतः यकार का जकारोच्चारण वेद में ही होता है, वहाँ भी केवल निर्दिष्ट स्थानों में ही। इस प्रकार वकार और यकार के उच्चारण के विषय में उपर्युक्त निर्देश प्राप्त होते हैं।

कतिविधो वकारस्तद्वैशिष्ट्यञ्च किम्—

वकारस्त्रिविधः प्रोक्तो गुरुर्लघुर्लघूतरः।
आदौ गुरुर्लघुर्मध्ये पदान्ते च लघूतरः॥ ५३॥

अन्वयः—वकारः त्रिविधः प्रोक्तः; गुरुः, लघुः, लघूतरः (इति)। आदौ गुरुः, मध्ये लघुः, पदान्ते च लघूतरः (ज्ञेयः)।

व्याख्या—वकारः=वकाराक्षरम्, त्रिविधः=त्रिप्रकारकः, प्रोक्तः=कथितः, (कथं=केन प्रकारेण) गुरुः=द्विमात्रिकः, लघुः=एकमात्रिकः, लघूतरः=अतिशयेन लघुः इति। एतत् कथं भवति इत्याह—आदौ=पदस्य आदौ, वकारश्चेत् तर्हि गुरुः=सुसंस्पृष्टः, मध्ये=पदमध्ये, चेत्तर्हि लघुः, पदस्य अन्ते च लघूतरः ईषत्स्पृष्टः (ज्ञेयः=ज्ञातव्य इति)। अथ अन्त्यस्य (वकारस्य) अन्तस्थानां पदादिमध्याऽन्तस्थस्य त्रिविधं गुरुमध्यमलघुवृत्तिभिरुच्चारणम्। यथा—'व्वायवस्थे'त्यत्र प्रथमो वकारो गुरुवृत्त्या सुसंस्पृष्टत्वेनोच्चारणीयः। अत एव सुसंस्पृष्टकरणे कालविलम्बप्रदर्शनार्थं वकारद्वयं लिखन्ति सम्प्रदायविदः। द्वितीयो मध्यस्थो वकारो मध्यमवृत्त्या लघुत्वेन उच्चारणीयः, तेनैवात्र वकारद्वयं न निर्दिष्टम्। पदान्तीयस्तु सन्धिजः तदर्थं च अनुपदमेव वक्ष्यति। इति विमर्शः दीक्षितानाम्।

हिन्दी—कितने प्रकार के वकार होते हैं तथा उनकी विशेषता क्या है? इस विषय में आचार्य कहते हैं—वकार तीन प्रकार के होते हैं; कैसे? १. गुरु, २. लघु, ३. लघूतर। वैशिष्ट्य—पद के आदि में वकार हो तो गुरु=सुसंस्पृष्ट, मध्य में हो तो लघु और पद के अन्त में हो तो लघूतर=अत्यन्त ईषत्स्पृष्ट जानना चाहिए। इस विषय का विमर्श दीक्षितोक्त संस्कृत टीका में द्रष्टव्य है।

यकार-वकारयोः सर्वत्र सुसंस्पृष्टत्वे प्राप्ते पुनर्व्यवस्थापनम्—

CC-0. Nepal Sanskrit Academy Kathmandu Collection

सन्धिजौ न पदान्तीयावुपसर्गपरौ लघू।
अथ-मा-स-नशब्देभ्यो विभाषाऽऽम्रेडिते यवौ॥ ५४॥

अन्वयः—सन्धिजौ पदान्तीयौ यवौ लघू (भवतः) च उपसर्गपरौ (तथा) अथ-मा-स-नशब्देभ्यः (परौ) आम्रेडिते यवौ विभाषा (भवतः)।

व्याख्या—सन्धिजौ = सन्धिजातौ = सन्ध्युत्पन्नौ यवौ; अपरञ्च 'इको यणचि' 'एचोऽयवायावः' इति इगेचोः स्थाने समुत्पन्नौ, पुनश्च—पदान्तीयौ = पदान्ते वर्त्तमानौ यवौ, लघू = मध्यमवृत्त्यपेक्षयाऽपि जिह्वाग्रोपाग्रमध्य-मूलानां शैथिल्येनोच्चारणात् लघूतरौ भवतः। यथा—'तवं व्वायवृतस्पते' इत्यत्र। च = पुनः, उपसर्गपरौ = प्राद्युपसर्गपरीभूतौ तथा। अथ-मा-स-न-शब्देभ्यः = अथशब्दात् माशब्दात् सशब्दात् नशब्दाच्च परौ इति। आम्रेडिते द्विरुक्तपदस्य परं यत् आम्रेडितसंज्ञकं रूपं तत्र च वर्त्तमानौ इत्यर्थः। यवौ = यकार-वकारौ, लघू = ईषत्स्पृष्टौ, विभाषा = व्यवस्थितविकल्पेन (भवतः)।

हिन्दी—यकार-वकार का सर्वत्र सुसंस्पृष्ट वर्णित हुआ है, अतः उसका पुनर्व्यवस्थापन आचार्य करते हैं—सन्धिविधान से बनने वाले य-व जो पाणिनीय सूत्र के 'इको यणचि' तथा 'एचोऽयवायावः' से निष्पन्न होते हैं तथा उपसर्ग के बाद उपस्थित य-व वर्ण लघु होते हैं। एवञ्च—अथ-मा-स-न—इन अक्षरों के (वर्णों के) पश्चात् आने वाले आम्रेडित य-व भी लघूतर ही होते हैं। आम्रेडित शब्द नपुंसकलिंग है (तस्य परमाम्रेडितम्), अतः 'आम्रेडिते' प्रथमा का द्विवचनान्त पद हुआ। आम्रेडन का शाब्दिक अर्थ होता है—बार-बार दोहराना।

पदविच्छेदे यकार-वकारयोः वैशिष्ट्यप्रदर्शनम्—

पञ्चमादुत्तरो यो वो यदि नैकपदे भवेत्।
संहितायां लघुः सोऽथ पदकाले गुरुर्भवेत्॥ ५५॥

अन्वयः—पञ्चमात् उत्तरः यः वः यदि एकपदे न भवेत्, (तदा) सः संहितायां लघुः (भवेत्), अथ पदकाले (तादृशः) गुरुः भवेत्।

व्याख्या—पञ्चमात् = वर्गाणामन्तिमाक्षरात् (ङ-ञ-ण-न-म इत्यस्मात्), उत्तरः = परीभूतः, उत्तरवर्त्ती, यः = यकारः, वः = वकारः, एकपदे वर्त्तमानः, न = नहि, भवेत् = स्यात्, अर्थात् वर्गपञ्चमान्तपदात् अग्रे भिन्नपदस्यादौ वर्त्तेत तदा; सः = यकारो वकारश्च, संहितायाम् = सन्धौ, लघुः = एकमात्रिकः (भवेत्), अथ = अनन्तरं यदि चेत् पदकाले = संहिताविच्छेदे (तादृशः = यकारः वकारश्च स्यात्तदा), गुरुः = द्विमात्रिकः सुस्पृष्टः, भवेत् = भूयात्।

CC-0. Nepal Rashtriya Abhilekh Prasansha Academy, Kathmandu Collection

यथा—'यो रेवान्यो' इति नकारात् परस्य यकारस्य पदादिस्थस्यापि लघुत्वम्। पदपाठे पुनः 'य÷। रे॒वान्। य÷' इति तस्यैव सुस्पृष्टत्वरूपं गुरुत्वं निष्पन्नम्। एवं वकारेऽपि ज्ञेयम्।

हिन्दी—पदविच्छेद में यकार-वकार का वैशिष्ट्य-प्रदर्शन के विषय में आचार्य कहते हैं—कवर्गादि वर्गों के पाँचवें वर्ण (ङ-ञ-ण-न-म) से उत्तरवर्ती य-व वर्ण यदि एक पद में न रहे तो वह यकार-वकार संहिता में लघु होता है और यदि पदकाल (संहिताविच्छेद) में वह यकार और वकार हो तो गुरु हो जाता है। अर्थात् पदपाठ के समय यकार-वकार गुरु हो जाता है। उदाहरण है—'यो रेवान्यो'। यहाँ नकार से परे जो यकार है उस यकार का पदादिस्थ होने पर भी लघुत्व है और पदपाठ में फिर 'य÷। रे॒वान्। य÷ यहाँ उसका ही सुस्पृष्टत्वरूप गुरुत्व निष्पन्न होगा।

यकारस्य सुस्पृष्टत्वं कदा भवति—

हकार-रेफसंयुक्त ऋवर्णोदय एव वा।
सुस्पृष्टं तं विजानीयाद् यकारो नान्ययुग् यदि ॥ ५६ ॥

अन्वयः—हकार-रेफसंयुक्तः यकारः यदि अन्ययुग् न (स्यात्) (तदा) तं सुस्पृष्टं विजानीयात् वा ऋवर्णोदये एव।

व्याख्या—हकार-रेफसंयुक्तः=रेफहकाराभ्यां संयुक्तो यकारः, यदि=चेत्, अन्ययुग्=अन्येन व्यञ्जनेन युक्, न=नहि, स्यात्=भवेत्, तदा=तादृश्यामवस्थायाम्, तम्=यकारं, सुस्पृष्टम्=इत्येतत्, विजानीयात्=विशेषेण जानीयात्, ज्ञेय इति यावत्। अत्रायमाशयः—तथाविधयकारस्य जकारत्वेनोच्चारणं कुर्यादिति। वा=पुनः यदि, ऋवर्णोदये=ऋकारस्य उदयः=आगमः, तस्मिन् सति, अग्रे ऋकारे सति, यकारं सुसंस्पृष्टं जानीयात्, एवेति निश्चये। एवकारात् ऋकारयोगमात्रेणैव जकारोच्चारणं क्रियते न त्वत्र नान्ययुग् यदीति निषेधो वर्त्तते, इति सूच्यते। अन्ययुगिति अन्यपदेन उक्तरेफहकारकाऽतिरिक्तं यकारातिरिक्तं च व्यञ्जनं गृह्यते। तेन रेफ-हकार-ऋकार-यकारैरेव योगे जकारोच्चारणं फलितम्; यकारे अन्यत्वाभावात्। तथाहि—'द्विर्भविऽप्येवमि'ति दीक्षितमहोदयानां विमर्शः।

हिन्दी—यकार का सुस्पृष्टत्व कब हो जाता है, इस विषय में आचार्य कहते हैं—हकार तथा रेफ सहित यकार एवं ऋपरक जो यकार है, वह यदि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दूसरे किसी व्यञ्जन के सहित नहीं हो तो उस यकार को उच्चारण में सुस्पृष्ट वर्ण जकार मानना चाहिए। यहाँ मूल में जो 'एव' आया है, उसका तात्पर्य है—ऋकार के योगमात्र से ही जकार का उच्चारण किया जाता है। यहाँ 'नान्ययुग् यदि' इससे निषेध सूचित होता है। अन्ययुग् शब्द के अन्य पद से उक्त रेफ-हकार-ऋकार के अतिरिक्त तथा यकार के अतिरिक्त व्यंजन वर्ण गृहीत होगा। इससे रेफ-हकार-ऋकार-यकार से ही योग में जकारोच्चारण फलित होता है। जैसा कि—का० प० प्रकाशसूत्र में कहा गया है—'द्विर्भावेऽप्येव'।

पूर्वोक्त-उपसर्गपरावित्यस्य विशेषेण व्याख्यानम्—

(क) उपसर्गपरो यस्तु पदादिरपि दृश्यते।
ईषत्स्पृष्टो यथा 'वियत्' पदच्छेदे परो भवेत्॥

(ख) विभाषया यकारश्च नित्यमाम्रेडितेऽपि च।
यत्र यत्रेति 'मा यज्ञं' तथा मेति पदादपि॥

(ग) अथात उत्तरो यः स्यात् तथा नेति पदात् परः।
भवतीत्यपि पूर्वेव तथा च सपदादपि॥

(घ) अथाव्ययमादित्यादावथो येऽमस्य दृश्यते।
नयत्परो यथा च स्यात् सपदे तदुदाहृताः॥

अन्वयः—उपसर्गपरः यः तु पदादिः अपि दृश्यते (तदा स यकारः) ईषत्स्पृष्टः (ज्ञेयः); यथा 'वियत्' पदच्छेदे परः भवेत्। विभाषया यकारः अपि च आम्रेडिते नित्यम् (यकारः) यत्र यत्र इति मा यज्ञं तथा मा पदात् अपि।

अथ अतः उत्तरः यः स्यात् तथा न इति पदात् परः तथा च स पदात् अपि पूर्व एव भवति इति। अथ वयम् आदित्यादौ अथो ये अस्य दृश्यते न यत् परो यथा च स्यात् स पदे तत् उदाहृतः।

व्याख्या—याज्ञवल्क्यशिक्षायाः वर्णप्रकरणे चतुःपञ्चाशत्तमे पद्ये—'उपसर्गपरो लघू' इत्युक्तम्, तद् व्याख्यानमेवात्र—उपसर्गपरः=प्राद्युपसर्गात् परीभूतः, यः=यकारः, पदादिः=पदस्य आदिः अपि, दृश्यते=अवलोक्यते, तदा, सः =यकारः, ईषत्स्पृष्टः=[illegible] ज्ञेयः=जानीयात्। आशयोऽयं विद्यते यत् तत्र जकारोच्चारणं न कुर्यात्। अत्रोदाहरणमुखेन स्पष्टीकरणं

CC-0. Nepal Rashtriya Abhilekh Academy, Kathmandu Collection

क्रियते; यथा—'वियत्' इत्यस्मिन् स्थाने वि इति उपसर्गपदात्परो यदिति पदस्य आदिरपि यकारः ईषत्स्पृष्ट एव न सुस्पृष्टो जकारः। अयमेव यकारः पदच्छेदे = पदपाठकाले, परो भवेत्। सुस्पृष्टो जकार एवोच्चारणीयः। यथा—व्विषत् इत्यत्र।

उपसर्गात्परस्य पदादिस्थस्यापि यकारस्य यत् ईषत्स्पृष्टत्वमुक्तं स यकाररूपः ईषत्स्पृष्टविधिः। विभाषया = व्यवस्थितविकल्पेन स्यात्। इत्थं यत्र उपसर्गपरो यकारः पादस्यादौ स्थितः। तत्र तत्र—'अनुयोजान्विन्द्रते हरी' तथैव 'इन्द्रमिद्धरी स्तुतीरूप, यज्ञं च मानुषाणाम्' इत्यादौ यकारस्य उपसर्गात्परीभूतस्यापि पादादिस्थाऽभावे सर्वत्रउपसर्गात् परस्य यकारस्य ईषत्स्पृष्टतैवेति नियमः, तेन 'अनु यें व्विश्वे' इत्यत्र अनूपसर्गात् परस्य यकारस्य न जोच्चारणम्; पादादिस्थाऽभावात्। अपि च = एवञ्च, आम्रेडिते = द्विरुक्तपदस्य परस्मिन् रूपे वर्त्तमानः नित्यं यकारः ईषत्स्पृष्ट इत्यर्थः। यथा—यत्र यत्र इति। मा इति पदात् परो यकारः, यथा—'मा यज्ञम्' इति। अत्र नेषत्स्पृष्टत्वम्। अथ—इति, अतः = अस्मात् पदात् उत्तरः परीभूतः, यः = यकारः स्यात्, सोऽपि ईषत्स्पृष्टो न भवेत्। एवं वकारोऽपि बोध्यः। तथैवाग्रे उदाहरिष्यते—'अथाव्वयमादित्यादावथो ये अस्य दृश्यते' इत्यादावूह्यम्।

हिन्दी—याज्ञवल्क्यशिक्षा के वर्णप्रकरण के चौवनवें पद्य में 'उपसर्गपरो लघू' ऐसा कहा गया है। उसी की विशेष व्याख्या करते हुए आचार्य कहते हैं—यदि प्र आदि उपसर्ग से परे जो यकार जो कि पद आदि में भी दिखाई दे, तब वह यकार ईषत्स्पृष्ट कहा जायेगा। कहने का आशय यह है कि जहाँ-तहाँ जकार का उच्चारण नहीं करना चाहिए। यहाँ उदाहरण के द्वारा स्पष्ट किया जाता है; जैसे—'वियत्' इस स्थान में वि उपसर्ग से परे जो यत् है उसका आदि भी यकार ईषत्स्पृष्ट ही है, न कि सुस्पृष्ट जकार। और यही यकार यदि पदपाठकाल में परे हो तो सुस्पृष्ट जकार ही उच्चारण करना चाहिए। जैसे—'व्वि। यत्' यहाँ हुआ है। और उपसर्ग से परे पदादि में स्थित भी यकार का जो ईषत्स्पृष्टत्व कहा गया है, वह यकार रूप ईषत्स्पृष्टविधि विभाषा के द्वारा व्यवस्थित विकल्प से हो। इस प्रकार जहाँ-जहाँ उपसर्ग से परे यकार पाद के आदि में स्थित हो वहाँ-वहाँ 'अनुयोजान्विन्द्रते हरी' तथा इन्द्रमिद्धरी' स्तुतीरूप यज्ञं च मानुषाणाम्' इत्यादि में यकार का उपसर्ग से परे होने पर भी पादादिस्थ नियम से जकार

CC-0. Nepal Sanskrit University. Digitized by eGangotri

का उच्चारण होगा। पादादिस्थ के अभाव में सर्वत्र उपसर्ग से परे यकार का ईषत्स्पृष्टता ही होगा, ऐसा नियम है। उससे 'अनु यँ व्विष्वे' यहाँ अनु उपसर्ग से परे यकार का ज उच्चारण नहीं होगा, पादादिस्थ के अभाव से। इसी प्रकार आम्रेडन में वर्तमान यकार नित्य ईषत्स्पृष्ट होगा। आगे भी इसी प्रकार तर्क करना चाहिए।

वकारस्य अभ्यद्वैशिष्ट्यम्—

(ङ) यदेव लक्षणं यस्य वकारस्यापि तद्भवेत्।
यत्र यत्र विशेषः स्यादिदानीं स स कथ्यते॥

अन्वयः—यस्य यत् एव लक्षणं तत् वकारस्य अपि भवेत्। यत्र यत्र विशेषः स्यात् सः सः इदानीं कथ्यते।

व्याख्या—यस्य = यकारस्य, यत् = यकार-वकारयोः, एव = निश्चयेन, लक्षणम् = स्वरूपम् (प्रोक्तम् = कथितम्), तत् = तत्सर्वम्, वकारस्य = वर्णस्य, अपि = निश्चयेन, भवेत् = स्यादेव, सुस्पृष्टत्वेषत्स्पृष्टत्वविधौ। यत्र यत्र = यस्मिन् स्थाने स्थाने, द्विरुक्तौ निश्चयेन दाढर्यम्, विशेषः = विशेषरूपेण विशिष्टविधिः, स्यात् = भविष्यति भवेद्वा, अपेक्षा भवेत्, सः सः = विशेषः भाविवैशिष्ट्यम्, इदानीम् = अग्रिमे पद्ये, कथ्यते = वर्ण्यते।

हिन्दी—पिछले पद्यों में यकार-वकार से सम्बन्धित स्पृष्टत्व-ईषत्स्पृष्टत्व के विषय में बहुत कुछ कहा गया है, अब विशेष रूप से वकार के विषय में विशेष रूप से कहा जाता है। प्रथमतः यकार का जो लक्षण कहा गया है—वकार का भी वही जाने और जहाँ-जहाँ वकार की जिस विशेष विशिष्टता की अपेक्षा है, वह-वह आगे के पद्य में कहा जाता है।

तत्र के के वकाराः ईषत्स्पृष्टाः स्मृताः—

(च) त्वदर्थवाचिनौ वो वां वा वै यदि निपातजौ।
आदेशाश्च विकल्पार्था ईषत्स्पृष्टास्तु ते स्मृताः॥

अन्वयः—वः वां त्वदर्थवाचिनौ तथा यदि निपातजौ वा वै (शब्दौ) च आदेशाः च विकल्पार्थाः ते तु ईषत्स्पृष्टाः स्मृताः।

व्याख्या—वः = (वकारः) 'बहुवचनस्य वस्नसौ' इति पाणिनिसूत्रेण वस् विहितः, वाम् = इति च युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थानेयोगे' इत्यनेन

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

सूत्रेण सिद्धः, त्वदर्थवाचिनौ = युष्मत्शब्दार्थवाचकौ, तथा = तथैव, यदि = चेत्, निपातजौ = निपातात् जातौ निरर्थकौ, केवलं पादपूर्त्यर्थमेवोपयुक्तौ, वा शब्दो वै शब्दश्च, च = पुनः, आदेशाः = स्थानापन्नाः; 'इको यणचि' 'एचोऽयवायावः' इति सूत्राभ्यामुदाहृताः, च = पुनः, विकल्पार्थाः = वैकल्पिकार्थाः वा शब्दाः, ते = एते सर्वे वकाराः, तु = एवार्थे, ईषत्स्पृष्टाः, स्मृताः = कथिताः। अर्थात् एकमात्रायुताः लघवः उच्चारणीयाः न तु गुरवः। क्रमेणोदाहरणानि यथा—'देवो वः सविता' इति अत्र वसो वकारस्य पदादित्वेन सुसंस्पृष्टत्वे प्राप्तेऽनेन ईषत्स्पृष्टता। 'या वाङ्कशा' इति अत्र वामित्यस्य वकारः ईषत्स्पृष्टः। एवमेवाग्रेऽपि।

हिन्दी—अब कौन-कौन वकार ईषत्स्पृष्ट माने गये हैं, इस विषय में कहते हैं—त्वत् (तुम्हारा) अर्थवाची वः, वां तथा निपात से उत्पन्न वा-वै शब्द, आदेश से परिणत शब्द तथा वैकल्पिक अर्थ को कहने वाला 'वा'—ये सब ईषत्स्पृष्ट कहे गये हैं। अर्थात् इन्हें लघु उच्चारण करें, दीर्घ नहीं, ऐसा विद्वानों का मत है। उदाहरण व्याख्या भाग से ज्ञात करें।

वेदाध्येतॄणां विशेषा धर्माः समाचरणीयाः—

(क) उपांशु त्वरितं वापि योऽधीते विन्नसन्नपि।
अपरूपसहस्राणां सन्देहे स प्रवर्त्तते॥

(ख) पञ्चविद्यां न गृह्णन्ति जडास्तब्धाश्च ये नराः।
अलसाश्चातिरोगाश्च येषां च विस्मृतं मनः॥

(ग) अहेरिव गणाद्भीतः सम्मानान् नरकादिव।
राक्षसीभ्य इव स्त्रीभ्यः सविद्यामधिगच्छति॥

(घ) न भोजनविलम्बी स्यान्न च नारीनिबन्धनः।
सुदूरमपि विद्यार्थं व्रजेद् गरुडहंसवत्॥

(ङ) सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।
सुखिनश्च कुतो विद्या विद्यार्थिनि कुतः सुखम्॥

(च) गुणिता शतशो विद्या सहस्रावर्तिता पुनः।
आगच्छत्येव जिह्वाग्रं स्थलान् निम्नमिवोदकम्॥

(छ) शतेन गुणिताऽऽयाति सहस्रेण च तिष्ठति।
जन्मान्तरसहस्रेण प्रेत्य चेह च तिष्ठति॥

CC-0. Nepal Rashtriya Abhilekh Prabandhan Kendra Kathmandu Collection

(ज) जलमभ्यासयोगेन शैलानां कुरुते क्षयम् ।
कर्कशानां मृदुस्पर्शं किमभ्यासान् न साधयेत् ॥
(झ) यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥
(ञ) शुश्रूषारहिता विद्या अपि मेधागुणैर्युता ।
वन्ध्येव युवती तस्य न विद्या फलिनी भवेत् ॥
(ट) गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा ।
अथवा विद्यया विद्या चतुर्थो नोपलभ्यते ॥
(ठ) हयानामिव जात्यानामर्द्धरात्रार्द्धशायिनाम् ।
नहि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥
(ड) यथा पिपीलिकाभिश्च क्रियते पांसुसञ्चयः ।
न बलं नात्र सामर्थ्यमुद्यमस्तत्र कारणम् ॥
(ढ) अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम् ।
अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मभिः ॥
(ण) अन्नव्यञ्जनयोर्भागौ तृतीयमुदकस्य च ।
वायुसञ्चरणार्थाय चतुर्थमुपकल्पयेत् ॥

एते उपर्युक्ताः श्लोका अत्र अनपेक्षिता अपि प्रकरणरहिताः सन्ति, किन्तु अनेकपुस्तकेषूपलभ्यन्ते, अतोऽत्रापि तेषां सन्निवेशः । एषां व्याख्यानमस्यैव ग्रन्थस्य प्रकीर्णकस्थले द्रष्टव्यः । एषु श्लोकेषु विद्याधिगमस्योपाया वर्णिताः सन्ति ।

हकारस्य स्थानविशेषे वैशिष्ट्यम्, कुत्र औरसत्वं कुत्र वा कण्ठ्यत्वम्—

हकारं पञ्चमैर्युक्तमन्तस्थाभिश्च संयुतम् ।
औरसं तं विजानीयात् कण्ठ्यमाहुरसंयुतम् ॥ ५७ ॥
हकारो यत्र पूर्वस्थो ह्यन्तस्थाद्यो भवेत् परः ।
पदकाले वियुज्येत संहितायां स औरसः ॥ ५८ ॥

अन्वयः—पञ्चमैः युक्तम् अन्तस्थाभिः च संयुतं तम् औरसं विजानीयात्, असंयुतं कण्ठ्यम् आहुः ॥ ५७ ॥

यत्र हकारः पूर्वस्थः, हि अन्तस्थाद्यः परः भवेत्, (तत्र) पदकाले वियुज्येत, संहितायां स हकारः औरसः (उच्चारणीयः) ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या--पञ्चमैः = कवर्गादिवर्गाणां पञ्चमवर्णैः ङञणनमैः (ङकार-ञकार-णकार-नकार-मकारैः), युक्तम् = हकारम्, अन्तस्थाभिः = यरलवैः, संयुतम् = संयुक्तम्, तम् = हकारम्, औरसम् = उरःस्थानोत्पन्नम्, विजानीयात् = बुध्येत। असंयुतम् = असम्पृक्तम्, वर्गपञ्चमाक्षरैः अन्तस्थवर्णैश्च अयुक्तं हकारम्, कण्ठ्यम् = कण्ठस्थानीयम्, आहुः = कथयन्ति, वैदिकविद्वांसः इति। अस्योदाहरणं यथा--'ब्रह्मणे ब्राह्मणम्' इति। 'गेह्याय च' इत्यादौ हकारः औरसः उच्चारणीयः। 'नमो रोहिताय' इत्यादौ असंयुतो हकारः कण्ठेन उच्चारणीयः। यत्र = यस्मिन् स्थाने, संयोगे, हकारः = हकारवर्णः, पूर्वस्थः = पूर्वे तिष्ठतीति, यकारात् प्राक् स्थितः, हि = निश्चयेन, अन्तस्थाद्यः = अन्तस्थानां वर्णानाम् आद्यः = प्रथमः यकारः, परः = हकारात् उत्तरत्र स्थितो भवेत्, तत्र तादृशः हकारः स पदकाले = पदपाठकाले, यकारेण इति, वियुज्येत = विच्छेदं प्राप्नुयात्, पृथक् भवति, तेन कण्ठस्थानीय एव हकार उच्चारणीय इत्यर्थः, यथा--'सिꣳह्यसि' इत्यस्य पदपाठे--'सि ठं ही। असि'। अनेन प्रकारेण यकारेण वियुक्तो हकारः, कण्ठ्यः = कण्ठस्थानीयः, संहितायाम् = क्रमादिसन्धौ, सः = हकारः, यकारयोगेन, औरसः = उरसा निष्पन्नः उरस्त एवोच्चारणीयः।

हिन्दी--हकार वर्ण का स्थान-विशेष में वैशिष्ट्य और कहीं औरसत्व है तथा कण्ठस्थानीयत्व है, इस विषय में आचार्य कहते हैं कि--कवर्गादि वर्गों के पञ्चम अक्षर ङ-ञ-ण-न-म से युक्त हकार और अन्तस्थ वर्ण य-र-ल-व से संयुक्त हकार को औरस = उरःस्थानीय (हृदयस्थान से उच्चरित होने वाला) वर्ण जानना चाहिए और असंयुत वर्गों के पञ्चमाक्षर अन्तस्थ वर्णों से अयुक्त हकार को कण्ठस्थानीय कहते हैं (अकुहविसर्जनीयानां कण्ठः)--ऐसा वैदिक विद्वान् कहते हैं। इनके उदाहरण क्रमशः इस प्रकार हैं--'ब्रह्मणे ब्राह्मणम्', 'गेह्याय च' इत्यादि में हकार औरस (हृदय से) उच्चारण करना चाहिए और 'नमो रोहिताय' इत्यादि में असंयुत हकार कण्ठ के द्वारा उच्चारण करना चाहिए।

इसके सम्बन्ध में विशेष व्यवस्थापन करते हुए कहते हैं--जहाँ संयोग में हकार पूर्वस्थ यकार से पहले स्थित हो और अन्तस्थों के आद्य अक्षर यकार से परे हकार के बाद स्थित हो, वहाँ वैसा हकार पदपाठकाल में यकार से

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

वियुक्त होकर अलग हो जाय तो उससे कण्ठस्थानीय ही हकार उच्चारण करना चाहिए।

जैसे—'सिꣳह्यसि' इसके पदपाठकाल में 'सिꣳ ही। असि' इस प्रकार यकार से वियुक्त हकार कण्ठस्थानीय है। संहिता में क्रमादि सन्धि में वह हकार यकार के योग से औरस (हृदय से उत्पन्न हुआ) उच्चारण करना चाहिए।

इति श्रीमुनिवरमहर्षियाज्ञवल्क्यप्रोक्तायां शिक्षायां वर्णप्रकरणे विवृतौ सन्ध्यधिकारः।

अथ वर्णोच्चारणविधिः

तत्रादौ औरसहकारस्योच्चारणे ध्वनिः कीदृक् कर्त्तव्यः—

मेघदुन्दुभिनिर्घोषो ज्ञायते पयसो ह्रदात्।
एवं नादः प्रयोक्तव्यः सिंहस्य रुदितं यथा॥ ५९॥

अन्वयः—मेघदुन्दुभिनिर्घोषः (यथा) ज्ञायते, ह्रदात् पयसः (निर्घोषो यथा ज्ञायते) (अथ च) सिंहस्य रुदितं यथा (ज्ञायते) एवं नादः प्रयोक्तव्यः।

व्याख्या—मेघदुन्दुभिनिर्घोषः—मेघस्य=जलधरस्य, दुन्दुभेः=वाद्यविशेषस्य, च=पुनः, निर्घोषः=नादशब्दः (णद अव्यक्ते शब्दे), यथा=येन प्रकारेण, ज्ञायते=परिज्ञायते, श्रूयते श्रवणं भवति वा, ह्रदात्=जलाशयात् (उत्थितस्य), पयसः=जलस्य, च (निर्घोषो यथा भवति तथा), (अथ च=अतोऽपि) सिंहस्य=मृगपतेः, रुदितम्=गर्जनविशेषः, यथा=यादृशः, ज्ञायते, एवम्=तादृशम् (औरसहकारोच्चारणे), एतादृशः नादः=शब्दविशेषः, प्रयोक्तव्यः=प्रयोगो विधेय इति।

हिन्दी—अब वर्णोच्चारण-विधि के प्रारम्भ में औरस हकार के उच्चारण में ध्वनि कैसी करनी चाहिए, इस विषय में कहते हैं कि—मेघ की गर्जना, बृहत् जलाशय से निकलने वाले जलप्रपात एवम् सिंहगर्जन से उत्थित शब्द की ध्वनि के समान औरस हकार के उच्चारण में नाद (अव्यक्त शब्द) करना चाहिए। कहने का आशय यह है कि हकार कण्ठस्थानीय है किन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जब विशेष परिस्थिति में हृदय से उच्चरित होता है तो उसे मेघ और दुन्दुभि एवं सिंह के गर्जन के समान हकार का उच्चारण हो।

पुनश्च प्रकारान्तरेणोद्भावयति—

मासे भाद्रपदे मेघाः शब्दं कुर्वन्ति यादृशम्।
एवं गह्वरमासाद्य 'शुक्रं दुदुह्लेऽह्लयः' दर्शनम्॥ ६०॥

अन्वयः—भाद्रपदे मासे मेघाः यादृशं शब्दं कुर्वन्ति, एवं गह्वरम् आसाद्य (शब्दो यथा भवति तथा नादः कर्त्तव्यः)। यथा—'शुक्रं दुदुह्लेऽअह्लयः' (इति) निदर्शनम्।

व्याख्या—भाद्रपदे=भाद्रपदमासे=मासि, मेघाः=जलधाराः, यादृशं=यत्प्रकारकं, शब्दं=गर्जनं, कुर्वन्ति, एवम्=तथा च, गह्वरम्=कन्दराम्, आसाद्य=प्राप्य अर्थात् मेघगर्जनस्य शब्दः पर्वताभ्यन्तरप्रदेशात् निःसृत्य यादृशं शब्दं करोति तद्वत् नादः=शब्दः कर्त्तव्यः, यथा=येन प्रकारेण, उदाहरणम् 'शुक्रं दुदुह्लेऽअह्लयः' इत्यस्मिन् स्थाने हकारोच्चारणे औरसः नादः प्रयुज्यते। अन्तस्थयोगेन औरसत्वविधानात्। इति=इत्येवम्, निदर्शनम्=उदाहरणं भवति।

हिन्दी—औरस हकार के उच्चारण के विषय में प्रकारान्तर से उद्भावना की जाती है—भादो के महीने में मेघ-गर्जन के समय उसकी प्रतिध्वनि जब पर्वतकन्दरा से निकलती है और उस समय जैसा शब्द सुनायी देता है तद्वत् शब्द करना चाहिए। जैसा कि—'शुक्रं०'; इस स्थान में हकार के उच्चारण में औरस नाद का प्रयोग हुआ है। अन्तस्थ के योग में औरसत्व-विधान का यह निदर्शन हुआ।

कथं वर्णाः प्रयोक्तव्याः—

शाखायां वानरा यद्वन्निपतन्त्युत्पतन्ति च।
एवं वर्णाः प्रयोक्तव्या 'इह्हे हैंषां' निदर्शनम्॥ ६१॥

अन्वयः—वानराः शाखायां यद्वत् निपतन्ति उत्पतन्ति च, एवं वर्णाः प्रयोक्तव्याः, 'इह्हे हैंषां' निदर्शनम्।

व्याख्या—वानराः=कपयः, शाखायां=वृक्षशाखायाम्, उत्प्लुत्य शाखान्तर-गमने, यद्वत्=येन प्रकारेण, निपतन्ति=वृक्षशाखात् भूमौ आगच्छन्ति, च=

CC-0. Nepal Rashtriya Pustakalaya Collection. Digitized by eGangotri

पुनः, उत्पतन्ति = आरोहन्ति, शाखातः शाखां गच्छन्ति, एवं = तद्वत्, वर्णाः = अक्षराणि, प्रयोक्तव्याः = प्रयोगं कर्त्तव्याः ।

हिन्दी—औरस हकार के प्रयोग के साथ ही सभी वर्णों का कैसे कहाँ प्रयोग करना चाहिए, इस विषय में कहते हैं—वानर जिस प्रकार इस शाखा से उस शाखा पर गिरते-उछलते-कूदते हैं उसी प्रकार से वर्णों का प्रयोग करना चाहिए। वानरों के चढ़ने और उतरने में जैसे बीच में विलम्ब नहीं लगता है, उसी प्रकार अनुदात्त का उच्चारण करके उदात्त के उच्चारण के बीच में विलम्ब नहीं करना चाहिए। उसी प्रकार उदात्त में विरमित होकर बीच में विलम्ब नहीं करते हुए स्वरित में विराम करना चाहिए। इसी प्रकार से दूसरे भी वर्ण का प्रयोग करना चाहिए। किसी भी स्वर का उच्चारण करते हुए बीच में विलम्ब न करे अपितु स्वर का उच्चारण करके ही विराम करे।

पुनः संयोगाद्यक्षरे कथं वर्णाः प्रयोक्तव्याः—

कुक्कुटः कामलुब्धो यः ककारद्वयमुच्चरेत् ।
एवं वर्णाः प्रयोक्तव्याः 'कुक्कुटोसी'ति दर्शनम् ।। ६२ ।।

अन्वयः—कामलुब्धः कुक्कुटः ककारद्वयं यथा उच्चरेत् एवं वर्णाः प्रयोक्तव्याः । तत्र 'कुक्कुटोसि' इति दर्शनम् ।

व्याख्या—कामलुब्धः—कामेन लुब्धः = रिरंसया प्रेरितः, कुक्कुटः = पक्षिविशेषः 'मुर्गा' इति लोके प्रसिद्धः, 'कुकड़ूं कूं कुकड़ूं कूं' इति शब्दमुच्चारयन् ककारद्वयम् = द्वित्वरूपेण ककारोच्चारणं, यथा = येन प्रकारेण, उच्चरेत् = उच्चारणं कुर्यात्, एवं=तद्वत्, वर्णाः=द्विवर्णसंयुक्ताः, प्रयोक्तव्याः=प्रयोगं कुर्यात् । तत्र दर्शनम् = उदाहरणं विद्यते—'कुक्कुटोसि', इति ज्ञेयं = बोद्धव्यम् । अत्रायमाशयः—तुल्याक्षरसंयोगादि ककारमुच्चार्य मध्ये मात्रामेकां विरम्य स्थानकरणविच्छेदम् अकुर्वन् अग्रिमं ककारम् उकारविशिष्टं वदेत् । तथा चोक्तं प्रातिशाख्ये—'द्विवर्णमेकवर्णवद्धारणात् स्वरमध्ये समानपदे' इति ।

हिन्दी—अब संयोगादि अक्षर में कैसे वर्ण का प्रयोग करना चाहिए, इस विषय में कहते हैं—रमण करने की इच्छा से कामपीड़ित मुर्गा जिस प्रकार द्वित्व रूप से ककार का उच्चारण 'कुकड़ूं कूं कुकड़ूं कूं' इस शब्द का उच्चारण करता है, उसी प्रकार वर्णों का प्रयोग करना चाहिए। जैसा कि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

उदाहरण है—'कुक्कुटोसि'। यहाँ यह आशय है कि समान अक्षर के संयोग से आदि ककार को उच्चारण करके बीच में एक मात्रा को विरमित करके, स्थान-करणविच्छेद नहीं करते हुए अग्रिम ककार को उकारविशिष्ट उच्चारण करना चाहिए। प्रातिशाख्य में भी इस बात की पुष्टि हुई है।

चवर्गपञ्चमाक्षरस्य ञकारस्योच्चारणविधिमाह—

यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्।
एवं वर्णाः प्रयोक्तव्या 'युञ्जान' इति दर्शनम्॥ ६३॥

अन्वयः—यथा पुत्रवती स्नेहात् निजम् औरसं चुम्बते, एवं वर्णाः प्रयोक्तव्याः। (अत्र) 'युञ्जान' इति दर्शनम् (भवति)।

व्याख्या—यथा=येन प्रकारेण, पुत्रवती=पुत्रः अस्ति यस्याः एवम्भूता सा माता, स्नेहात्=वात्सल्यभावात्, प्रेम्णः आधिक्येन, औरसम्=आत्मजम्, निजम्=स्वीयमिति यावत्, चुम्बते=चुम्बनं करोति, मुखम् आलिङ्गति, एवम्=तद्वत्, वर्णाः=चवर्गपञ्चमविशिष्टाः, प्रयोक्तव्याः=प्रयोगं विधेयाः, अत्र=अस्मिन् स्थाने, 'युञ्जानः' इति=एतद्, दर्शनम्=उदाहरणम्=दृष्टान्तः। अत्रायं निष्कर्षः—यद्वत् जनन्याः स्वपुत्रमुखचुम्बने मुखाकृतिः वर्तुलाकारा भवति, तद्वत् चवर्गपञ्चमस्य ञकारस्योच्चारणेऽपि—वर्तुलविवृत-मुखाकृत्या सुस्पृष्टता कर्त्तव्येति। निदर्शनं चोपलक्षणम्। तेन 'सञ्ज्ञानमसि' इत्यादावपि तथाविधमुखाकृत्या उच्चारणेन वैदिकानां सञ्जजं जानेति श्रुति-र्जायते। तथाहि—रसनाग्रभागेन अधोदन्तमूलं स्पृष्ट्वा, जिह्वामध्येन च तालुं स्पृष्ट्वा जकारे उच्चारिते मुखस्य वर्तुलविवर्तनं भवति, अत एव तत्र नकार-ञकाराभ्यां मिलितेव श्रुतिः श्रूयते इति भावः, एतेन य (ञ्ज) ज्ञशब्दे यग्येति यद्गेति वोच्चारणं निरस्तम्। जिह्वामध्येन तालावुच्चारणात् तथा-श्रुतेरनुपलब्धेः। किं च जिह्वामध्यस्य तालुसंलग्ने जाते स्वभावतः जिह्वा-ग्रस्याधो दन्तमूलस्पर्शो जायते। तेन जकारस्थाने दकाररूपा ञकारस्थाने च नकाररूपा श्रुतिर्भासते; किञ्चिद्दन्तसम्बन्धात्। सा च भासमाना श्रुतिः अंशः सम्यक्स्थानकरणयोरपरिचयेन यद् नेति अनुक्रियते। यतो दकार-नकार-योरुच्चारणे जिह्वाग्रस्य ऊर्ध्वाधो दन्ते लग्नत्वात्, जकार-ञकारयोरुच्चारणे जिह्वाग्रस्य अधोदन्तमूललग्नेऽपि जिह्वामध्यस्य तालुस्पृष्टत्वेन स्थानकरणभेदः स्पष्ट इति दीक्षितमहाशयानां विमर्शः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—यहाँ चवर्ग के पञ्चम वर्ण ञकार की उच्चारण-विधि को कहते हैं—जिस प्रकार पुत्र वाली माता स्नेह से वात्सल्य भाव से अपने औरस (अपने ही से उत्पन्न) पुत्र को चूमती है और उस समय उसकी मुखाकृति गोलाकार हो जाती है, उसी प्रकार चवर्ग पञ्चमाक्षर ञकार के उच्चारण में भी गोलाकर खुले मुखाकृति से सुस्पृष्टता करनी चाहिए। तथाविध आचरण से 'सञ्ज्ञानमस्ति' इत्यादि में भी उस प्रकार से मुखाकृति के द्वारा उच्चारण से वैदिकों के 'सञ्जजें' श्रुति होती है। अधिक विमर्श संस्कृत टीका में देखें।

तवर्गपञ्चमाक्षरस्य तुल्याक्षरयोगे कथं वर्णाः प्रयोक्तव्याः—

वडवा च हयं दृष्ट्वा योनिं विकुरुते यथा।
एवं वर्णाः प्रयोक्तव्याः 'स दुन्दुभे' निदर्शनम् ॥ ६४ ॥

अन्वयः—वडवा च हयं दृष्ट्वा यथा योनिं विकुरुते एवं वर्णाः प्रयोक्तव्याः, 'सदुन्दुभे' निदर्शनम्।

व्याख्या—वडवा=घोटिका, हयम्=घोटकम्, अश्वं, दृष्ट्वा=अवलोक्य, यथा=येन प्रकारेण, योनिं=योनिमण्डलं, विकुरुते=सङ्कोचयति, विकासयति चेत्थं विविधप्रकारकं करोति, एवम्=तेन प्रकारेण, वर्णाः=अक्षराणि, प्रयोक्तव्याः=प्रयोगं विधेयाः। इत्यत्र निदर्शनम्=उदाहरणं, विद्यते—'सदुन्दुभे' इति। अत्र विशेषकथनम्—सदुन् इत्युच्चारणे विवृतम् ओष्ठमण्डलं किञ्चिन्नासाग्रसंलग्नं मात्राकालं यावत् धृत्वा ततो 'दुन्दुभे' इत्युच्चारणीयम् इत्यर्थः, एतेन नकारस्थलेऽनुस्वारवदीषत्स्पृष्टता प्रयत्नाल्पकृता वारिता भवति।

हिन्दी—तवर्ग पञ्चमाक्षर (न) के समान अक्षर के योग में वर्ण का प्रयोग कैसे करना चाहिए, इस विषय में कहते हैं—कामातुरा घोड़ी घोड़े को देखकर जिस प्रकार योनिमण्डल को संकुचित तथा फैलाव करती है, उसी प्रकार वर्णों का प्रयोग करना चाहिए। यहाँ उदाहरण है—'सदुन्दुभे'। यहाँ 'सदुन्' इस उच्चारण में विवृत ओष्ठमण्डल को कुछ नाक के अग्रभाग से संलग्न मात्रा काल तक धारण करके तब 'दुभे' उच्चारण करना चाहिए। इससे नकारस्थल में अनुस्वार के समान ईषत्स्पृष्टता प्रयत्न अल्पकृत निषिद्ध होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तुल्याक्षरयोगे सति पवर्गपञ्चमस्यापि उच्चारणे वैलक्षण्यम्—

दर्दुरोदरदेशौ तु प्रफुल्लेते पुनर्यथा।
एवं वर्णाः प्रयोक्तव्या 'अपाम्फेने' निदर्शनम् ॥ ६५ ॥

अन्वयः—दर्दुरोदरदेशौ तु प्रफुल्लेते, पुनः यथा एवं वर्णाः प्रयोक्तव्याः। (तत्र) 'अपाम्फेने' (इति) निदर्शनम्।

व्याख्या—दर्दुरोदरदेशौ—दर्दुरस्य=भेकस्य, 'मेढक' इति ख्यातस्य ('भेको मण्डूक-वर्षाभू-प्लव-दर्दुराः' इत्यमरः), उदरस्य देशौ=प्रान्तौ, 'पेट' इति ख्यातस्य प्रदेशौ, प्रफुल्लेते=फुल्लतां प्राप्नुवतः अर्थात् वायुपूरणेन स्थूलौ भवतः, पुनः=तदनन्तरम्, यथा=येन प्रकारेण, प्रकृत्या स्थितौ वर्तेते, एवम्=तथा, वर्णाः=अक्षराणि, प्रयोक्तव्याः=प्रयोगं विधेयाः। तत्र—'अपाम्फेने' इति=इत्येतत्, निदर्शनम्=उदाहरणम्, दृष्टान्तः। तद्यथा—यथात्र मकारोच्चारणे गण्डस्थले किञ्चित् फुल्लतां विधाय संवरणञ्च कृत्वा फेकारोच्चारणे भूयोऽपि प्रफुल्लौ कपोलौ भवतः तथा पवर्गपञ्चमाक्षरस्य स्ववर्गसहितस्य सर्वत्रोच्चारणं कर्त्तव्यम्। एतेन मकारवर्णेऽपि प्रयत्नदीर्घता सूचिता भवति नकारवर्णवत्।

हिन्दी—समान वर्ण के योग होने पर पवर्ग पञ्चम वर्ण के उच्चारण की विलक्षणता के विषय में कहते हैं—जिस प्रकार मेढ़क उदरदेश (गालों) को 'टर्रं टें टर्र टें' शब्द करते समय बार-बार फुला लेता है, उसी प्रकार 'अपाम्फेन' आदि स्थानों पर फकार वर्ण का प्रयोग करना चाहिए। 'अपाम्फेने' इस दृष्टान्त में मकार वर्ण के उच्चारण में दोनों गालों को कुछ फुलाकर और संकुचित कर फेकार के उच्चारण में फिर गाल फूल जाते हैं तथा पवर्ग पञ्चम वर्ण अपने वर्ग सहित सर्वत्र उच्चारण करना चाहिए। उससे मकार में भी प्रयत्नदीर्घता नकार के समान सूचित होती है।

अग्रे विसर्गे प्राप्ते तत्पूर्वाक्षरस्य गुरुत्वं विसर्गे चेषद्विरामः—

यथा भारभराऽऽक्रान्ता निश्वसन्ति नरा भुवि।
एवं वर्णाः प्रयोक्तव्या 'अद्भ्यः सम्भृत' इत्यपि ॥ ६६ ॥

अन्वयः—भारभराक्रान्ताः नराः भुवि यथा निःश्वसन्ति एवं वर्णाः प्रयोक्तव्याः। (तत्र) 'अद्भ्यः सम्भृत' इत्यपि (निदर्शनं भवति)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—भारभराक्रान्ताः—भारभरेण=भाराधिक्येन, आक्रान्ताः=पीडिताः सन्तः, नराः=मनुष्याः, पुरुषा इति यावत्, भुवि=पृथिव्यां, शीतलच्छायायां स्थित्वा=उपविश्य, यथा=येन प्रकारेण, निःश्वसन्ति=श्वासं परित्यजन्ति गृह्णन्ति च, कियन्तं कालं मुखं विवृत्य ततः संवृण्वन्ति, एवम्=अनेन विधानेन, वर्णाः=विसर्गान्ता, प्रयोक्तव्याः। तत्र 'अद्भ्यः सम्भृतः' इत्यपि, निदर्शनं=दृष्टान्तो भवति। यथा अत्र ऊष्मणः प्राग्वर्त्तिनो वर्णस्य विसर्गेण सहोच्चारणात् गुरुत्वं कृत्वा विसर्गे विवृतं मुखं मात्रां यावद् ध्रियते ततः सम्भृत इत्युच्चार्यते तथैवान्यत्रापि विसर्गोच्चारणे कर्त्तव्यमिति। इत्येष विमर्शः दीक्षितानाम्।

हिन्दी—वर्ण के आगे विसर्ग हो, उसके पूर्वाक्षर का गुरुत्व हो तथा विसर्ग में ईषद्विराम हो—इस विषय में आचार्य कहते हैं—जिस प्रकार भारी बोझ के भार से श्रान्त मनुष्य भूमि पर बैठकर श्वास-प्रश्वास लेता है और छोड़ता है, उसी प्रकार विसर्ग युक्त वर्ण का उच्चारण करना चाहिए। यहाँ 'अद्भ्यः सम्भृत' यह उदाहरण है। यहाँ श्वास छोड़कर वर्णों का उच्चारण करना चाहिए। इस उदाहरण में ऊष्मा के पूर्ववर्ती वर्ण का विसर्ग के साथ उच्चारण से गुरुत्व करके विसर्ग में विवृत मुख मात्रा को जब तक धारण करे तदनन्तर सम्भृत उच्चारण किया जाता है उसी प्रकार वर्णों का उच्चारण करे।

तथैवानुस्वारे परे पूर्वाक्षरस्य गुरुत्वम्—

यथा कामातुरा नारी शब्दं कुर्याद्दिने दिने।
तच्छब्दं कुरुते प्राज्ञः 'सिꣳह्यसि' निदर्शनम्॥ ६७॥

अन्वयः—कामातुरा नारी दिने दिने शब्दं यथा कुर्यात् तथा प्राज्ञः तत् शब्दं कुरुते। (अत्र) 'सिꣳह्यसि' इति निदर्शनम् (भवति)।

व्याख्या—कामातुरा=कामपीडिता, रतिभावं प्राप्ता, नारी=स्त्री, योषित्, दिने दिने=प्रतिदिनम् रात्रौ पतिप्रसङ्गे, शब्दं='सिऽ सिऽ' इति ध्वनिम्, यथा=येन प्रकारेण, कुर्यात्=विदध्यात् करोति वा, तथा=तेनैव प्रकारेण, प्राज्ञः=प्रकृष्टधीः, बुद्धिमान् पुरुषः, तत् शब्दं=तदनुकारिध्वनिम्, अनुस्वारे ꣳकाररूपे, कुरुते=कुर्वीत इति। तत्र 'सिꣳह्यसि' इति, निदर्शनम्=उदाहरणं भवति। एतत् संयोगमात्रपूर्ववर्णस्य गुरुत्वोपलक्षणम्। तेनात्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथा ञिकारोच्चारणे गुरुत्वं तथा संयोगे परेऽनुस्वारस्य ँकाररूपस्योच्चारणेऽपि गुरुत्वमिति दीक्षिताः ।

हिन्दी—अब अनुस्वार के परे पूर्व वर्ण के गुरुत्व के विषय में आचार्य कहते हैं—जिस प्रकार कामपीड़िता कोई स्त्री पति के साथ संभोग करती हुई प्रतिदिन रात्रि में मैथुन के समय 'सिऽ सिऽ' शब्द करती है, उसी प्रकार बुद्धिमान् पुरुष उस ध्वनि के अनुकरण पर अनुस्वार रूप में भी करे। इसका सुस्पष्ट उदाहरण है—'सिँह्यसि'। यह संयोग मात्र पूर्व वर्ण के गुरुत्व का उपलक्षण है, इससे यहाँ जैसे सिकार के उच्चारण में गुरुत्व तथा संयोग से परे अनुस्वार का ँकार रूप के उच्चारण में भी गुरुत्व होगा।

ह्रस्वाक्षरस्य गुरुत्वव्यञ्जनानन्तरमधुना दीर्घस्यापि गुरुत्वबोधनम्—

पक्षौ वितत्य खे गृध्रो भ्रान्त्या सङ्कुच्य तिष्ठति ।
एवं वर्णाः प्रयोक्तव्या 'बार्द्धीनसो' निदर्शनम् ॥ ६८ ॥

अन्वयः—गृध्रः भ्रान्त्या खे पक्षौ वितत्य (पुनः) सङ्कुच्य तिष्ठति, एवं वर्णाः प्रयोक्तव्याः । (तत्र) 'बार्द्धीनसः' इति निदर्शनम् (भवति) ।

व्याख्या—गृध्रः = गिद्ध इति ख्यातः पक्षी, भ्रान्त्या = भ्रान्तिवशेन, खे = आकाशे, गगने, पक्षौ = पक्षद्वयमपि (पक्ष = पंख इति भाषायां सुप्रसिद्धः), वितत्य = विस्तीर्य, प्रसारणं कृत्वा, पुनः = भूयोऽपि, सङ्कुच्य = सङ्कोचं कृत्वा, सङ्कुचनं यथा स्यात्तथा, तिष्ठति = तत्रैव स्थितिं धत्ते, एवम् = तथैव, वर्णाः = दीर्घाः गुरुभूताः, प्रयोक्तव्याः=प्रयोगे प्रापणीयाः । तत्र 'बार्द्धीनसः' इति = एतत्, निदर्शनम् = उदाहरणम् (भवति) । अत्र निष्कर्षः—'बार्द्धं' इत्यस्योच्चारणे मुखं विवृत्य पुनः त्वरयैव सङ्कुचनं क्रियते बाकारस्य गुरुत्वविधानाय । तेनैव प्रकारेणान्यस्मिन् स्थानेऽपि गुरुभूताः दीर्घवर्णाः समुच्चारणीयाः इत्याशयः ।

हिन्दी—ह्रस्व वर्ण के गुरुत्व व्यक्त करने के पश्चात् अब दीर्घ वर्ण का भी गुरुत्वबोधन कहा जाता है। जैसे गीध आकाश में उड़ते समय अपने दोनों पंखों को फैलाकर और फिर सिकोड़ कर आकाश में ही स्थित रहता है, उसी प्रकार दीर्घ वर्ण का गुरुभूत प्रयोग करना चाहिए। वहाँ 'बार्द्धीनसः' यह उदाहरण होगा। जैसे—'बार्द्धं' इस उच्चारण में मुँह को फैलाकर फिर शीघ्र ही संकोच कर लेता है—बाकार को गुरुत्व करने के लिए, इसी प्रकार गुरुभूत दीर्घ अन्यत्र भी उच्चारण करना चाहिए।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

रङ्गस्वरोच्चारणं कथं कर्त्तव्यम्—

रङ्गे चैव समुत्पन्ने नो ग्रसेत् पूर्वमक्षरम् ।
स्वरं दीर्घं प्रयुञ्जीत पश्चान्नासिक्यमुच्चरेत् ॥ ६९ ॥

अन्वयः—रङ्गे समुत्पन्ने च एव पूर्वम् अक्षरं न ग्रसेत्, (किन्तु) स्वरं दीर्घं प्रयुञ्जीत, पश्चात् नासिक्यम् आचरेत् ।

व्याख्या—रङ्गे समुत्पन्ने = नकार-मकारयोर्विकारेण उपधाऽनुनासिक्ये जाते, पूर्वम् = पूर्ववर्तिनम्, अक्षरम् = वर्णम्, न = नहि, ग्रसेत् = ग्रसनं कुर्यात् । अर्थात् अनुस्वारे इव पूर्वाक्षरस्य गुरुत्वकरणेन शीघ्रं वाङ्नोच्चरेत्, (किन्तु) स्वरं = स्वरवर्णं पूर्वाक्षरम्, दीर्घं = विलम्बितम्, प्रयुञ्जीत = उच्चारणं कुर्यात् । पश्चात् = पूर्ववर्णस्य दीर्घभावेन समुच्चारणानन्तरम्, नासिक्यम् = अर्धानुस्वारं रङ्गनामधेयम्, उच्चरेत् = उच्चारणं कुर्यात् । एतेन मात्रिके अकारस्वरेऽपि संवृतत्वाऽविघातं यथा स्यात्तथा दीर्घत्वं योजनीयम् ।

हिन्दी—रङ्ग स्वर (नकार और मकार के विकार में जो उपधा-अनुनासिक्य होता है उसके) का उच्चारण कैसे करना चाहिए, इस विषय में कहा जाता है कि रङ्ग के उत्पन्न होने पर अर्थात् नकार-मकार के विकार से उपधा-अनुनासिक हो जाने पर पूर्व अक्षर को नहीं ग्रसे अर्थात् अनुस्वार के समान पूर्वाक्षर को गुरुत्व करने से शीघ्र वाणी उच्चरित न करे, किन्तु स्वर पूर्वाक्षर को दीर्घ अर्थात् विलम्बित उच्चारण करे । इसके बाद पूर्वाक्षर के दीर्घ उच्चारण के पश्चात् नासिक्य-अर्धानुस्वार रङ्ग का उच्चारण करे । इससे मात्रिक अकार स्वर में भी संकोच का अविघात जैसे हो वैसे दीर्घत्व की योजना करे ।

पुनः कथं रङ्गः प्रयोक्तव्यः—

यथा सौराष्ट्रिका नारी अराँ २ ॥ इत्यभि भाषते ।
एवं रङ्गः प्रयोक्तव्यो ङकारपरिवर्जितः ॥ ७० ॥

अन्वयः—सौराष्ट्रिका नारी यथा अराँ २ ॥ इति अभिभाषते एवं रङ्गः ङकारपरिवर्जितः प्रयोक्तव्यः ।

व्याख्या—सौराष्ट्रिका = सौराष्ट्रदेशोत्पन्ना (काठियावाड़ इति ख्यातः सौराष्ट्रः, अपि च यत्र सोमनाथज्योतिर्लिङ्गस्य स्थानम्) नारी = स्त्री,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'अरां २ ऽ ॥' इति = एवम्, अभिभाषते = वदति, एवम् = तेनैव प्रकारेण, रङ्गः = अर्धानुस्वारपरिमितः, ङकारपरिवर्जितः = ङकारश्रुतिर्यथा न श्रूयते तथा, प्रयोक्तव्यः = समुच्चारणीयः ।

हिन्दी — अब दूसरे प्रकार से रङ्ग का प्रयोग कैसे करना चाहिए, आचार्य कहते हैं—जिस प्रकार सौराष्ट्र (काठियावाड़) प्रान्त में उत्पन्न स्त्री 'अरां २ ॥' यह शब्द जिस ढंग से उच्चारण करती है, उसी प्रकार रङ्ग (अर्ध अनुस्वार) का ङकार से रहित (ङकार की श्रुति जिससे न सुनी जाय उस ढंग से) उच्चारण करना चाहिए ।

रङ्गस्य अनुस्वारत्वं कथम् —

द्विमात्रो मात्रिको वापि नासामूलं समाश्रितः ।
अन्ते प्रयुज्यते रङ्गः पञ्चमैः सर्वनासिकः ॥ ७१ ॥

अन्वयः—द्विमात्रः मात्रिकः वा अपि (रङ्गः) नासामूलं समाश्रितः रङ्गः पञ्चमैः अन्ते प्रयुज्यते (अतः) सर्वनासिकः (भवति) ।

व्याख्या — द्विमात्रः = द्वे मात्रे यस्य असौ द्विमात्रो रङ्गः, अर्थात्—स्वरयोः अन्तरापन्नम् अनुनासिक्यं रेफव्यवहितञ्च, यथा—'लोकारँ २ ॥ ऽ अकल्पयन्' तथा च 'शत्रूँ २ ॥ रपं' इत्यत्र च, अपि वा = पुनश्च, मात्रिकः = एकमात्रिकः, 'मात्रिको रङ्गः स्वरव्यञ्जनयोर्मध्ये ऊष्मव्यवहितं नासिक्यम्', यथा—'यामैरयँश्चन्द्रमसि' इति । एवं द्विविधोऽप्ययं रङ्गः । नासामूलं = भ्रूमध्यस्थितम्, समाश्रितः = सम्यग्रूपेण प्राप्तः, नासामूलस्थानीयः इति यावत् । पञ्चमैः वर्गान्तिमवर्णैर्जातः । नकार-मकारयोर्विकारेणोत्पन्नः, शाखान्तरे नमयोर्लोपेन च सर्वनासिकः । अन्ते = स्वरोच्चारणानन्तरम्, प्रयुज्यते = उच्चार्यते । न तु उपधास्वर एव मुखनासिकाभ्याम् उच्चार्यते, अतः सर्वनासिकः भवति । न त्वयं मुखनासिकावचनः करणीयः । यतोऽयं स्वरस्यान्ते प्रयुज्यते ।

हिन्दी — रङ्ग का अनुस्वारत्व कैसे होता है, इस विषय में कहते हैं कि — द्विमात्रिक (दो मात्राओं वाला) हो अथवा एक मात्रा वाला रङ्ग अनुस्वार उसका उच्चारण स्थान नासिकामूल है अर्थात् ये रंग नासिकामूलक होते हैं और वर्गों के अन्तिम वर्ण — ङ ञ ण न म वर्णों के अन्त में अर्थात् स्वरोच्चारण के पश्चात् होता है । न केवल उपधा स्वर ही मुख और नासिका से

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

उच्चारित किये जाते हैं, अतः ये सर्वनासिक हैं। यह रंग अनुस्वार सर्वदा नासिक्य ही होता है, यही निष्कर्ष है।

रङ्गः उपधानिका कदा भवति—

अनन्तरं मकारस्य यो रङ्गस्तत्र रज्यते।
सर्वानुनासिकं विद्यादेषा मन्योपधानिका ॥ ७२ ॥

अन्वयः—मकारस्य अनन्तरं तत्र यः रङ्गः रज्यते (तम्) सर्वानुनासिकं विद्यात्, एषा उपधानिका मन्या।

व्याख्या—मकारस्य = पवर्गान्तिमवर्णस्य मकारस्य, अनन्तरम् = पश्चात्, मकारवर्णादनन्तरम्, (ये अन्तस्थाः (यरलवाः) ऊष्माणश्च = शषसहाः) यः रङ्गः = आनुनासिक्यः, रज्यते = प्रयुज्यते, (तम्) सर्वानुनासिकम्, विद्यात् = जानीयात्, नायं विवादस्य विषयः किन्तु—एषा = अनुनासिका, उपधानिका = एतन्नाम्नी, मन्या = बोध्या, ज्ञातव्या, न तु तत्र रङ्गव्यवहारो मन्तव्यः इति तत्र मात्रिकत्वं बोध्यम्। यत्र रङ्गव्यवहारस्तत्रैव द्विमात्रिकोक्तेः। यथा—'अ॒हीँश्च॒ सर्वान्'। 'अन्यांस्ते'। किञ्च—रषहेषु माध्यन्दिनानां न आनुनासिक्यम्। तेषां तत्र अनुस्वारो विहितः। शाखान्तरे तु तत्राप्यानुनासिक्यमुपलभ्यते।

हिन्दी—रंग को उपधानिका कब मानना चाहिए, इस विषय में कहते हैं—पवर्ग के अन्तिम वर्ण मकार के पश्चात् अन्तस्थ तथा ऊष्मा वर्ण (य र ल व, श ष स ह) से परे जो रंग आनुनासिक प्रयुक्त होता है, उसे सर्वानुनासिक जानें। यह अनुनासिका 'उपधानिका' इस नाम से मान्या है अर्थात् यह अनुनासिका 'उपधानिका' कही जाती है।

तवा के उपधानिनः कति संख्यकाश्च—

यरलवाः शषसहा अष्टैते चोपधानिनः।
वर्गान्तैः रज्यते यस्तु सर्वैः सर्वानुनासिकः ॥ ७३ ॥

अन्वयः—यरलवाः शषसहाः एते च अष्ट (ते) उपधानिनः, सर्वैः वर्गान्तैः तु यः रज्यते, (अयं) सर्वानुनासिकः (एव भवति)।

व्याख्या—यरलवाः = इत्येतेऽन्तस्थवर्णाः, शषसहाः = इत्येते चोष्माणः, एते = पूर्वोक्ताः, च = पुनः, अष्ट = अष्टसंख्यकाः वर्णाः (सन्ति), ते = सर्वे,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

उपधानिनः = उपधाया आनुनासिक्यकारिणः (भवन्ति)। सर्वैः = एतैः परीभूतैः, वर्गान्तैः = तवर्ग-पवर्गयोः अन्तैः नकार-मकारैः, प्रकृतिभूतैः, तु = निश्चयेन, यः रङ्गः, रज्यते = नासिकायाम् अनुरक्तो भवति। अतोऽयमपि रङ्गः सर्वानुनासिकः, एवेति निश्चये, यतोऽत्र उपधानिनो वर्त्तन्ते, तस्मादेवास्यानुनासिक्यस्य उपधानिका संज्ञा भवति। अत्रापि पूर्वपद्योदाहरणान्येव बोध्यानि, न तु रङ्गव्यवहृतिः।

हिन्दी—ऊपर के पद्य में आनुनासिक वर्ण उपधानिका कही गयी हैं, इसी को स्पष्ट करते हुए इनकी संख्या बतलायी गयी है—य र ल व ये अन्तस्थ वर्ण तथा श ष स ह ये ऊष्मा वर्ण—कुल मिलाकर आठ उपधानी होते हैं। ये आठों वर्ण यदि तवर्ग और पवर्ग के क्रमशः अन्तिम वर्ण न-म वर्ण के पश्चात् प्राप्त हों तो वे सभी सर्वानुनासिक होंगे। यतः ये सभी उपधानी हैं, इसलिए ही आनुनासिक्य की संज्ञा उपधानिका होती है। यहाँ भी पूर्व पद्य के ही उदाहरण हैं।

नासिकाग्रभागादुत्पन्नस्य रङ्गस्य कीदृशं स्वरूपम् उदाहरणञ्च—

नस्त उत्पद्यते रङ्गः कांस्येन समनिस्वनः।
मृदुश्चैव द्विमात्रः स्याद् 'वृष्टिमाँ २ ॥ इव' दर्शनम् ॥ ७४ ॥

अन्वयः—नस्तः कांस्येन समनिस्वनः रङ्गः उत्पद्यते, (अत एव) मृदुः च द्विमात्रः एव स्यात् (तत्र)।

व्याख्या—नस्तः = नासिकामूलात् (तेन दन्तमूलस्थानताऽनुस्वारसामान्यप्राप्ता पाणिन्युक्ता निरस्ता, तथा च 'नासामूलं समाश्रितः' इत्युक्तत्वाच्च), कांस्येन = कांस्यपात्रध्वनिना, समनिस्वनः = तुल्यश्रुतिकः, रङ्गः = रङ्गसंज्ञकोऽनुनासिक्यः, उत्पद्यते = उत्पन्नो भवति, अत एव, मृदुः = नादहीनः, न तु अनुस्वारवद् घोषः कर्त्तव्य इत्यर्थः। कांस्यभाजनोत्थितशब्दस्य मृदुश्रुतिकत्वात्, च = अपि, द्विमात्रः = द्वे मात्रे यस्य असौ = दीर्घः, स्यात् = विधेयः। द्विमात्रता चास्य पाणिनिप्रतिपादिता ज्ञेया। तथा च तत्रोक्तं यथा—'हृदये चैकमात्रस्तु अर्धमात्रस्तु मूर्धनि। नासिकायां तथार्धं च रङ्गस्यैव द्विमात्रता' ॥ एवं द्विमात्रिकस्वरोच्चारणानन्तरं पाणिनिपारिभाषिक-द्विमात्रिकः। अर्धानुस्वारः अन्तः सार्धमात्रया बहिश्च अर्धमात्रयैवोच्चारणीयः। तत्र—'वृष्टिमाँ २ ॥ इव' इति दर्शनम् = उदाहरणम् (भवति)।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—नासा = नासिका (नाक) के अग्रभाग से रंग (अनुस्वार) उत्पन्न होता है, जो कि काँसे के पात्र से उत्पन्न आवाज (ध्वनि) के समान होता है और वह उच्चारण की दृष्टि से मृदु तथा द्विमात्रिक होता है। इसका उदाहरण है—'वृष्टिमाँ २ ॥ इव'।

उपधानिका कथम् उच्चार्या—

यादृशी रत्नवर्णाभा जपायाः कुसुमेऽथवा।
तादृशं रञ्जयेद्वर्णं प्रान्ते नासिक्यमाचरेत् ॥ ७५ ॥

अन्वयः—यादृशी रत्नवर्णाभा अथवा जपायाः कुसुमे (विरलरक्तता अस्ति) तादृशं वर्णं रञ्जयेत्। प्रान्ते नासिक्यम् आचरेत्।

व्याख्या—यादृशी = यत्प्रकारिका यथा वा, रत्नवर्णाभा—रत्नस्य = माणिक्यस्य, वर्णाभा = रत्नवर्णस्य आभा = कान्तिः इव आभा यस्य सा तादृशी विरलरक्तच्छविः। अथवा = प्रकारान्तरेण वा, जपायाः = लोके 'अढहूल' इति प्रसिद्धस्य, कुसुमे = पुष्पे, विरलरक्तता अस्ति। तादृशम् = तत्प्रकारकं विरलानुनासिक्यम्, वर्णम् = उपधास्वरम्, रञ्जयेत् = अन्त्यदेशे नासिक्यं कुर्यात्। तदेव स्पष्टीकरणङ्करोति—स्वरस्य प्रान्ते = प्रदेशे, नासिक्यम् = अर्धानुस्वारम् एकमात्रिकम्, आचरेत् = आचरणीयं वदेत्। न तु उपधामेव सर्वनासिकां कृत्वा वदेदित्यर्थः। जपाकुसुमे रक्तिमा यथा मूले नास्ति प्रान्त-भागे एव घनीभूता दृश्यते तथैव उपधानिका उच्चार्या इत्याशयः। यथा—'माँ स्पचन्यादौ—माउँस्' इति।

हिन्दी—उपधानिका का उच्चारण कैसे करना चाहिए, इस विषय में आचार्य कहते हैं—रत्न के वर्ण की कान्ति जैसी होती है और जपा (अढहूल) के फूल की कान्ति (विरलरक्तता) जैसी होती है, उसी उकार उपधा स्वर स्वर को अन्त्य प्रदेश में नासिक्य करे, अर्थात्—स्वरप्रदेश में अर्धानुस्वार एकमात्रिक बोले, न कि उपधा को ही पूर्ण नासिका करके बोले। अढ़हूल (जपा) के फूल में जिस प्रकार लालिमा उसके मूल में नहीं होती, प्रान्त भाग में ही होती है—पूर्ण लाली के साथ, उसी प्रकार उपधानिका का उच्चारण करना चाहिए।

आनुनासिक्यस्य स्वरपरत्वाभावात् कथं रङ्गस्वम्—

लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा।
सर्वं रङ्गं विजानीयाच्छत्रनिति निदर्शनम् ॥ ७६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अन्वयः—लाक्षारक्तं तोयं यथा तथा नकारान्तं पदं सर्वं रङ्गं विजानीयात्। शत्रून् इति निदर्शनम् (भवति)।

व्याख्या—लाक्षारक्तम्=लाक्षया (लाख इति प्रसिद्धेन) रक्तम्=रक्तवर्णम्, एवम्भूतं तोयम्=जलम्, यथा=येन प्रकारेण—जलं रक्तमित्युच्यते न पुनस्तत्र लाक्षा रक्ता अस्तीति भासते, लाक्षाया जलात् पार्थक्याभावात्। तथा=तेनैव प्रकारेण उपधामात्रस्यानुनासिक्येऽपि, नकारान्तं=नकारः अन्ते यस्य असौ नकारान्तस्तं पदम्, सर्वम्=अखिलम्, रङ्गम्=सर्वानुनासिकम्, रङ्गम्, विजानीयात्=बुध्येत्। एतेन रेफान्तो रङ्गः इति स्वरपरत्वं तत्राप्यस्त्येवेति सिद्धम्। यथा—'जहि शत्रूँ १॥ रपेत्यादौ शत्रून् परिधीन् क्रतून् वनस्पतीन् स्वरे रेफम्' इति प्रातिशाख्योक्तेन नकारस्य रेफे उपधानुनासिक्ये च कृते शत्रून् इति पदं रङ्गम्, एतत् निदर्शनम्=उदाहरणम्।

हिन्दी—रेफभाव में नकार के विकार से उत्पन्न आनुनासिक का स्वर परत्वाभाव से कैसे रंग होता है ? इस आशंका में कहते हैं—लाख (लाह) के विकार से लाल जो जल अर्थात् जल लाल कहा जाता है किन्तु इसमें लाक्षा लाल होती है, यह भास होता है। लाक्षा के जल से पार्थक्य होने के कारण, उसी प्रकार उपधामात्र के आनुनासिक में भी नकारान्त पद को परा रंग समझना चाहिए। इससे रेफान्त रंग में स्वरपरत्व वहाँ है ही। जैसे—'जहि शत्रूँ १॥' इत्यादि में विद्यमान है।

लुप्ते नकारे स्वरस्य कथं रङ्गत्वम्—

लुप्ते नकारे यत्स्वारं रञ्जन्ति शौनकादयः।
एवं रङ्गं विजानीयान्नाभ्याऽऽआसीन्निदर्शनम्॥ ७७॥

अन्वयः—शौनकादयः नकारे लुप्ते यत् स्वारं रञ्जन्ति, (अतः) एवं रङ्गं विजानीयात्। 'नाभ्याऽआसीत्' इति निदर्शनम् (ज्ञेयम्)।

व्याख्या—शौनकादयः=शौनकप्रभृतयः ऋषयः, ऋगादिप्रातिशाख्यकाराः, नकारे=नकारवर्णे, लुप्ते=लोपं प्राप्ते सति, यत्=यतः, स्वारं=स्वरवर्णम्; रञ्जन्ति=नासिक्येन रक्तवर्णेन वा रक्तीकृत्य 'नकार आकारोपध' इत्याभ्यः प्रकरणेन दर्शयन्ति, अतः=अस्मात् कारणात्, एवम्=तमादि नकारपूर्वाक्षरम्, रङ्गं=रङ्गाख्यमनुस्वारम्, विजानीयात्=बुध्येत्। अत्र 'नाभ्याऽ-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

आसीत्', इति कण्डिकास्थो रङ्गः 'लोकां २ ।। ऽ अकल्पयन्' इति निदर्शनम् =उदाहरणं ज्ञेयमिति ।

हिन्दी—लुप्त नकार में स्वर का कैसे रङ्गत्व सिद्ध होता है अर्थात् अर्धानुस्वार का रंगोक्ति कैसे अन्वर्थ है, इस विषय में कहते हैं—ऋग्वेदादि-प्रातिशाख्यकार शौनक आदि ऋषि नकार के लुप्त रहने पर जो स्वार (स्वर) को रञ्जित करते हैं अर्थात् नासिक्य से अथवा रक्तवर्ण से लाल करके 'नकार आकारोपघ' यहाँ से प्रारम्भ करके प्रकरण के द्वारा दिखलाते हैं। अतः ऐसे नकारपूर्वाक्षर को रङ्ग जानना चाहिए। इसका उदाहरण है—'नाभ्याऽ-आसीत्' इस कण्डिकास्थ रंग 'लोकां २ ।। ऽ अकल्पयन्'। यह निदर्शन जानना चाहिए।

कति रङ्गाः प्रवर्तन्ते के च ते—

पञ्च रङ्गाः प्रवर्त्तन्ते घात-निर्घात-वज्रिणः।
अहिणः प्रहिणो ज्ञेय आ-ई-ऊ-ऋ-ओं दर्शनम् ।। ७८ ।।

अन्वयः—रङ्गाः आ-ई-ऊ-ऋ-ओ (आकाराद्योकारान्तेषु निर्दिष्टवर्णेषु) (परतः) क्रमेण घात-निर्घात-वज्री-अहिणः-प्रहिणः (इति) पञ्च ज्ञेयः; दर्शनम् (इत्येव)।

व्याख्या—रङ्गाः=सर्वानुनासिक्यः, आ-ई-ऊ-ऋ-ओ (आकाराद्योकारान्तेषु निर्दिष्टवर्णेषु) परतः=पश्चादनन्तरं यदि स्युस्तदा, क्रमेण=क्रमशः, घात-निर्घात-वज्री-अहिणः-प्रहिणः इति नामधेयाः भवन्ति। दर्शनम्=उदाहरणञ्च, क्रमशो यथा—'देवाँ २ ।। ऽ आसादय' इत्यत्र घातसंज्ञकः। 'देवाँ२ऽइ देषि' इत्यत्र निर्घातः, 'ऽ उपागा' इति वज्रिणः, 'देवाँ२ ऋतुभिः' इत्यहिणः, 'अमित्राँ २ ।। ऽ ओषतात्' इति प्रहिणः, इति=इत्येवं, पञ्च=पञ्चसंख्यकाः, ज्ञेयाः, एवंविधाः पञ्चरङ्गाः, प्रवर्त्तन्ते=प्रवृत्ताः भवन्ति।

हिन्दी—रङ्ग कितने प्रकार से प्रवृत्त होते हैं और वे कौन हैं, इस विषय में कहते हैं कि रंग के पाँच भेद होते हैं, जिनमें आ-ई-ऊ-ऋ और ओ का योग होना आवश्यक है। अर्थात् रंग अनुनासिक-पश्चात् यदि उपर्युक्त आ-ई-ऊ-ऋ-ओ वर्ण हों तो क्रमशः घात, निर्घात, वज्रिण, अहिण और प्रहिण नाम के ये पाँच प्रकार के रङ्ग जानना चाहिए। इनके उदाहरण क्रमशः संस्कृत व्याख्या में निर्दिष्ट हैं।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केनप्रकारेण वर्णान् प्रयोजयेत्—

यथा व्याघ्री हरेत् पुत्रान् दंष्ट्राभिर्न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥ ७९ ॥

अन्वयः—पतनभेदाभ्यां भीता व्याघ्री यथा पुत्रान् हरेत् दंष्ट्राभिः च न पीडयेत्, तद्वत् वर्णान् प्रयोजयेत् ।

व्याख्या—पतन-भेदाभ्याम्=मुखात् यथा न पतेयुः न वा दन्तैः भेदनं भवेयुस्तथा इत्येताभ्यां भयाभ्यां, भीता=भयभीता त्रस्ता वा, व्याघ्री=व्याघ्रस्य स्त्री व्याघ्री—भाषायां 'बाघिन' इति ख्याता, यथा=येन प्रकारेण, एकस्मात् स्थानात् अन्यस्मिन् स्थाने सुरक्षार्थं प्रापयति, तद्वत् पुत्रान्=स्वकीयात्मजान्, हरेत्=स्थानान्तरं प्रापयेत्, दाढर्येन मुखेन गृहीत्वा, हरणकाले, च=पुनः, दंष्ट्राभिः=करालैः दन्तैः, न=नहि, पीडयेत्=पीडां दद्यात्, यथा=येन प्रकारेण दन्तैस्तेषु छेदो न स्यात्तथा गृह्णाति, तद्वत्=तत्प्रकारेणैव, वर्णान्=अक्षराणि, प्रयोजयेत्=प्रयोगो विधेयः । अत्रायमाशयः—वर्णाः नातिशिथिलाः नातिपीडिता वा उच्चारणीयाः । यद्वा—रङ्गोच्चारणकाले मुखाकृतेः शिक्षेयम् । यतः अत्र शैथिल्येन ङकारश्रुतिः पीडनेन मकारश्रुतिरुत्पन्ना स्यात् । अतोऽत्र नातिविवृत्तं नापि संवृतम् आस्यं कृत्वा रङ्गोच्चारणं विधेयमिति ।

हिन्दी—वर्णों को किस प्रकार प्रयोग करना चाहिए, इस विषय में कहते हैं—गिर जाने और भेदन के भय से भयभीत बाघिन जिस प्रकार अपने बच्चों को एक स्थान से दूसरे स्थान को सुरक्षा के लिए ले जाती है, किन्तु अपने कराल दाँतों से पीड़ित नहीं करती, दाँतों को गड़ाती नहीं है; दाँतों से बच्चों को छेद न हो, ऐसे ग्रहण करती है । उसी प्रकार वर्णों का प्रयोग करना चाहिए ।

साङ्कर्यरहिता वर्णाः समुच्चारणीयाः—

मधुरं च न चाव्यक्तं व्यक्तं चापि न पीडितम् ।
सनाथस्येव देशस्य न वर्णाः सङ्करङ्गताः ॥ ८० ॥

अन्वयः—मधुरम् अव्यक्तं न, व्यक्तं च अपि पीडितं न, सनाथस्य देशस्य इव वर्णाः न सङ्करङ्गताः (उच्चारणीयाः) ।

व्याख्या—मधुरम्=मधुरस्वरेण माधुर्येण वा पठन्, अव्यक्तम्=अस्पष्टम्, न=नहि, कुर्यात्, व्यक्तम्=सुस्पष्टं वर्णम्, च=पुनः, अपि व्यक्तीकुर्वन्;

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पीडितम् = चर्वितं न कुर्यात्, येन माधुर्यं = मधुरता, नश्येत् = नाशं प्राप्नुयात्। अत्रोदाहरणं यथा — सनाथस्य = नाथेन = प्रभुणा सहितस्य, राज्ञा सहितस्य देशस्येव, वर्णाः = ब्राह्मणादयो यथा अकारादयः, न = नहि, सङ्करङ्गताः = साङ्कर्यं प्राप्ताः, सङ्कीर्णत्वं यथा न प्राप्नुयुस्तथा समुच्चारणीया इति।

हिन्दी—साङ्कर्य (मिलावट) रहित वर्ण का उच्चारण करना चाहिए, इस विषय में आचार्य का कथन है कि—अक्षरों (वर्णों) का उच्चारण माधुर्यपूर्ण होना चाहिए; 'माधुर्यमक्षरव्यक्तिः' कहा गया है। अतः वर्णों का उच्चारण मधुरता से युक्त हो, साथ ही यह भी ध्यान रहे कि वह अस्पष्ट न हो और जो स्पष्ट हो वह पीड़ित = चर्वित नहीं होना चाहिए। जिस प्रकार राजा के विद्यमान रहने पर वहाँ की जनता वर्णसांकर्य से रहित रहती है, उसी प्रकार उच्चारण के समय एक वर्ण को दूसरे वर्ण के साथ संमिलन नहीं करना चाहिए। राजा का धर्म होता है—वर्णाश्रम को व्यवस्थित रखना। उसी प्रकार अक्षरों का सांकर्य समुचित नहीं, अतः साङ्कर्य रहित वर्णों का उच्चारण करना चाहिए।

इति महर्षि याज्ञवल्यप्रणीतायां शिक्षायां वर्णप्रकरणे झोपाह्व-
(डॉ०)नरेशशास्त्रिकृतायां 'शान्ति'नाम्नी संस्कृत-हिन्दी-
व्याख्यायां विवृतौ वर्णोच्चारणाधिकारः।

अथ पदाधिकारः

तत्र पदोच्चारणे विशेषः—

यथा सुमत्तनागेन्द्रः पदात्पदं निधापयेत्।
एवं पदं पदाद्यन्तं दर्शनीयं पृथक् पृथक्॥ ८१॥

अन्वयः—सुमत्तनागेन्द्रः यथा पदात् पदं निधापयेत्, एवं पदं पदाद्यन्तं पृथक् पृथक् दर्शनीयम्।

व्याख्या—सुमत्तनागेन्द्रः = सुमत्तश्चासौ नागेन्द्रः = मदविह्वलो हस्ती, यथा = येन प्रकारेण, पदात् = चरणात्, एकं चरणं सम्यग्रूपेण निधाय, पदम्=अन्यं तदितरं च उत्थाप्य, निधापयेत् = स्थापनं करोति, निधापयेत् इत्यत्र व्याकरणानुरोधेन स्वार्थे णिच् प्रत्ययः। एवम् = तेनैव प्रकारेण, पदम् = सुबन्ततिङन्तरूपं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(सुप्तिङन्तं पदम्)। पदाद्यन्तम् = पदादि पदान्तं च, पृथक् पृथक् स्वतन्त्र-रूपेणेति यावत्, यथा स्यात्तथा दर्शनीयम्। अत्रायमाशयो यत्—एकं पदं पदान्तविशिष्टम् उक्त्वा एकां मात्रां विरम्य अपरं पदादिविशिष्टं पदं ब्रूयात्। येन द्वयोः पदयोः परस्परं सङ्कीर्णतया अर्थसन्देहो न भवेत्। तथा च 'पदयोरन्तरे काल एकमात्रा विधीयते' (या० शि०) इति निर्देशात्। इत्येष दीक्षितानां विमर्शः।

हिन्दी—अब पद के विधिवत् उच्चारण के विषय में आचार्य कहते हैं—जिस प्रकार मदोन्मत्त हाथी झूमते हुए मस्ती के साथ धीरे-धीरे एक पैर रखने के पश्चात् दूसरा पैर स्थापित करता है, उसी प्रकार वेदाध्येताओं को सुस्पष्टता तथा अर्थबोध की दृष्टि से एक पद के समुचित उच्चारण के पश्चात् दूसरे पद का सुस्पष्ट उच्चारण करना चाहिए। वह उच्चारण पृथक्-पृथक् स्वतन्त्र रूप से करना चाहिए।

पाठकाधमाः कतिसंख्यका भवन्ति, के च ते—

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥ ८२॥

अन्वयः—गीती, शीघ्री, शिरःकम्पी, यथालिखितपाठकः, अनर्थज्ञः, अल्प-कण्ठः च एते षट् पाठकाधमाः (भवन्ति)।

व्याख्या—गीती = गायनं कृत्वा वेदाभ्यासकर्ता अर्थात् विहितमात्रा-कालतो विलम्बितोच्चारणशीलः, अन्यथा छन्दोगानामधमत्वं स्यात्। शीघ्री शीघ्रतया वेगेन पाठकः, अभ्यासातिरिक्तपाठे द्रुतवृत्तिकः। अभ्यासकाले पुनरस्याः 'अभ्यासार्थे द्रुतां वृत्तिम्' इति विहितत्वात्। शिरःकम्पी = शिरसं कम्पयित्वा पठनशीलः, एवञ्चात्र शिरसा उदात्तादिस्वरप्रदर्शकः। एतेन ये वदन्ति बह्वृचानां कण्ठस्वरप्रधानानां शिरश्चालनं युक्तमिति ते परास्ताः, शिरश्चालनेन यथास्वरमुच्चारणस्याऽसम्भवात्। पाणिनिनापि हस्तेन स्वराऽ-प्रदर्शनं शिरःकम्पश्च निन्दितः इति दीक्षितानां विमर्शः। यथालिखितपाठकः = गुरोः सकाशादनधीत्य स्वयमेव यथा तथा पुस्तकमवलोक्य अध्येता, अनर्थज्ञः = मन्त्रार्थमविदित्वैव पाठकर्ता, अत्र अर्थः = अभिप्रायः विनियोगो वा, तं यो न जानाति एतादृशश्छात्रः, अल्पकण्ठः = अल्पध्वनिको अल्पप्राणश्च, एते =

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वोक्ताः, षट् = षट्संख्यकाः, पाठकाधमाः—पाठकेषु = अध्ययनशीलेषु, अधमाः निम्नश्रेणीकाः अत एव निन्दिताः भवन्ति ।

हिन्दी—पाठ करने वालों में अधम (निम्न श्रेणी के) पाठकर्ता कौन हैं तथा कितने हैं, इस विषय में कहते हैं—जो गीत के समान गा-गाकर मन्त्र पढ़ते हैं, शीघ्रता से हड़बड़ा कर पढ़ने वाला तथा जैसा पुस्तक में शुद्ध या अशुद्ध लिखा है, वैसा पढ़ने वाले ये ६ अधम पाठक होते हैं ।

पाठके कति गुणाः भवन्ति, के च ते—

माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यं लयसमत्वं च षडेते पाठके गुणाः ॥ ८३ ॥

अन्वयः—माधुर्यम् अक्षरव्यक्तिः पदच्छेदः तु सुस्वरः धैर्यं लयसमत्वं च पाठके एते षड् गुणाः (भवन्ति) ।

व्याख्या—माधुर्यम् = माधुर्यरसोपेतम्, अर्थात् स्वभावोपनीत-ललित-पदाक्षरगुणसमृद्धत्वम् । अक्षरव्यक्तिः = पदवर्णानां सुस्पष्टतया उक्तिः, पदच्छेदः = पदविभाजनम्, सुस्वरः = स्वरलहर्युपेतः, श्रुत्यारब्धाऽनुरणन-सौष्ठवम्; तथा च शब्दार्थचिन्तामण्याम्—'श्रुत्यनन्तरभावी यः स्निग्धोऽनुरण-नामकः । स्वनो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते' ॥ धैर्यम् = धीरतायुक्त-त्वम्, निर्विकारचित्तत्वम्; पुनस्तत्रैवोक्तं चिन्तामण्याम्—'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' । लयसमत्वम् = समेषां पाठकानां समानस्तरेणोच्चारणम् । पाठके = पाठकर्त्रे, एते = पूर्वोक्ताः, षड् = षट्संख्यकाः, गुणाः = वैशिष्ट्य-प्रदर्शकाः गुणाः (भवन्ति = जायन्ते) । माधुर्यादि षड्गुणोपेताः पाठकाः एवं प्रशस्ताः भवन्ति नान्ये ।

हिन्दी—अब पाठकर्ता में कौन-से गुण अपेक्षित हैं, और वे कितने प्रकार के होते हैं, इस विषय में स्पष्ट रूप से आचार्य कहते हैं—पाठकर्ता में सर्वप्रथम गुण स्वर में माधुर्य होना चाहिए, जिसे सुनकर साधारण लोग भी उनकी ओर आकृष्ट हो जायें । दूसरा गुण है—'अक्षरव्यक्ति' अर्थात् पाठ करते समय पद का सुस्पष्ट उच्चारण हो । तीसरा गुण है—'पदच्छेद' अर्थात् पद के विभाजन का ज्ञान ऐसा न हो कि एक पद का उच्चारण अन्य पद में मिल जाय । चौथा गुण है—'सुस्वर' पदों के उच्चारण में कण्ठस्वर आकर्षक हो । पाँचवाँ गुण है—'धैर्य' निर्विकार चित्त वाला अर्थात् उसे किसी प्रकार की

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घबड़ाहट न हो, सामान्य स्थित हो और छठा गुण है—'लयसमत्व' अर्थात् सभी पाठक समवेत स्वर में उच्चारण करें, न कि आगे-पीछे। इस प्रकार ये छः गुण पाठक में कहे गये हैं। जिनमें ये ६ गुण उपलब्ध होंगे—वास्तविक रूप से वे ही पाठक हो सकते हैं।

पाठकाले के (आचार्यादयः) किमिच्छन्ति—

आचार्याः सममिच्छन्ति पदच्छेदन्तु पण्डिताः।
स्त्रियो मधुरमिच्छन्ति विक्रुष्टमितरे जनाः॥ ८४॥

अन्वयः—आचार्याः समम् इच्छन्ति, पण्डिताः पदच्छेदम् (इच्छन्ति), तु स्त्रियः मधुरम् (यथा स्यात्तथा) इच्छन्ति, इतरे जनाः विक्रुष्टम् (इच्छन्ति)।

व्याख्या—आचार्याः = शिक्षादिषडङ्गसहिताः वेदाध्यापकाः प्रवक्तारः; अपरञ्च आचार्यलक्षणविषये मनुः आह—'उपनीय गुरुः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते'॥ इत्यनेन औपनायनिको गुरुर्निर्दिष्टः स एव शिष्यं यथाविध्यध्यापयेत् एतादृशः सोऽप्याचार्यः, तथा चोच्चशिक्षाध्यापकोऽप्याचार्यः निगद्यते। एवम्भूताः ये आचार्याः सन्ति—ते, समम् = समस्थितिकं, पाठम् = स्वस्याध्यापनरीतिम्, इच्छन्ति = वाञ्छन्ति। नारदीयशिक्षायां सममित्यस्य व्याख्यात्मकं लक्षणं विद्यते—'समं नाम आवाप-निर्वापप्रदेशानां प्रत्यन्तरस्थानानां समासः सममित्युच्यते' इति। पण्डिताः = सदसद्विवेचिनी बुद्धिर्यस्य, एवम्भूता या बुद्धिः सा पण्डाबुद्धिः, पण्डा सञ्जाता अस्य इति पण्डितः; 'तदस्य सञ्जातं तारकादिभ्य इतच्' इति पाणिनिसूत्रेण सिद्धम्। एवम्भूताः पण्डिताः = अर्थविवेचकाः, पदच्छेदम् = पदविभाजनम्, इच्छन्ति = अभिलषन्ति। स्त्रियः = नार्यः, मधुरं = माधुर्यम्, इच्छन्ति = वाञ्छन्ति, इतरे = आचार्याद्यतिरिक्ताः सर्वसाधारणाः, जनाः = नराः, विक्रुष्टम् = विक्रुष्टं नाम उच्चैरुच्चारितं व्यक्तपदाक्षरम् इति। एतेन चतुर्विधपाठस्य महन्महत्त्वं प्रतिपादितम्। अतः सर्वैः वेदपाठकैः समादिगुणयुक्तः पाठः कर्त्तव्य इति।

हिन्दी—वेदपाठ के वर्णोच्चारण में किस पद्धति को कौन-कौन से व्यक्ति पसन्द करते हैं, इस विषय में कहते हैं कि—आचार्य जो कि वेदाध्यापन में निष्णात होते हैं और उपनयन काल के वेदारम्भ से स्नातक होने तक विधिवत् सकल्प और सरहस्य वेद-वेदाङ्ग का अध्यापन करते हैं, वे पाठकाल में पदों

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

का मिला हुआ सम पाठ चाहते हैं, जिससे पाठ में सुगमता हो और पण्डित जो अच्छे-बुरे का विचार करते हैं अतः जिनकी बुद्धि परिष्कृत होती है, ऐसे वैदिक विद्वान् पदों के उच्चारण में पदच्छेद चाहते हैं, जिससे अर्थ का विश्लेषण शीघ्र हो। स्त्रियाँ (विदुषी) जो कि माधुर्य रस विशेष पसन्द करती हैं, वे माधुर्यव्यञ्जक पदोच्चारण चाहती हैं और इनके अतिरिक्त जो सर्वसाधारण लोग रह जाते हैं, वे विकृष्ट अर्थात् जोर से चिल्लाकर पाठोच्चारण करना चाहते हैं। इस प्रकार इन चार प्रकार के पाठों का अत्यन्त महत्त्व कहा गया है। इसलिए सब वेदपाठियों को सम आदि पाठगुण युक्त पाठ करना चाहिए।

आम्रेडितत्वं कुत्र कथं भवति—

आवर्तते पदं यच्च द्विस्त्रिराम्रेडितं हि तत्।
यथा च 'धाम्ने धाम्ने' 'यजुषे यजुषे'ऽपि च ॥ ८५ ॥

अन्वयः—यत् च पदं द्विः त्रिः आवर्त्तते, तत् आम्रेडितं हि (ज्ञेयम्)। यथा च 'धाम्ने धाम्ने' 'यजुषे यजुषे' अपि च।

व्याख्या—यत्=द्विरुक्तपदम्, च=पुनः, द्विः=द्व्यक्षरम्, त्रिः=त्र्यक्षरं वा, पदम्=सुबन्तं तिङन्तं वा, आवर्त्तते=पुनरावृत्तं भवति, तत्=पुनरावृत्तं, परं=परभूतं पदम्, आम्रेडितम्=आम्रेडितसंज्ञकम्, ज्ञेयम्=विजानीयात्। तथा चात्र निर्देशसूत्रे (पाणिनिप्रोक्ते)—'सर्वस्य द्वे' इति पदद्वित्वे, 'तस्य परमाम्रेडितम्' इत्यनेन सूत्रेण च परस्य पदस्य आम्रेडितसंज्ञा भवति, यथा च 'धाम्ने धाम्ने' इत्यत्र परस्य द्विवर्णात्मकस्य, च=पुनः, 'यजुषे यजुषे' इत्यत्र त्रिवर्णात्मकस्य, अपि च परपदस्य आम्रेडितत्वम् इत्यर्थः।

हिन्दी—आम्रेडितत्व कहाँ और कैसे होता है, इस विषय में कहते हैं—जो द्विरुक्त पद जहाँ वह दो अक्षर (वर्ण) वाला या तीन अक्षर वाला हो, वहाँ पर पद को 'आम्रेडित' संज्ञा से जानना चाहिए। इस विषय में मुनिवर आचार्य पाणिनि के दो सूत्र उपलब्ध होते हैं; एक है—'सर्वस्य द्वे', इससे सम्बन्धित पद द्वित्व होता है तथा 'तस्य परमाम्रेडितम्', इससे पर-पद की आम्रेडित संज्ञा होती है। जैसे कि 'धाम्ने धाम्ने' यहाँ पर द्व्यक्षर का और 'यजुषे यजुषे' यहाँ त्र्यक्षर पर-पद का आम्रेडितत्व हुआ है।

CC-0. Nepal Sanskrit Academy. Digitized by eGangotri Collection

उपचारः कुत्र विज्ञेयः—

हीयते वर्द्धते वापि पदं यच्च कृशोदरम्।
उपचारः स विज्ञेय 'उ॒भे सुश्चंन्द्र' दर्शनम् ॥ ८६ ॥

अन्वयः—यत् पदं हीयते, अपि वा (यत् पदम्) च वर्द्धते, यत् च कृशोदरं (भवति) स एषः उपचारः विज्ञेयः। (तत्र) 'उ॒भे सुश्चंन्द्र' इति दर्शनम् (भवति)।

व्याख्या—यत् पदम्='वि॒श्पतीवं' इत्यत्र यथा, हीयते=क्षीयते, अपि वा=अपरञ्च, 'वनंषंदः' इत्यस्मिन् पदे, च=पुनः, वर्द्धते=आगमेन पूर्यते, यत् च पदम्='वृष्टिमाँ २ ॥ ऽ इव' इत्यादौ, कृशोदरम्=रङ्गेण सङ्कुचितमध्यम् भवति, सः=एषः दीर्घ-रेफागमोऽपधाऽऽनुनासिक्यादि विधिः, उपचारः=उपचरितनामधेयः, विज्ञेयः=जानीयात्। तत्र=तस्मिन् स्थाने—'उ॒भे सुश्चंन्द्र' इति यजुर्वेदसंहितोक्तः मन्त्रः, दर्शनम्=उपलक्षणमुदाहरणं भवति इति।

हिन्दी—अब पद-क्रम-संहिता के वेष्टक स्थल में, इतिकार में और चर्चा में परे प्रतिषेध के लिए अन्तः पद विकार आगम और लोप के उपचारत्व को कहते हैं—जो पद—जैसे 'विश्पतीव', यहाँ क्षीण होता है और जो पद अर्थात् 'वनंषंदः', इस पद में आगम वृद्धि के द्वारा पूरित होता है और जो पद 'वृष्टिमाँ इव' इत्यादि में रंग के द्वारा संकुचित मध्य होता है, वह—यह दीर्घ-रेफ-आगम-उपधा-आनुनासिक्य आदि की विधि ही उपचार नाम से उसे जानना चाहिए। यहाँ—'उभे सुश्चन्द्र' यह दर्शन=उदाहरण होता है।

उपचरितषत्वस्य किमुदाहरणम्—

प्रथमे न षकारेण सकारेणैव संयुतम्।
एतत्स्वरं समासाद्य 'अग्निष्वात्ता' निदर्शनम् ॥ ८७ ॥

अन्वयः—प्रथमे षकारेण न संयुतम् (आसीत्) (किन्तु) सकारेण एव संयुतम् (आसीत्), एतत् स्वरं समासाद्य (षकारेण संयुतं जातं जानीयात्)।

व्याख्या—प्रथमे=प्राथमिके=आदौ, 'स्वात्ता' इति पदम्, षकारेण=षकारवर्णेन, न संयुतम् आसीत्, किन्तु सकारेण एव, संयुतम्=मिलितम्, आसीत्, एतत्=अग्निपदस्थम्, स्वरम्=इकारम्, उपलक्षणम् एतत्। अत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

सुस्पष्टीकरणं यथा प्रातिशाख्ये—'भाविभ्यः स षठं० समानपदे' इति भाविस्वरेभ्यः', तथा च 'अकण्ठ्यो भावी' इत्युक्तेभ्यः षत्वं दृश्यते। तेन भाविस्वरमित्यर्थः। समासाद्य=समासेन कार्येण पूर्वतः सम्प्राप्य, समानपदे इत्यर्थः। षकारेण संयुतं जातं जानीयात्। अत्र=उपचरितत्वकार्ये—'अग्निष्वात्ताः' इति=एतत्, निदर्शनम्=उपलक्षणं ज्ञेयम्। यथा—'ये। अग्निष्वात्ताः। अग्निस्वात्ताऽइत्यग्नि। स्वात्ताः इति'। एवमन्यत्राप्यूह्यम्।

हिन्दी—उपचरित षत्व का क्या उदाहरण है, इस विषय में कहते हैं—प्रारम्भिक अवस्था में 'स्वात्ता' यह पद 'षकार' वर्ण से संयुत नहीं था, किन्तु 'सकार' से ही संयुत था, किन्तु वह स्वर वर्ण इकार को प्राप्त कर षकार में परिणत हो जाता है। जैसे—'स्वात्ता' पद पूर्वपद अग्नि से मिलकर 'अग्निष्वात्ता' इस प्रकार हो गया है। इस उपचरितत्व का यही उदाहरण है।

उपचरित-षत्वस्य नैमित्तिकं कार्यञ्चोदाहरति—

प्रथमे न ठकारेण थकारेणैव संयुतम्।
एतत्स्वरं समासाद्य 'अधिष्ठानं' निदर्शनम्॥ ८८॥

अन्वयः—प्रथमे ठकारेण न संयुतम् (आसीत्) किन्तु थकारेण एव संयुतम् (आसीत्), एतत् स्वरं समासाद्य (ष्टुत्वेन ठकारसंयुतं भवति)। (तत्र) 'अधिष्ठानम्' इति निदर्शनम् (भवति)।

व्याख्या—प्रथमे=पूर्वम्=आदौ, 'स्थानमि'ति पदम्। ठकारेण=ठकारवर्णेन, न=नहि, संयुतम्=संयुक्तम्, (आसीत्) किन्तु=किञ्च, थकारेण=थकारवर्णेन, एव=इति निश्चयेन, संयुतम् (आसीत्)। एतद्=भाविसंज्ञकम्, स्वरम्=अधीत्युपसर्गान्त्यावयवम् इकारम्, समासाद्य=प्राप्य समासेन। जातं षत्वं निमित्तीकृत्य ष्टुत्वेन ठकारसंयुतं भवति। तत्र=तस्मिन् स्थाने 'अधिष्ठानम्' इति, निदर्शनम्=उदाहरणं भवति। तथा हि—'अधिष्ठानम्। अधिस्थानमित्यधि। स्थानम्।

हिन्दी—उपचरित षत्व का नैमित्तिक कार्य का उदाहरण स्पष्ट करते हुए कहते हैं—प्रथमतः आदि में (वह पद) ठकार वर्ण से संयुत नहीं था किन्तु थकार से ही संयुत था। किन्तु यह स्वर वर्ण इकार को पूर्व में प्राप्त कर ष्टुत्व ठकार से युत हो जाता है। वहाँ 'अधिष्ठानम्' यह उदाहरण होता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यहाँ पूर्व में 'अधिस्थानम्' था जो कि इकारविशिष्ट पूर्व वर्ण को प्राप्त कर 'स्था' के स्थान पर 'ष्ठा' हो गया है।

उपचरितणत्वस्य प्राविधानमाह—

प्रथमे न णकारेण नकारेणैव संयुतम्।
एतदक्षरमासाद्य त्रिणवेति निदर्शनम्॥ ८९॥

अन्वयः—प्रथमे णकारेण संयुतम् (न आसीत्) किन्तु नकारेण एव संयुतम् आसीत्। एतद् अक्षरम् आसाद्य (णकारयुतं जातम्)। अत्र 'त्रिणवे'ति निदर्शनम् भवति।

व्याख्या—प्रथमे = प्रथमतः = आदौ = पूर्वम्, णकारेण = णकारवर्णेन, संयुतम् = युतवर्णम्, 'न वेति पदं नासीत्'। किन्तु = किञ्च, नकारेण = नकारवर्णेन, एवेति निश्चये, आसीत् = विद्यमानमासीत्। एतद् अक्षरम्, आसाद्य = सम्प्राप्य, 'त्रिशब्दान्तर्गतं स्वरव्यवहितं रेफाक्षरं समासनियमेन पूर्वतः सम्प्राप्य णकारयुतं सञ्जातम्। तथा हि प्रमाणत्वेन—ऋषरेभ्यो नकारो णकारं समानपदे। स्वर-य-व-ह-क-पैश्च' (प्रातिशाख्ये)। अत्र 'त्रिणव' इति निदर्शनम् = उदाहरणं भवति।

हिन्दी—उपचरित णत्व का प्राविधान कहते हैं—प्रथमतः = आदि में (संयुक्त पद) णकार से संयुत 'न वेति पदम्' नहीं था, किन्तु नकार से ही संयुत था। इस अक्षर को प्राप्त कर—त्रि शब्द के अन्तर्गत स्वरव्यवहित जो रेफाक्षर समासविधि से प्राप्त कर णकार युत हो गया। यहाँ 'त्रिणव' यह उदाहरण है।

उपचरित-उपधा-आनुनासिक्यं प्रदर्श्यते—

प्रथमे नैव रङ्गेण नकारेण च संयुतम्।
एतद्रञ्जितमासाद्य 'वृष्टिमाँ २॥ ऽ इव' दर्शनम्॥ ९०॥

अन्वयः—प्रथमे रङ्गेण न एव किन्तु नकारेण च संयुतम् आसीत्। एतद् रञ्जितम् आसाद्य (रङ्गयुतं जातम्)। (अत्र) 'वृष्टिमाँ २॥ ऽ इव' दर्शनम् (भवति)।

व्याख्या—'वृष्टिमान्' इति पदम्, अत्र = अस्मिन् स्थाने, प्रथमे = सन्धितः पूर्वम्, रङ्गेण = अधानुस्वारेण संयुतम्, न = नहि, किन्तु = किञ्च, नकारेण =

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

नकारवर्णेन, एवेति निश्चये, संयुतम् आसीत्। एतद् रञ्जितम् आसाद्य = उपधा-आनुनासिक्यरूपे नकारविकारजाते रङ्गयुतं जातमित्याशयः। अत्र = अस्मिन् स्थाने, 'वृष्टिर्मां २ ॥ ऽ इव' इति, निदर्शनम् = उदाहरणं भवति। तथा हि—वृष्टिमान् + इव इत्यत्र 'आकारोपधो यकारम्' इति नकारस्य यकारे उपधायाः 'अनुनासिकमुपधा प्रागन्तस्थायाः (प्राति०) इति आनुनासिक्ये च' ततः यवयोः पदान्तयोः 'स्वरमध्ये लोपः' इति यलोपे कृते 'न परकालः पूर्वकाले पुनः' इति सन्धिनिषेधे च 'वृष्टिर्मां २ ॥ ऽ इवे'ति भवति।

हिन्दी—उपचरित उपधा और आनुनासिक्य के विषय में प्रदर्शित करते हैं—'वृष्टिमान्' इस पद में प्रथमतः आदि में सन्धि से पूर्व रंग = अर्धानुस्वार से संयुत नहीं था, किन्तु नकार वर्ण से ही संयुत था, पश्चात् इस रंग से रञ्जित को प्राप्त कर उपधा-आनुनासिक्य के रूप में नकार का विकार होने पर रंगयुत हो गया। यहाँ 'वृष्टिर्मां २ ॥ ऽ इव' यह दर्शन = उदाहरण है। इसकी सिद्धि का प्रकार संस्कृत व्याख्या में दिया गया है, वहीं अवलोकन करें।

इति योगीन्द्रमहर्षियाज्ञवल्क्यप्रोक्तायां याजुषीशिक्षायां वर्णप्रकरणे
झोपाह्व-डॉ० नरेश(मैथिल)कृतायां 'शान्ति' संस्कृत-
हिन्दीव्याख्यायां पदाधिकारः पूर्णतामगात्।

अथ प्रकीर्णकानि

पदे व्यञ्जनानां संयोगविशेषावुच्चारणविशेषे कतिविधाः संयोगपिण्डाः भवन्ति—

अथ सप्तविधाः संयोगपिण्डाः—अयःपिण्डो दारुपिण्ड ऊर्णापिण्डो ज्वालापिण्डो मृत्पिण्डो वायुपिण्डो वज्रपिण्डश्चेति।

अन्वयः—अथ सप्तविधाः संयोगपिण्डाः (भवन्ति)। (के च ते) (१) अयःपिण्डः, (२) दारुपिण्डः, (३) ऊर्णापिण्डः, (४) ज्वालापिण्डः, (५) मृत्पिण्डः, (६) वायुपिण्डः, (७) वज्रपिण्डः इति नामतः।

व्याख्या—अथ = पदाधिकारे पदवैशिष्ट्यप्रतिपादनानन्तरम्, क्रमप्राप्ताः, सप्तविधाः = सप्तसंख्यप्रकारकाः, संयोगपिण्डाः = स्वराऽव्यवहिताऽनेकव्यञ्जन-संयुक्तानि पदानि (भवन्ति)। के च ते पिण्डास्तेषां गणनाक्रमो यथा—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथमः अयःपिण्डः, द्वितीयो दारुपिण्डः, तृतीयः ऊर्णापिण्डः, चतुर्थः ज्वालापिण्डः, पञ्चमः मृत्पिण्डः, षष्ठः वायुपिण्डः, सप्तमश्च वज्रपिण्डः। एते सप्तसंख्यकाः उच्चारणविशेषे पिण्डाः भवन्ति।

हिन्दी—पद में व्यञ्जनवर्णों के संयोग-विशेष से उच्चारण-विशेष में कितने प्रकार के संयोगपिण्ड होते हैं, इस जिज्ञासा में कहते हैं कि—अब पदाधिकार में पदवैशिष्ट्य-प्रतिपादन के पश्चात् क्रमप्राप्त सात प्रकार के संयोगपिण्ड होते हैं। जिनके नाम हैं—अयःपिण्ड, दारुपिण्ड, ऊर्णापिण्ड, ज्वालापिण्ड, मृत्पिण्ड, वायुपिण्ड और वज्रपिण्ड। इनका उपयोग संयोग-विशेष से उच्चारण-विशेष में होता है।

तत्र अयःपिण्डाविविवेचनं यथाक्रमेण—

यमान् विद्यादयः पिण्डान् सान्तस्थान् दारुपिण्डकान्।
अन्तस्थयमवर्जं तमूर्णापिण्डं विनिर्दिशेत्॥ ९१॥

अन्वयः—यमान् अयःपिण्डान् विद्यात्, सान्तस्थान् दारुपिण्डकान्; अन्तस्थयमवर्जं तम् ऊर्णापिण्डं विनिर्दिशेत्।

व्याख्या—यमान्=याज्ञवल्क्यशिक्षावर्णप्रकरणे प्रोक्तान् 'अपञ्चमैश्चैकपदे संयुक्तं पञ्चमाक्षरम्। उत्पद्यते यमस्तत्र' इति निर्दिष्टान् वर्णान्, अयःपिण्डान्—अयसः=लौहस्य, पिण्डा इव पिण्डा येषां ते तथोक्तास्तान्, विद्यात्=बुध्येत्। अत्रायमाशयः—यमेषु तथा विच्छेदः कर्त्तव्यो यथा लौहपिण्डाः प्रतिखण्डं परस्परसंश्लिष्टावयवाः उच्छिद्यन्ते; यथा 'रुक्कमः' इत्यत्र 'रुक्कँ' इति संयोगादिककारस्य पूर्वाङ्गत्वेन रेफोत्तरोकारेण सहोच्चारणात् यदा मकाराद्विच्छेदः क्रियते तदा ककारमकारयोः मध्यवर्ती यमः मकारगुणोऽनुनासिकः ककारप्रतिसंख्यकः तेन सहैवोच्छिद्यतेऽतोऽस्याऽयःपिण्डतेति भावः।

दारुपिण्डान् आह—सान्तस्थान्=अन्तस्थवर्णैः यरलवैः सहितान् संयोग, पिण्डान्, दारोः=काष्ठस्य, इव पिण्डो येषां तान् तथाविधान् जानीयात्। अर्थात् अन्तस्थसंयुक्तेषु पिण्डेषु तथा वर्णच्छेदो यथा काष्ठावयवाः शिथिलं श्लिष्टा विच्छिद्यन्ते। यथा—'व्विल्म्मने' इत्यत्र विकारेण सह लकारस्य संयोगादित्वात्, पूर्वमकारस्य च क्रमजत्वात् 'व्विल्म्' इत्युच्चारिते लकारात् पृथक् भिन्नस्थानकरणकपूर्वमकारस्य सुखधारणात् (अष्टुः अर्धमात्रां यावत्

CC-0. Nepal Sanskrit Academy Kathmandu. Digitized by eGangotri

अविच्छेदेन धारणादित्यर्थः) ईषत् श्रुतेः शिथिलश्लेषः अतो दारुपिण्डता। इति दीक्षितानां विमर्शः।

ऊर्णापिण्डम् आहु—अन्तस्थयमवर्जम् = स्पर्शान्तस्थरहितम्, तम्=ऊष्मसंयोगपिण्डम्, ऊर्णानाम् = अजाऽविप्रभृतिलोमानां पिण्ड इव पिण्डो यस्य तं तथोक्तम्, विनिर्दिशेत् = निर्देशं कुर्यात्। अन्तस्थयमाभ्याम्भिन्नैरूष्मभिः संयोगे तथा विच्छेदः कार्यो यथा ऊर्णापिण्डावयवाः श्लथबन्धाः न पुनः परस्परं श्लिष्टा भवन्ति। यथा—'पाशैस्त्मन्या' इत्यत्र शकारेण सह सकारस्य संयोगादित्वात् तकारस्य क्रमजत्वात् द्वितीयतकारस्य यमत्वाच्च 'पाशैस् त् तँ मन्या' इत्यमुच्चारिते सकार-तकारयोः पृथक् श्रुतिः द्वितीयतकारस्य यमत्वात् न पृथक् श्रुतिः। इति दीक्षितानामाशयः।

हिन्दी—अब ऊपर जो सात संयोगपिण्ड कहे गये हैं उनका यथाक्रम विवरण दिया जाता है—याज्ञवल्क्यशिक्षा के वर्णप्रकरण में प्रतिपादित यमों को अयःपिण्ड (लौहपिण्ड) जानना चाहिए और अन्तस्थ वर्ण (य र ल व) सहित जो संयोग है, उसे दारुपिण्ड जानें। एवमेव—अन्तस्थ और यम वर्णों से रहित संयोग को ऊर्णापिण्ड कहा गया है।

विशेषरूपेण दारुपिण्डता कुत्र भवति—

अन्तस्थयमसंयोगे विशेषो नोपलभ्यते।
अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम्॥ ९२॥

अन्वयः—अन्तस्थयमसंयोगे विशेषः न उपलभ्यते, अशरीरं यमं विद्यात्, अन्तस्थं पिण्डनायकम् (विद्यात्)।

व्याख्या—(यस्मिन्, पिण्डे) अन्तस्थयमसंयोगे = अन्तस्थयमाभ्यां संयोगस्तत्र (तस्मिन्), कश्चिद् विशेषः = वैशिष्ट्यम्, न उपलभ्यते = न प्राप्यते। यतः = यस्मात् कारणात्, अशरीरम् = शरीरराहित्यम्, यथा स्यात्तथा, यमं = यमवर्णं, विद्यात् = जानीयात्, अपि च अन्तस्थम् = अन्तस्थवर्णम्, पिण्डनायकम् = पिण्डस्य नायकस्तम्। अर्थात् यमस्य अशरीरित्वात् अन्तस्थस्य च प्रत्यक्षश्रुतेः प्राधान्यात् दारुपिण्डतैव।

अत्र दीक्षितानां सारसङ्ग्रहो यथा—यस्य स्पर्शस्योच्चारणान्तेऽन्यस्य तत्समसंख्यस्पर्शस्योच्चारणप्राप्तिः तत्र अयःपिण्डता। यत्र सम्यगित्यादौ द्वितीयमकारस्य स्पष्टप्रयत्नवतो वर्णस्योच्चारणान्ते ईषदूष्मोच्चारणप्राप्तिः तत्र।

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized by eGangotri

अथवा वैपरीत्येनापि यत्र 'विलिमन' इत्यादौ ईषत्प्रयत्नभेदः तत्र दारुपिण्डता। एवमूष्माऽन्तस्थसंयोगेऽश्च इत्यादावपि। यत्र पुनः स्पर्शोष्मसंयोगेऽस्मिन्नित्यादौ पूर्णः प्रयत्नभेदः तत्रोर्णापिण्डता। अत एवाऽन्तस्थरेफोच्चारणसमनन्तरमेव प्रथमजकारोच्चारणे दारुपिण्डतैव। ईषत्स्पृष्टोच्चारणान्ते स्पृष्टोच्चारितत्वात्। ततो यमस्य द्वितीयजकारप्रतिरूपकस्य प्रथमजकारसमसंख्यकत्वेन उच्चारणे नासिकयोरेवाऽन्तर्लीनत्वम्। इयमेवाऽशरीरिता यमस्य। अतो नास्य प्रत्यक्षा श्रुतिः। इदमेव चास्या योगवाहत्वम्। तेनैव च यमस्य पूर्वाक्षरेण संश्लिष्टतया अयःपिण्डता।

हिन्दी—विशेष रूप से दारुपिण्डता कहाँ होती है, इस विषय में कहते हैं—अन्तस्थ वर्ण (य र ल व) तथा यम वर्ण (कुं खुं गुं घुं) के संयोग में कोई विशेषता प्राप्त नहीं होती, क्योंकि यम को शरीर रहित जानना चाहिए तथा अन्तस्थ वर्ण को पिण्ड का नायक समझना चाहिए।

अवशिष्टाः ज्वाला-मृत्-वायु-वज्रपिण्डानाह—

ज्वालापिण्डान् सनासिक्यान् स्वानुस्वारांस्तु मृण्मयान्।
सोपध्मानान् वायुपिण्डान् जिह्वामूले तु वज्रिणः॥ ९३॥

अन्वयः—सनासिक्यान् ज्वालापिण्डान् (विद्यात्), सानुस्वारान् तु मृण्मयान् (विद्यात्), सोपध्मानान् वायुपिण्डान् (विद्यात्), जिह्वामूले तु वज्रिणः (विद्यात्)।

व्याख्या—सनासिक्यान्=नासिकोच्चरितैः पञ्चमैः=पञ्चमवर्णैः (ञ-म-ङ-ण-न-मैः) सहितान् (हकारयोगपिण्डान्), ज्वालापिण्डान्, विद्यात्=जानीयात्। येन प्रकारेण 'वह्निः ब्रह्म' इत्यादौ तत्तत् स्थानकरणाभ्याम् उत्पत्तिकाले यथाक्रमं ह-नासिक्ययोः उत्पन्नयोरपि हकारनिष्ठस्योष्मणः नासिक्याऽनुनादाऽभिघातेन (कस्यचित् वस्तुनः पूर्ववर्त्तिन्याः तत्संयोगात् परत्र गमनं ज्वालाया इव) हकारात्परस्य नासिक्यवर्णस्य हकारश्रुतेः प्राक् श्रुतिः। इति ज्वालापिण्डता।

सानुस्वारांस्तु—अत्र अनुस्वारशब्देन उभयविधो ग्राह्यः। एतेन अनुनासिक्यविशिष्टान् पूर्णानुस्वारविशिष्टांश्च पिण्डान्। मृत्पिण्डान्—मृदः=मृत्तिकायाः पिण्ड इव पिण्डो येषु तान् (विद्यात्)। अत्रोदाहरणं यथा—'त्रिठेंशो यामैरयंश्चन्द्रमसि। लोकौ २॥ ऽ अकल्पयन् शत्रूं २॥ रप' इत्यादौ यथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृत्पिण्डे क्वचित् ग्रन्थिर्मध्ये दृश्यते तथा उभयविधानुस्वारयोरपि ग्रन्थिरिव मध्ये विभिन्नश्रुतिकत्वात् मृत्पिण्डता बोध्या ।

सोपध्मानान्—उपध्मायत अनेन इत्युपध्मानो वायुः तेन सहितान् । पवर्गात् पूर्वत्र ऊष्मणः उच्चारणे वायुर्ध्मायते—गम्भीरध्वनिर्भवति, अतो ये ये सोपध्मानाः 'द्यौष्पितादयः' तान्, वायुपिण्डान् (विद्यात्) । एवं पकारात् पूर्वस्य विसर्जनीयस्यापि । यथा—'देवसवितः प्रसुवे'त्यादौ ।

जिह्वामूले तु—जिह्वामूले=जिह्वामूलीयोष्मणि तु, तुकारेण सोपध्मानव्यतिरेकः । तेन कवर्गात् पूर्वस्य ऊष्मणः उच्चारणे जिह्वामूलीयत्वात् इष्कृतिरित्यादौ, वज्राः सन्ति येषु पिण्डेषु तान् वज्रिणः (विद्यात्) । यथा—वज्रः प्रक्षिप्तः शत्रुमाश्लिष्य तिष्ठति एवमत्र षकारस्य खकारोच्चारणेन जिह्वामूलीयत्वादग्रिमेण ककारेणात्यन्तसंश्लिष्टा श्रुतिः श्रूयते ककारस्यापि जिह्वामूलीयत्वात् । उभयत्र स्थानकरणयोरैक्यात् । एवं दिवः ककुदित्यादौ कण्ठ्यस्यापि विसर्गस्य जिह्वामूलीयकवर्गयोगेन स्थानकरणयोः सान्निध्यात् वज्रपिण्डताऽविरुद्धा ।

हिन्दी—अब ज्वालापिण्ड, मृत्पिण्ड, वायुपिण्ड और वज्रपिण्ड के विषय में कहते हैं—नासिक्य (नाक से उच्चरित होने वाले वर्ण—ञ म ङ ण न=ञमङणनानां नासिका च, नासिकाऽनुस्वारस्य) के सहित वर्ण और उनका संयोग ज्वालापिण्ड कहलाते हैं और ऐसी स्थिति में जब कि अनुस्वार युक्त संयोग हो, मृत्पिण्ड कहलाता है । उपध्मानीय वर्णों से युक्त संयोग को वायुपिण्ड कहते हैं तथा जिह्वामूलीय वर्णों का संयोग वज्रपिण्ड कहलाता है ।

पिण्डानामुदाहरणानि क्वचिन्मूले दृष्टानि भवन्ति, तानि च शुक्लयजुर्वेदसंहितोक्तानि सन्ति सौविध्याय तान्यप्यत्र दीयन्ते—

अयःपिण्डो यथा—अ॒ग्निं ?, पत्क्नी॑ ÷, त॒नू॒च्छिम्, यक्क्ना इति । **दारुपिण्डो यथा**—अश्र्वं ÷, सूर्य्यं॒ ६, विल्लिमने, व्विश्श्वज॒नस्य, व्वी॒र्य्यं॒म् इति । **ऊर्णापिण्डो यथा**—अश्म्मन्, कृष्णं ÷, अ॒मुष्मिन्, आस्म्मन्, कु॒क्कुटं ?, इति । **ज्वालापिण्डो यथा**—ब्रह्म॑, वह्नि॑तमम्, गृहृ॒ण्णामि । **मृत्पिण्डो यथा**—ताꣳ सवितुः, सꣳ स्थाम्, लोकां २॥ऽ अकल्पयन्, यामैरयँश्चन्द्रमसि इति । **वायुपिण्डो यथा**—देव सवितः प्रसुव, द्यौष्पिता,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

या७. फलिनी६ इति । वज्रपिण्डो यथा—ऋक्क्सामयो६, इष्क्कृतिः, दिवः७. ककुत् इति ।

एषां पिण्डानां व्याख्या स्वतः एव सुस्पष्टा, अतः पिष्टपेषणं न विहितम् ।

हिन्दी—संयोगपिण्डों के पृथक् उदाहरण कहीं-कहीं मूल में भी दृष्ट होते हैं । वे सभी उदाहरण शुक्लयजुर्वेदसंहिता के तत्तद् स्थानों से लिये गये हैं, वे इस प्रकार हैं । अयःपिण्ड का उदाहरण—अग्निः, पत्क्नी, तनच्मि, यक्क्ना । दारुपिण्ड का—अश्वः, सूर्य्यः, बिल्मिने, विश्वजनस्य, व्वीर्य्यम् । ऊर्णापिण्ड का—अश्मन्, कृष्ण, अमुष्मिन्, कुक्कुटः । ज्वालापिण्ड का—ब्रह्म, वह्नितमम्, गृहृ्णामि । मृत्पिण्डका—तां सवितुः संस्थाम्, लोकां २॥ऽ अकल्पयन्, यामैरयँश्चन्द्रमसि । वायुपिण्ड का—देवसवितः प्रसुव, द्यौष्पिता, याः फलिनीः । वज्रपिण्ड का—ऋक्क्सामयोः, इष्क्कृतिः, दिवः ककुत् । इन उदाहरणों का दिग्दर्शन अन्यत्र भी मूल के साथ आ चुका है । फिर भी यहाँ सौविध्य के लिए दिया गया है ।

स्वराणां नानादैवत्यं पूर्वमेव निर्दिष्टमधुना स्पर्शादीनां दैवत्यत्वमाह—

एते ककारादयो मकारावसानाः कृष्णाः पञ्चविंशतिः स्पर्शा व्याख्याताः—शनैश्चरदेवत्याः । चत्वारोऽन्तस्था यरलवाः कपिलवर्णा अग्निदेवत्याः । चत्वार ऊष्माणः शषसहा अरुणवर्णा आदित्यदेवत्याः । एवं त्रयस्त्रिंशद् व्यञ्जनानीति ।

अन्वयः—सुस्पष्ट एव ।

व्याख्या—एते = स्पर्शवर्णाः, ककारादयो मावसानाः=(कादयो मावसानाः स्पर्शाः—व्या० नि०) ककारादारभ्य मकारपर्यन्तं (क, ख, ग, घ, ङ, च, छ, ज, झ, ञ, ट, ठ, ड, ढ, ण, त, थ, द, ध, न, प, फ, ब, भ, म) पञ्चविंशति-संख्यकाः वर्णाः—कृष्णाः = कृष्णवर्णाः, अपि च शनैश्चरदेवत्याः = शनैश्चरः = शनिनामधेयः, दैवतकाः भवन्ति । चत्वारः = चतुःसंख्यकाः, अन्तस्थाः = अन्तस्थवर्णाः यरलवाः, इत्येते कपिलवर्णाः, अग्निदेवत्याः = अग्निदैवतकाः भवन्ति । एवमेव चत्वारः = चतुःसंख्यकाः, ऊष्माणः = ऊष्मसंज्ञकाः शषसहाः, अरुणवर्णाः = ईषद्रक्तवर्णाः, आदित्यदेवत्याः = सूर्यदैवतकाः भवन्ति । एवम् = अनेन प्रकारेण त्रयस्त्रिंशद् = पञ्चविंशतिः स्पर्शाः, चत्वारोऽन्तस्थाः, चत्वार ऊष्माणश्च २५ + ४ + ४ = ३३ संख्यकाः व्यञ्जनानि भवन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—स्वरों के भिन्न-भिन्न प्रकार के दैवत्य (देवता) पूर्व में प्रतिपादित हो चुके हैं, अब स्पर्श वर्ण, अन्तस्थ वर्ण और ऊष्मा वर्णों के दैवत्य कहते हैं—स्पर्श वर्ण जो कि कवर्ग से लेकर पवर्ग तक (क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म) २५ वर्ण होते हैं, उनके शनैश्चर (शनि) देवता होते हैं। अन्तस्थ चार वर्ण य र ल व कपिल वर्ण के तथा अग्नि देवता वाले होते हैं। इसी प्रकार चार ऊष्मा वर्ण श ष स ह ये अरुण (कुछ लाल) वर्ण के सूर्य देवता वाले होते हैं। इस प्रकार २५ स्पर्श, ४ अन्तस्थ और ४ ऊष्मा वर्ण कुल मिलाकर तैंतीस व्यञ्जन वर्ण होते हैं जिनका वर्ण तथा देवता ऊपर कहे गये हैं।

संयोगपिण्डविशेषे आदौ करणानि निरूप्यन्ते—

चतुर्विधं करणम्—स्पृष्टमस्पृष्टं संवृतं विवृतञ्चेति ॥ क ॥ स्पृष्टाः स्पर्शाः ॥ ख ॥ अस्पृष्टा अन्ये ॥ ग ॥ संवृता घोषाः ॥ घ ॥ विवृता अघोषाः ॥ ङ ॥ विंशतिर्घोषास्ते गजडदबा घझढधभा ङञणनमा यरलवा हकारश्चेति ॥ च ॥ त्रयोदशाऽघोषास्ते कचटतपा खछठथफा शषसाश्चेति ॥ छ ॥

अन्वयः—करणं चतुर्विधम्—स्पृष्टम् अस्पृष्टं संवृतं विवृतं च। (तत्र) (क) स्पृष्टाः स्पर्शाः, (ख) अस्पृष्टा अन्ये, (ग) संवृता घोषाः, (घ) विवृता अघोषाः, (ङ) विंशतिः घोषाः; ते गजडदबाः (वर्गस्य तृतीयवर्णाः), घझढधभाः, ङञणनमाः, यरलवाः हकारश्च इति च। (च) त्रयोदश अघोषाः (भवन्ति); ते (च) कचटतपाः, खछठथफाः, शषसाः च इति।

व्याख्या—करणम्=क्रियते इति व्युत्पत्त्या वर्णोच्चारप्रयत्नः, चतुर्विधम्=चतुःप्रकारकम्, स्पृष्टेत्यादिभेदात्। (क) तत्र स्पर्शव्यञ्जनोत्पत्तौ तत्तज्जिह्वाग्रादिना करणेन तत्तत्स्थानानां स्पर्शात् स्पृष्टाः स्पर्शा इति। (ख) वर्णोत्पत्त्यधिकरणभूतस्थानानां सम्यक् स्पर्शं विना तत्तत्करणैर्जिह्वाग्रादिभिरुच्चारणादन्तस्थानाम् ऊष्मणाञ्चास्पृष्टता इत्याह—अस्पृष्टा अन्ये इति। यद्यपि अन्तस्थानाम् ईषत्स्पृष्टता ऊष्मणाञ्च नेमस्पृष्टता विहिता, तथापि सम्यक्स्पर्शाभावेनाऽस्पृष्टता तेष्वपि सङ्गतैव। (ग) घोषाऽनुप्रदानाः संवृता ज्ञेयाः। (घ) अघोषाऽनुप्रदानाः विवृता ज्ञेयाः। (ङ) के पुनः घोषादयः? इत्याह—येषां वर्णानाम् उच्चारणे वायोः आभिमुख्यात् नादेनाऽनादौ श्रूयेते ते

CC-0. Nepal Sanskrit Academy, Kathmandu. Digitized

गजडदबादयो विंशतिसंस्याका घोषा भवतन्तीति। (च) कचटतपादीनां त्रयोदशसंख्याकानाम् उच्चारणे वायोरल्पतया नादेषन्नादौ न श्रूयेते किन्तु श्वासोच्छ्वासौ श्रूयेते अतस्ते अघोषाः भवन्ति। इति दीक्षितानामाशयः।

हिन्दी—संयोगपिण्ड-विशेष में करण का विचार किया जाता है, अतः पहले करण के सम्बन्ध में ही कहते हैं—करण चार प्रकार के होते हैं—स्पृष्ट, अस्पृष्ट, संवृत और विवृत भेद से। मुनिवर पाणिनि के मत में यह करण (प्रयत्न) आभ्यन्तर और बाह्य (आभ्यन्तरो बाह्यश्च) दो प्रकार के हैं। इनमें आभ्यन्तर के पाँच उपभेद होते हैं—स्पृष्ट, ईषत्स्पृष्ट, ईषद्विवृत, विवृत और संवृत (स्पृष्टेषत्स्पृष्टेषद्विवृत-विवृत-संवृतभेदात्)। इनमें स्पर्श वर्णों का (कादयो मावसानाः स्पर्शाः) प्रयत्न स्पृष्ट है और बाकी सब अस्पृष्ट प्रयत्न के होते हैं। घोषसंज्ञक वर्ण संवृत करण के एवं अघोषसंज्ञक वर्ण विवृत प्रयत्न के होते हैं। इस विषय में पाणिनि ने स्पष्ट कहा है–'स्पृष्टं प्रयत्नं स्पर्शानाम्, ईषत्स्पृष्टमन्तस्थानाम्, ईषद्विवृतमूष्मणाम्, विवृतं स्वराणाम्, ह्रस्वस्यावर्णस्य प्रयोगे संवृतम्, प्रक्रियादशायां तु विवृतम्'। इसी प्रकार ग्यारह बाह्य प्रयत्नों में घोष-अघोष का स्थान है। इनमें जिन वर्णों का उच्चारण गूँज युक्त हो उसे घोष और उनके अतिरिक्त अघोष कहे जाते हैं। घोष के बीस वर्ण—ग, ज, ड, द, ब, घ, झ, ढ, ध, भ, ङ, ञ, ण, न, म (वर्गों के तृतीय, चतुर्थ एवं पंचम वर्ण) तथा य, र, ल, व और हकार। अघोष के तेरह वर्ण होते हैं–(वर्गों के प्रथम व द्वितीय वर्ण) क, च, ट, त, प, ख, छ, ठ, थ और फ तथा श, ष, स। (व्याकरण के अनुसार—वर्गाणां प्रथम-तृतीय-पञ्चमाश्चाल्पप्राणाः, वर्गाणां द्वितीय-चतुर्थौ शलश्च महाप्राणाः।) इस प्रकार प्रयत्नों (करणों) के वर्गीकरण सम्पन्न होते हैं।

वर्णानां स्थानानि कतिविधानि भवन्ति—

दशधा वर्णा भवन्ति—औरस-कण्ठ्य-मूर्धन्य-दन्त्योष्ठ्य-तालव्य-दन्त-मूलीय-जिह्वामूलीय-यमानुस्वाराश्चेति ॥ ज ॥

अन्वयः—वर्णाः दशधा भवन्ति—औरस-कण्ठ्य-मूर्धन्य-दन्त्य-ओष्ठ्य-तालव्य-दन्तमूलीय-जिह्वामूलीय-यम-अनुस्वाराः च इति।

व्याख्या—वर्णाः=अकारादयः, दशधा=दशप्रकारकाः, भवन्ति=जायन्ते—औरसाः—उरसि=हृदये, जाताः=समुत्पन्नाः वर्णाः, कण्ठ्याः=कण्ठे

CC-0. Nepal Sanskrit Academy. Kathmandu. Collection

जाताः कण्ठ्याः, मूर्धन्याः—मूर्धनि = मस्तके भवाः, तालव्याः = तालुनि भवाः तालव्याः, दन्त्याः = दन्तेषु जाताः, ओष्ठ्याः = ओष्ठयोर्भवाः, दन्तमूलीयः = दन्तमूले भवः, जिह्वामूलीयः = जिह्वामूले भवः, यमाऽनुस्वारौ पञ्चाद्वर्णितौ भवतः। इति = अनेन प्रकारेण, दशधा = दशप्रकारैः वर्णाः भवन्ति।

हिन्दी—अकारादि वर्णों के कितने स्थान होते हैं, इस जिज्ञासा में कहते हैं कि—वर्ण दस प्रकार के होते हैं—(१) औरस, (२) कण्ठ्य, (३) मूर्धन्य, (४) दन्त्य, (५) ओष्ठ्य, (६) तालव्य, (७) दन्तमूलीय, (८) जिह्वामूलीय, (९) यम और (१०) अनुस्वार।

साम्प्रतं केषां वर्णानां किं स्थानमिति निर्दिशति—

तत्र द्वावौरसौ ह्व इति ह्म इति ॥ झ ॥

अन्वयः—तत्र ह्व इति ह्म इति च द्वौ औरसौ (स्तः)।

व्याख्या—तत्र = स्थानविशेषेषु, वर्गपञ्चमैः अन्तस्थाभिश्च युतः द्विविधो हकारः ह्वसदृशो ह्मसदृशश्च, औरसौ = उरसोत्पन्नौ (ज्ञेयः = बोद्धव्यः)।

हिन्दी—अब किन वर्णों का कौन स्थान है इस विषय में यथाक्रम से कहते हैं—वर्णों के उन स्थान-विशेषों में जो वर्गपञ्चम एवं अन्तस्थों से युत दो प्रकार के हकार—ह्व तथा ह्म—इन दो संयुक्त वर्णों को औरस = हृदयस्थान से उत्पन्न जानें।

कण्ठस्थानीयाः वर्णाः के—

त्रयः कण्ठ्याः—अ आ आ ३ इत्यवर्णहकारविसर्जनीया इति ॥ ञ ॥

अन्वयः—त्रयः कण्ठ्याः—अ आ आ ३ इति अवर्णहकारविसर्जनीया इति।

व्याख्या—त्रयः = त्रिसंख्यकाः, कण्ठ्याः = कण्ठस्थानोद्भवाः (भवन्ति), अत्र त्रय इति कथनं जात्यभिप्रायेण, यतो हि ह्रस्व दीर्घ प्लुत इति त्रिप्रकारकोऽवर्णः भवति, हकारश्च औरसभिन्नो ग्राह्यस्तस्य पृथगुक्तत्वात्। अतः—अ, आ, आ ३ इत्यवर्णः, हकारः विसर्जनीयो विसर्गश्च, इति = इत्येते त्रयः, कण्ठ्याः = कण्ठोत्पन्नाः वर्णाः भवन्ति। अतः एते कण्ठाधिकरणे हनुमूलकरणेन उत्पद्यन्ते इत्याशयः। तथा च पाणिनीये व्याकरणे—'अकुहविसर्जनीयानां कण्ठः'।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—कण्ठस्थानीय वर्णों के विषय में कहते हैं—तीन कण्ठ से उच्चारण होने वाले वर्ण होते हैं—(१) अ आ आ ३ (ह्रस्व-दीर्घ-प्लुतसंज्ञक अकार), (२) औरस (ह्व और ह्य को छोड़कर) भिन्न हकार एवं (३) विसर्जनीय (विसर्ग)।

मूर्धन्याः वर्णाः कतिविधाः भवन्ति—

षण्मूर्धन्याः—टठडढणषा इति ॥ ट ॥

अन्वयः—षड् मूर्धन्याः (भवन्ति)। (ते च यथा—) टठडढणषाः इति।

व्याख्या—षड्=षट्संख्यकाः, मूर्धन्याः=मूर्धनि भवाः (भवन्ति=जायन्ते)। के च ते—टवर्गीयाः पञ्च वर्णाः—ट ठ ड ढ ण, मूर्धन्यषकारश्चेति। अपरञ्च षकारो टवर्गश्च इत्येते षड् वर्णा मूर्धनि तालुत ऊपरि भागे जिह्वाग्रं प्रतिवेष्टय तेन करणेन उत्पद्यन्ते इत्याशयः। नन्वत्र शङ्कते यत् मुनिना पाणिनिना तु 'ऋटुरषाणां मूर्धा' इत्युक्तम्, कथं तर्हि षडेव।

हिन्दी—मूर्धन्य वर्ण कितने होते हैं, इस विषय में कहते हैं—मूर्धन्य वर्ण छः होते हैं; जैसे—टवर्ग—ट ठ ड ढ ण और षकार। ये छः वर्ण मूर्धा में तालु से ऊपर के भाग में जीभ के अग्रभाग को वेष्टित करके उस करण से उत्पन्न होते हैं। किन्तु वैयाकरण पाणिनि मुनि ने 'ऋटुरषाणां मूर्धा' यह कहकर र को भी बढ़ा दिया है।

तालव्याः कतिविधाः भवन्ति—

नव तालव्याः—इ ई ई ३ इतीवर्णः, चछजझञयशा एकारश्चेति ॥ ठ ॥

अन्वयः—तालव्याः नव (भवन्ति) इ ई ई ३ (ह्रस्वदीर्घप्लुताः), चवर्गः=च छ ज झ ञ, यकार-शकार-एकारश्च इति।

व्याख्या—तालव्याः=तालुस्थानादुच्चारणयोग्याः वर्णाः, नव=नवसंख्यकाः भवन्ति। तद्यथा—इ ई ई ३ (इति इवर्णः)—एते त्रयः क्रमशः ह्रस्व-दीर्घ-प्लुताः भवन्ति। चवर्गः च-छ-ज-झ-ञवर्णाः पञ्च, यकार-शकार-एकारश्च, इति=अनेन प्रकारेण, १+५+३=९=नवसंख्यकाः भवन्ति। अत्र नवेति जात्याख्यानम्। एते तालुभागे जिह्वामध्यस्पर्शादुत्पद्यते। एकार-ऐकारस्यापि उपलक्षणम्। नवेति गणना प्रातिशाख्यानुसारेण।

CC-0. Nepal Sanskrit Academy. Kathmandu Collection

हिन्दी—तालव्य कितने प्रकार के होते हैं, इस जिज्ञासा में कहते हैं—तालु से उच्चारण होने वाले वर्ण नौ होते हैं। जिनमें इ ई ई ३ (ह्रस्व, दीर्घ, प्लुत), चवर्ग (च छ ज झ ञ) तथा यकार, शकार, यकार ये नौ तालव्य-स्थानीय हैं (पाणिनिमते—इचुयशानां तालु)।

दन्त्याः कियत्संख्यका भवन्ति—

अष्टौ दन्त्याः—ऌ ॡ ऌ ३ इति ऌवर्ण तथदधनलकारसकारा इति ॥ ड ॥

अन्वयः—दन्त्याः अष्टौ (भवन्ति)—ऌ ॡ ऌ ३ इति ऌवर्णं (क्रमेण ह्रस्व-दीर्घ-प्लुताः) तथदधन-लकार-सकारा इति।

व्याख्या—दन्त्याः=दन्तस्थानादुच्चारणयोग्याः वर्णाः, अष्टौ=अष्टसंख्यकाः भवन्ति; ते च यथा—ऌ ॡ ऌ (ह्रस्व-दीर्घ-प्लुतस्वरूपाः) ऌवर्णाः, तथद-धन-लकार-सकाराः, इति=इत्येते अष्टसंख्यकाः (१+५+२=८) भवन्ति दन्त्याः। अष्टाविति जात्यभिप्रायेण ज्ञेयम्। एते दन्तस्थाने जिह्वाग्रेण स्पर्शे कृते उत्पद्यन्ते। पाणिनिमते च—ऌतुलसानां दन्ताः इति।

हिन्दी—दाँत से उच्चरित होने वाले कितने वर्ण होते हैं, इस विषय में कहते हैं—दन्तस्थानीय आठ वर्ण होते हैं—ऌ ॡ ऌ क्रम से ह्रस्व-दीर्घ-प्लुत ऌवर्ण, त थ द ध न, लकार और सकार ये आठ वर्ण दन्तस्थानीय होते हैं। इनका उच्चारण दाँत से होता है। ये दन्तस्थान में जीभ के अग्रभाग से स्पर्श करने पर उत्पन्न होते हैं।

ओष्ठ्या वर्णाः कतिसंख्यका भवन्ति—

नव ओष्ठ्याः—उ ऊ ऊ ३ इत्युवर्ण पफबभम-वकारोपध्मानीया ओकारश्चेति ॥ ढ ॥

अन्वयः—नव ओष्ठ्याः (भवन्ति)—उ ऊ ऊ इति उवर्णं, पफबभम-वकार-उपध्मानीयाः ओकारः च इति।

व्याख्या—नव=नवसंख्यकाः, ओष्ठ्याः=ओष्ठस्थानादुत्पन्नाः वर्णाः (भवन्ति)। (तद्यथा) उ ऊ ऊ ३ (ह्रस्व-दीर्घ-प्लुताख्याः), इति=एवम्, उवर्णः एवञ्च पफबभम-वकार-उपध्मानीयाः ओकारः च, इति=इत्येवं, नव-संख्यकाः ओष्ठ्याः भवन्ति। एते वर्णाः ओष्ठस्थाने ओष्ठकरणेन उत्पद्यन्ते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वकारस्य तु ओष्ठस्थाने दन्तैः करणैः उत्पत्तिः बोध्या। अत एवोक्तं पाणिनीय-शिक्षायाम्—दन्त्योष्ठ्ययोः वः स्मृतो बुधैः'। दन्तानां करणरूपाणां लाघवात् स्थानत्वेन निर्दिशन्ती अविरुद्धमेव। स्थानं त्वस्य ओष्ठमेवेति दिक्।

हिन्दी—ओठ से उत्पन्न होने वाले (स्थान वाले) वर्णों की कितनी संख्या है, इस विषय में कहते हैं—ओठ स्थान से उत्पन्न होने वाले वर्णों की संख्या नौ है—जैसे उ ऊ ऊ ३ (ह्रस्व-दीर्घ-प्लुत) उवर्ण, प फ ब भ म, वकार, उपध्मानीय और ओकार। वकार का तो ओष्ठस्थान में दाँतों करणों के द्वारा जानना चाहिए। मूल स्थान तो ओठ ही है।

एको दन्तमूलीयो रेफः ॥ ढ ॥

अन्वयः—दन्तमूलीयः एकः रेफः।

व्याख्या—दन्तमूलीयः=दन्तमूलादुच्चारणीयो वर्णः, एकः=एकसंख्यकः, एकमात्र एव, रेफः=रकारवर्णः (भवति)। अत्र दीक्षितानामाशयः—रेफो दन्तमूले जिह्वाग्रस्पर्शेन उत्पद्यते, इत्यपि सम्भवाभिप्रायेण प्रातिशाख्य-दिशा उक्तम्। वस्तुतो जिह्वामध्यकरणेन मूर्धस्थानोक्तिः पाणिन्यादिसम्मता रेफस्य न विरुध्यते। यतो जिह्वाग्रेण दन्तमूले ईषत्स्पृष्टे अर्थादेव जिह्वामध्यस्य मूर्धनि स्थितिरिति करणभेदस्तु पाणिनेरपि ग्राह्यः।

जिह्वामूलीयाः कतिसंख्यका भवन्ति—

सप्त जिह्वामूलीयाः—ऋ ॠ ऌ ३ इत्यृवर्णः, क-कखगघङा इति ॥ त ॥

अन्वयार्थौ—जिह्वामूलीयाः सप्त—ऋ ॠ ऌ ३ (ह्रस्व-दीर्घ-प्लुताः) =(१) ऋवर्णः, (२) क≍, (३) क ख ग घ ङ=१+१+५=७, इति=इत्येते सप्त वर्णाः, जिह्वामूलीयाः=जिह्वामूलादुत्पन्नाः भवन्ति, वर्णा इति शेषः। अत्र दीक्षितानां समासोक्तिः—सप्तेति जात्याख्यानं पूर्ववत्। एते नव वर्णा जिह्वाया मूलभागे हनुमूलेन करणेन उत्पद्यन्ते। अत्र ऋवर्णस्य जिह्वामूलीयत्वमपि पाणिनीयस्य मूर्धन्योक्त्याऽविरुद्धमेव मूर्धन्यष-टवर्गाभ्यामस्य करणविशेषप्रदर्शनाय अत्रोक्तिः। न तु स्थानद्वयेन द्विविध ऋवर्णोत्पत्तिः प्रतिपत्तव्या। पाणिनिना तु प्रक्रियालाघवायास्य मूर्धन्यता स्वीकृता रेफ इवेति।

हिन्दी—जिह्वामूलीय वर्णों की कितनी संख्या है, इस विषय में कहते हैं—जिह्वा (जीभ) के मूल से उत्पन्न होने वाले सात वर्ण होते हैं।

CC-0. Nepal Rashtriya Sanskrit Academy, Kathmandu Collection

यथा—ऋ ॠ ऋ (ह्रस्व-दीर्घ-प्लुतबोधक) ऋवर्ण, क≍, क ख ग घ ङ। यहाँ ऋवर्ण का जिह्वामूलीयत्व भी पाणिनिमत के मूर्धन्य उक्ति से अविरुद्ध है।

यमाः कतिविधा भवन्ति के च ते—

चत्वारो यमाः—कुँ खुँ गुँ घुँ इति ॥ घ ॥

अन्वयः—चत्वारः यमाः (भवन्ति)—कुँ, खुँ, गुँ, घुँ इति।

व्याख्या—कुँ इत्यादि चतुर्षु वर्णेषु उकारः सादृश्यार्थः, सादृश्यञ्च वर्गाद्यत्वादिना ग्राह्यम्। अर्धचन्द्रेण च आनुनासिक्यं द्योत्यते। तेन आनुनासिक्यगुणविशिष्टाः वर्गप्रथमाः (कुँ), वर्गद्वितीयाः (खुँ), वर्गतृतीयाः (गुँ), वर्गचतुर्थाः (घुँ), इति=अनेन प्रकारेण, चत्वारः=चतुर्विधाः, यमाः; भवन्ति=जायन्ते।

अत्र दीक्षितानामावश्यकः विमर्शः। तथाहि—नासिकामूलकरणेनाधिकेन संस्कृतो वायुः नासिका सहकृते स्वस्ववर्गीयस्थाने यमाभिख्यां भजते। अत एव वर्गपञ्चमात् हुँ इति नासिक्यात् अनुनासिकाच्च यमानां पार्थक्यम्। ते हि समानस्थानकरणाः। यमास्तु नासिकामूलमात्रकरणाः।

अयमाशयः—'रुक्मः' इत्यादौ रुक् इति ककारादिकमुच्चरितुं जायमानो यत्नः संयोगादिरुकारादिकमुच्चार्य नासिकामूले विच्छिन्नः पुनस्तत्र तत्सजातीयम् आनुनासिक्यम् अपरम् उच्चारयितुं प्रवृत्तः ककारादिसदृशीं स्पष्टां श्रुतिम् अनुत्पादयन् अपि नासिकायां तत्तत्स्थाने च विधृत एव मात्राविलम्बितः सन् नासिक्यगुणविशिष्टः ककाराद्यनुप्रदानादिप्रयुक्तधर्मवैशिष्टयेन कँ खँ गँ घँ इत्यन्यतमसदृशः यमः (मुखधारणया विच्छेदरूपः) न तु तथैव उच्चारितः भवति। अत एव यमानाम् अशरीरत्वम् उपपद्यते। वर्णस्वरूपाभावादेव अक्षरसमाम्नाये अयुक्ता इत्ययोगाः मुखस्थश्रुतिविशेषात्मलाभवाहनाच्च वाहाः। अयोगाश्च ते वाहाः अयोगवाहाः इत्यन्वर्थसंज्ञा यमानां पाणिन्यादिभिः प्रतिपादिता विसर्गादिवत् इति।

हिन्दी—यम वर्ण कितने प्रकार के और कौन-कौन हैं, इस विषय में कहते हैं—यम वर्ण चार प्रकार के होते हैं। वे इस प्रकार हैं—कुँ खुँ गुँ घुँ। कुँ आदि चारों वर्णों में उकार सादृश्य का द्योतक है। अर्धचन्द्र से अनुनासिक द्योतित होता है। इससे आनुनासिक्यगुणविशिष्ट वर्ग का प्रथम वर्ण (कुँ),

CC-0. Nepal Sanskrit Academy. Digitized by Dharmakirti Collection

द्वितीय वर्ण (खुं), तृतीय वर्ण (गुं) और चतुर्थ वर्ण (घुं) इस प्रकार से चार यम वर्ण होते हैं।

यमानां कतिसंख्यकान्युदाहरणानि—

रुक्मेति प्रथमो ज्ञेयः सक्थ्ना इत्यपरो भवेत्।
व्विद्ध्माते तु तृतीयश्च जम्भे दद्ध्मश्चतुर्थकः॥ ९३॥

अन्वयः—प्रथमः (यमः) रुक्क्म इति ज्ञेयः, अपरः (यमः) सक्थ्ना इति भवेत्, तृतीयः च (यमः) व्विद्ध्माते, चतुर्थकः च (यमः) जम्भे दद्ध्मः (ज्ञेयः)।

व्याख्या—प्रथमः=प्रथमसंख्यकः, यमः=वर्गाद्यरूपः (उदाहरणम्), संहितोक्ते 'रुक्क्म' इति=इत्यस्मिन् स्थाने, ज्ञेयः=जानीयात्। अपरः (यमः) =वर्गद्वितीयरूपः, 'सक्थ्ना' इत्यत्र भवेत्=स्यात्, अस्ति, तृतीयः=तृतीयसंख्यकः, वर्गः तृतीयरूपः यमः विद्ध्माते' इत्यत्र, ज्ञेयः=विद्यात्, चतुर्थकः=चतुर्थसंज्ञकः यमः, जम्भे दद्ध्मः' इत्यत्र ज्ञेयः। अत्र विमर्शः दीक्षितानाम्—इत्थं यदि कवर्गा एव चत्वारो यमाः सम्मता अभविष्यन् तर्हि सक्थ्नादिषु थदधानां यमत्वं कथं निरदेक्ष्यत आचार्यैः। अतो विंशतिस्थानिनां सरूपाः वर्गप्रथमत्वादिचतुर्धर्मविशिष्टा नासिक्यगुणाः चतुर्विधाः अप्रत्यक्षवर्णशरीराः श्रुतिविशेषा एव यमाः विसर्गाऽनुस्वारादिवत् इति।

हिन्दी—यमों के कितने उदाहरण हो सकते हैं, इस विषय में कहते हैं—प्रथमसंख्यक (पहला) यम वर्ग का आद्यक्षर रूप 'रुक्क्म' यह जानना चाहिए। दूसरा यम वर्ग का द्वितीयाक्षरस्वरूप 'सक्थ्ना' यह है। तृतीय यम का स्थान वर्ग तृतीयाक्षर से युक्त यम 'विद्ध्माते' यहाँ जानना चाहिए और वर्ग का चतुर्थाक्षर रूप यम 'जम्भे दद्ध्मः' यह जानना चाहिए।

प्रसङ्गप्राप्तं यमस्थलमाह—

अपञ्चमैश्चैकपदे संयुक्तं पञ्चमाक्षरम्।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि॥ ९४॥

अन्वयः—एकपदे पञ्चमाक्षरम् अपञ्चमैः संयुक्तं (यत्र) (स्यात्) तत्र यमः उत्पद्यते। स हि पूर्वाक्षरस्य अङ्गम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

व्याख्या—एकपदे=पदमध्ये, पञ्चमाक्षरम्=वर्गस्यान्तिममक्षरम्, अपञ्चमैः

=वर्गस्य प्रथम-द्वितीय-तृतीय-चतुर्थाक्षरैः संयुक्तं यत्र स्यात् तत्र—यमः=विच्छेदः, उत्पद्यते=उत्पन्नो भवति। अत्रायमाशयः—कादिवर्गचतुष्टयेषु आद्यानां चतुर्णां पञ्चमे परे पूर्वसदृशः यमः मध्ये यो वर्णः स भवति। एवं विंशतिस्थानिनः स्वरूपाः चत्वारश्च सन्तो यमा भवन्ति। तथा हि प्रातिशाख्यभाष्ये उव्वटाचार्या व्याख्यातवन्तः। सः=यमः, पूर्वाक्षरस्य=पूर्वस्वरस्य, हि=एव, अङ्गम्=अवयवः, क्लीबत्वं विधेयापेक्षया ज्ञेयम्।

हिन्दी—अब प्रसङ्गप्राप्त यमस्थल को कहते हैं। एक ही पद में (पद मध्य में) जहाँ वर्ग का पञ्चम अक्षर प्रथम से चतुर्थ वर्ण पर्यन्त संयुक्त हों, वहाँ यम का प्रादुर्भाव होता है और वह यम पूर्व अक्षर का ही अंग होता है।

यमस्य प्रतिप्रसवस्थलानि यथा—

पञ्चमाः शषसैर्युक्ता अन्तस्थैर्वापि संयुताः।
यमास्तत्र निवर्त्तन्ते श्मशानादिव बान्धवाः॥ ९५॥

अन्वयः—(यत्र) पञ्चमाः शषसैः युक्ताः अन्तस्थैः वा अपि संयुताः, तत्र यमाः निवर्त्तन्ते, बान्धवाः श्मशानाद् इव यथा निवर्त्तन्ते तथा।

व्याख्या—यत्र=यस्मिन् स्थाने, प्रातिशाख्योक्त—'ऊष्मान्तस्थाभ्यश्च स्पर्शं' इति नियमानुसारेण पञ्चमाः स्पर्शाः द्विर्भवन्ति। यथा—'आस्मिन्' 'बिल्म्मिने' इत्यादौ। तत्र ऊष्मान्तस्थान्यतरसंयुक्तपञ्चमस्पर्शपिण्डे यमाः निवर्त्तन्ते। अर्थात्—तत्र ते मध्ये द्वित्वाज्जाताः पञ्चमस्पर्शवर्णाः यमगुणत्वं न प्राप्नुवन्ति तेन अत्र विच्छेदाभावात् ऊर्ण्णापिण्डता दारुपिण्डता च क्रमेण विज्ञेया। तत्र दृष्टान्तोदाहरणमाह—शवनेतारो—बान्धवाः=बन्धुबान्धवाः, श्मशानाद् इव यथा निवर्त्तन्ते तथा यमा अपि निवर्त्तन्त इत्याशयः।

हिन्दी—अब यम के उत्पत्तिस्थान के विषय में कहते हैं—पञ्चम वर्ण यदि श-ष-स इन ऊष्मामूलक वर्णों से अथवा अन्तस्थ (य र ल व) वर्णों से संयुत हों तो वहाँ यम वर्णों के निवर्तन (लौटना) होते हैं अर्थात् यम वर्ण नहीं होते हैं। इसका सुस्पष्ट उदाहरण देते हैं कि—जिस प्रकार शव को ले जाने वाले बन्धु-बान्धव श्मशान से शवदाह कार्य पूरा होने पर लौट जाते हैं, उसी प्रकार यम वर्ण भी उन तथोक्त वर्णों को छोड़कर चले जाते हैं।

(क) आद्या मात्रा तु कण्ठ्यस्य एकारौकारयोर्भवेत्।
तालव्यस्य तथोष्ठ्यस्य द्वितीया च यथाक्रमम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu. Collection

(ख) यादृशी रत्नवर्णाभा जपायाः कुसुमेऽथवा ।
तादृशं रञ्जयेद्वर्णं प्रान्ते नासिक्यमाचरेत् ॥
(ग) लाक्षारक्तं यथा तोयं नकारान्तं पदं तथा ।
सर्व्वं रङ्गं विजानीयाच्छ्रूनिति निदर्शनम् ॥
(घ) लुप्ते नकारे यत्स्वारं रञ्जन्ति शौनकादयः ।
एवं रङ्गं विजानीयान्न चासीविव विन्दति ॥
(ङ) प्रथमस्थषकारेण तकारेण च संयुतम् ।
एतदक्षरमासाद्य त्रैष्टुभेति निदर्शनम् ॥
(च) प्रथमस्थषकारेण थकारेण च संयुतम् ।
एतदक्षरमासाद्याऽधिष्ठानमिति दर्शनम् ॥

अत्र विशेषः—एते कादि (आद्या मात्रा–) चान्ताः (प्रथमस्थषकारेण) श्लोकाः सर्वपुस्तकेषु न दृश्यन्ते क्वचिच्चोपलभ्यन्तेऽतोऽत्र योजिताः । एतानि पद्यानि पूर्वमेव यथास्थानं व्याख्यातानि सन्ति । अन्तिमं पद्यद्वयं 'प्रथमे न ठकारेण' इत्यत्र व्याख्याते स्तः ।

कं वर्णं केनाभिपीडयेत्, आद्यं मध्यम् अन्त्यञ्च कथमभिपीडयेत्—

चतुर्थश्च तृतीयेन द्वितीयं प्रथमेन च ।
आद्यं मध्यं तथान्त्यञ्च स्वरूपेणाभिपीडयेत् ॥ ९६ ॥

अन्वयः—चतुर्थः (चतुर्थं) च तृतीयेन, द्वितीयं प्रथमेन च (अभिपीडयेत्) । आद्यं मध्यं तथा अन्त्यञ्च स्वरूपेण अभिपीडयेत् ।

व्याख्या—चतुर्थः = वर्गचतुर्थं वर्णं (घ झ ढ ध भ), तृतीयेन वर्णेन (ग ज ड द ब), वर्गद्वितीयं (ख छ ठ थ फ), प्रथमेन = प्रथमवर्णेन (क च ट त प), च = पुनः, अभिपीडयेत् = अभिपीडनं कुर्यात्, द्विः कुर्यादित्यर्थः, तथा हि प्रातिशाख्ये—'प्रथमैर्द्वितीयास्तृतीयैश्चतुर्थाः' इति । वर्गाणामाद्यतृतीयपञ्चमास्तु स्वरूपेणैव प्रथमाक्षरं प्रथमेनैव, तृतीयं तृतीयेनैव, पञ्चमं पञ्चमेनैव, अभिपीडयेत् = द्विरुच्चरेत् । यथा वर्गाद्योदाहरणम्—'सम्यक्क्लवन्ति' = अत्र द्वौ ककारौ सकारो रेफश्च संयोगः, तत्र पूर्वः ककारः द्विरुक्तिजः । वर्गद्वितीयोदाहरणं यथा—'व्विक्ख्याय' इत्यत्र ककारखकारौ यकारश्च संयोगः, तत्र खकारः द्विरुक्तिजः । वर्गतृतीयोदाहरणं यथा—'अग्निः' इत्यत्र द्वौ गकारौ नकारश्च संयोगः, तत्र पूर्वो गकारो द्विरुक्तिजः । वर्ग-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

चतुर्थोदाहरणं यथा—'आजिग्घ्रः' इत्यत्र गकारघकारौ रेफश्च संयोगः, तत्र घकारो गकाररूपेण द्विरुक्तः। वर्गपञ्चमोदाहरणं यथा—'युङ्ङ्सि' इत्यत्र द्वौ ङकारौ संयोगः, तत्र पूर्वो ङकारो द्विरुक्तिजः।

हिन्दी—किस वर्ण को किस वर्ण से अभिपीडन (द्विरुक्ति=द्वित्व) करना चाहिए तथा आद्य, मध्य और अन्त्य वर्ण को किससे कैसे द्विरुक्त करे इस विषय में कहते हैं—चतुर्थ वर्ण को तृतीय वर्ण से तथा द्वितीय वर्ण को प्रथम वर्ण से अभिपीडन (द्विरक्त) करना चाहिए। एवञ्च—आदि वर्ण, मध्य वर्ण और अन्त्य वर्ण ये सब अपने स्वरूप से ही (अभिपीडित) द्वित्व दशा को प्राप्त करते हैं। इनका क्रमिक उदाहरण संस्कृत व्याख्या में दिये गये हैं।

कं स्वरं स्वरितं प्राहुः—

(क) अवग्रहपदच्छेद उदात्तं दृश्यते यदि।
स्वरं तं स्वरितं प्राहुः सन्धौ तु स्वार्यते परम्॥

अन्वयः—अवग्रहपदच्छेदे उदात्तं यदि दृश्यते, तं स्वरं स्वरितं प्राहुः। (यतः) सन्धौ तु परं स्वार्यते।

व्याख्या—अवग्रहपदच्छेदे=अवग्रहार्थं पदे विच्छिन्ने, यदि=चेत्, (तत्र) उदात्तम्=उदात्तवर्णं, दृश्यते=अवलोक्यते, तम्=एतादृशं, स्वरं=स्वरवर्णम्, स्वरितं=स्वरितवर्णं, प्राहुः=कथयन्ति (संहितायां वैदिकविद्वांसः)। यतः=यस्मात्कारणात्, सन्धौ=संहितायाम्, तु=निश्चयेन, परम्=उत्कृष्टम्, स्वार्यते=स्वरमिवाचरति। अर्थात्—'समिद्धोऽअञ्जन्' इत्यादौ 'समिद्धऽ इति सम्। इद्ध ऽ.' इति अवग्रहपदस्य सम् इत्यस्य विच्छेदकाले पूर्वस्वरस्य उदात्तत्वात् व्यञ्जनस्य मकारस्यापि पूर्वाङ्गत्वात् उदात्तत्वं दृश्यते। तं स्वरम् उदात्त-स्वराङ्गं मकारम्। संहितायाम् इद्ध इति स्वरितेकारेण योगात् पूर्वाङ्गताऽ-भावेन परस्याङ्गतायां स्वरितं ज्ञेयम्। तथा चोक्तं प्रातिशाख्ये—'व्यञ्जनञ्च स्वरेण सस्वरम्' इति।

हिन्दी—किस स्वर को स्वरित कहना चाहिए, इस विषय में कहते हैं—अवग्रह के लिए पद के विच्छिन्न होने पर यदि वहाँ उदात्त वर्ण दिखाई दे तो उस स्वर को संहिता में विद्वानों के द्वारा स्वरित कहना चाहिए। क्योंकि सन्धि (संहिता) में तो पूर्ण स्वर का आचरण होता है। अर्थात् 'समिद्धो-

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

ऽअञ्जन' आदि उदाहरण में अवग्रह पद 'सम्' इसका विच्छेद काल में पूर्व स्वर का उदात्त होने से व्यञ्जन मकार का भी पूर्वाङ्गत्व होने से उदात्तत्व दिखाई देता है। उस स्वर को उदात्तस्वरांग मकार को स्वरित जानना चाहिए।

(ख) स्वरसन्धिविधानेन नीचोच्चत्वं विधीयते।
व्यञ्जनाद्वा स्वराद्वापि तत्सन्धौ स्वार उच्यते॥

(ग) उदात्ताच्चिहतः स्वारः स्वरितात्प्रचयो भवेत्।
उदात्तात्स्वरितात् पूर्वं नान्य आपद्यते स्वरः॥

(घ) पदकाले यः स्वरितः संहितायां तथैव च।
स्वरिताच्चेद्भवेत् पश्चात् स एव निचितः स्वरः॥

अत्र विशेषः—एते ककारादारभ्य घकारान्ताश्चत्वारः श्लोकाः सर्वपुस्तकेषु अत्र स्थले दृश्यन्ते, अतः अप्राकरणिका अपि योजिताः। तत्र सर्वेऽपि श्लोकाः पूर्वं व्याख्याताः सन्ति।

हिन्दी—ये उपर्युक्त ककार से लेकर घकार तक कथित चारों श्लोक प्रायः सभी पुस्तकों में पाये जाते हैं, अतः अप्राकरणिक होते हुए भी यहाँ योजित किये गये हैं। ये श्लोक यथास्थान पूर्व में व्याख्यात हैं।

द्विर्वचनोत्पन्नस्याऽन्यस्य वा वर्गाद्यस्य वर्णविशेषे परे वैशिष्ट्यं प्रदर्शयति—

प्रथमाश्च तृतीयाः स्युः परे घोषवति स्थिते।
पञ्चमाः पञ्चमे पाठे द्वितीयाः शषसेषु च॥ ९७॥

अन्वयः—प्रथमाः च (पाठे) घोषवति परे स्थिते, किन्तु (ते) तृतीयाः स्युः, (किञ्च) पञ्चमे पञ्चमाः स्युः, शषसेषु च द्वितीयाः स्युः।

व्याख्या—शुक्लयजुर्वेदप्रातिशाख्ये उक्तमस्ति—'स्पर्शोऽपञ्चमः स्वरघौ तृतीयमि'ति वर्गप्रथमाः। पाठे=संहितायाम्, घोषवति वर्णे परे स्थिते सति न स्वरूपेणोच्चारणीयाः। किन्तु ते तृतीयाः स्युः। यथा—'यत्+ग्रामे' इत्यत्र वर्गाद्यस्य तकारस्य द्विर्वचनं भवति, तस्य घोषवति गकाराक्षरे परे स्थिते सति न स्वरूपेणोच्चारणम्। किन्तु स्ववर्गतृतीयेन दकाररूपेणोच्चारणमिति। यश्चात्र द्विरुक्त्या जातः प्रथमस्तकारस्तस्यापि पुनर्द्वित्वे 'स्ववर्गीये चानुत्तमे' इति निषिद्धे पूर्ववत् तृतीयत्वे च सति दकाररूपेणोच्चारणम्। उत्तरस्य तृतीयस्य घोषवत्त्वात्। तेन—'यद्दग्रामे' इत्यत्र द्वौ दकारौ गकारो रेफश्च संयोगः।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by S3 Foundation USA

घोषवदिति स्वरस्याप्युपलक्षणम् । यथा—उत् + एनम् = उदेनम् इति । किञ्च 'पञ्चमे पञ्चमम्' इति वर्गप्रथमाः पञ्चमेऽक्षरे परे पञ्चमाः स्युः स्ववर्गपञ्चमाक्षरेणोच्चारणीयाः । यथा—व्वाक् + मात्या = व्वाङ्ङ्मात्या इत्यत्र द्वौ ङकारौ मकारश्च संयोगः । शषसेषु च वर्णेषु परभूतेषु वर्गाद्याः । द्वितीयाः स्युः वर्गद्वितीयत्वेनोच्चारणीयाः । यथा—अनुष्टुप्फ् शारदीत्यत्र पकार-फकारौ शकारश्च संयोगः । शौनकमतमेतत् । तथा हि—'अस स्थाने मुदि द्वितीयठँ० शौनकस्य' इति । माध्यन्दिनानान्तु 'जिति प्रथममिति प्रातिशाख्यानुसारि 'पकारान्ते पदे पूर्वे' इति कारिकायां फ सवर्णमिति शौनकमतं प्रदर्श्य निदर्शने प्रथमस्यैव दर्शनात् 'अनुष्टुप्शारदी' इत्यत्र द्वौ पकारौ शकारश्च संयोगः । एतद् विमर्शः दीक्षितमहोदयानाम् ।

हिन्दी—द्विर्वचन (द्विरुक्त) से उत्पन्न अथवा वर्ग के आदि वर्ण-विशेष में वैशिष्ट्य प्रदर्शन करते हैं—घोष वर्ण यदि पर में रहे तो ऐसी स्थिति में वर्गों का प्रथम वर्ण तृतीय वर्ण के रूप में परिवर्तित हो जाता है और पंचम वर्ण के वर्ग का प्रथम अक्षर भी अपने वर्ग के पञ्चम वर्ण में ही परिवर्तित हो जाता है । एवञ्च श ष स—इन ऊष्मामूलक वर्णों के परे रहने से प्रथम वर्ण भी अपने वर्ग के द्वितीयाक्षर में बदल जाता है ।

अथाऽध्येतृधर्माः

वेदपाठकाले दुष्टोच्चारणं त्याज्यमित्युपदिशत्याचार्यः—

उपांशु त्वरितं चैव योऽधीते वित्रसन्नपि ।
अपरूपसहस्राणां सन्देहे स प्रवर्तते ।। ९८ ।।

अन्वयः—उपांशु त्वरितम् अपि च वित्रसन् यः अधीते, सः अपरूपसहस्राणां सन्देहे प्रवर्त्तते ।

व्याख्या—एतेऽध्येतृधर्माः श्लोकाः वेदाध्येतॄणां विशेषाः धर्माः समाचरणीया इति शीर्षके ५७ संख्यक 'हकारैः पञ्चमैर्युक्तमि'त्यस्मात् पूर्वं चर्चिताः सन्ति, व्याख्यानन्त्वत्र विद्यते । उपांशु = अप्रकाशोच्चारणम् अस्फुटोच्चारणं वा, त्वरितम् = त्वरया, शीघ्रतया उच्चारितम् । येन वर्णस्फोटो न भवेत् तच्छैघ्र्यमत्र विविक्षितम् । स्वरितमिति पाठे एकश्रुत्योच्चारणम् । अपि च—वित्रसन् = अतिशयेन भयभीतो भूत्वा, सन्—यः = वेदपाठी, अधीते = अध्ययनं करोति, सः = अध्ययनकर्ता, अपरूपसहस्राणाम् = अनेकपशब्दप्रयोगाणाम्, सन्देहे =

CC-0. Nepal Rashtriya Pustakalaya Academy, Kathmandu. Collection

एवमस्ति एवं वेति विकल्पे, प्रवर्त्तते = पतितो भवति। विकल्पं प्राप्य निश्चेतुं न शक्नुयादिति, अतः एतत् त्रिविधमुच्चारणं दुष्टत्वेन त्याज्यमित्युपदेशः।

हिन्दी—वेदपाठकाल में दोष से युक्त शब्दों का उच्चारण त्याज्य होता है, यह आचार्य उपदेश देते हैं—जो उच्चारण सुस्पष्ट न हो, अप्रकाश हो, शीघ्रता (वेग) से उच्चारण किया गया हो (जिससे वर्ण का स्फोट न हो, ऐसी शीघ्रता यहाँ विवक्षित है) और यदि स्वरित ऐसा पाठ मान लिया जाय तो एकश्रुति से उच्चारण मानना चाहिए और अत्यन्त डरते हुए भी जो पढ़ता है वह अध्येता अनेक अपशब्दों के प्रयोगों के सन्देह में पड़ा रहता है। इन तीन प्रकार के दुष्ट उच्चारणों को छोड़ देना चाहिए।

कीदृशाश्छात्राः नराश्च विद्यां न गृह्णन्ति—

पञ्च विद्यां न गृह्णन्ति चण्डाः स्तब्धाश्च ये नराः।
अलसा रोगिणश्चैव येषां च विस्मृतं मनः॥ ९९॥

अन्वयः—ये नराः चण्डाः, स्तब्धाः, अलसाः च, रोगिणः, येषां मनः विस्मृतम् एते पञ्च विद्यां न गृह्णन्ति।

व्याख्या—ये = एवम्भूताः, नराः = मनुष्याः, चण्डाः = कोपसहिताः चण्डमुण्डाः, अध्यापकाय द्रुह्यन्त इति यावत्, च = पुनः, स्तब्धाः = उपदिष्ट-शिक्षाग्रहणे पटुतारहिताः, तथा = तथैव, अलसाः = मानसादिकरणानामव-धारणे ये तत्परा न भवन्ति ते, तथा रोगिणः = दीर्घरोगाः, तथा येषां = नराणां छात्राणां वा, मनः = मानसम्, विस्मृतम् = विस्मरणशीलम्, गृहीत-पदार्थधारणे अक्षमम्, ते = एते, पञ्च = पञ्चविधाः नराः, विद्याम् = अधीत-विषयं, न = नहि, गृह्णन्ति = धारयितुं शक्नुवन्ति। एतेन विद्यार्थिभिः एते दोषास्त्याज्येत्युपदेशः।

हिन्दी—कैसे लोग या छात्र विद्या = अधीत विषय को ग्रहण करने में असमर्थ होते हैं, इस विषय में आचार्य उपदेश देते हैं—जो मनुष्य या अध्येता छात्र बात-बात में क्रोध करता है, अतएव अध्यापक से द्रोह रखता है और जो पढ़ाये गये पाठ को ग्रहण करने में असमर्थ रहता है तथा मानसिक दोष के कारण ग्रहण करने में असमर्थ होता है एवं दीर्घ काल तक रोगी रहने वाला और जिनका मन विस्मरणशील है—ऐसे पाँच प्रकार के मनुष्य किम्वा छात्र विद्या ग्रहण करने योग्य नहीं होते हैं। अतः विद्यार्थियों के द्वारा ये पाँच दोष छोड़ देने योग्य होते हैं।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कः पुनः विद्यामधिगच्छति, के पुनः अधिकारिणः—

अहेरिव गणाद्भीतः सम्मानान्नरकादिव ।
राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति ॥ १०० ॥

अन्वयः—(यः पुरुषः) गणात् अहेः इव भीतः (भवेत् तथा) सम्मानात् नरकात् इव (बिभीयात्) किञ्च स्त्रीभ्यः राक्षसीभ्यः (इव) बिभीयात्, सः विद्याम् अधिगच्छति ।

व्याख्या—(यः पुरुषः = पुमान्) गणात् = जनसमूहात् जनसम्मर्दात् कोलाहलभयात्, अहेः = सर्पात्, इव = यथा, भीतः = भयभीतः, भवेत् = स्यात्, तथा = तथैव, सम्मानात् = स्वकीयादरस्थानात्, नरकात्=कष्टप्रदनरकस्थानात्, रौरव-महारौरवादिनरकात् इव (बिभीयात् = भयं कुर्यात्), किञ्च, स्त्रीभ्यः = नारीभ्यः, सकाशात्, राक्षसीभ्यः = निशाचरीभ्यः, इव (बिभीयात् = भयं प्राप्नुयात्), सः = एवम्भूतः पुरुषः, विद्याम् = अधीतशास्त्रम्, अधिगच्छिति = प्राप्नोति । अत्रायं निष्कर्षः दीक्षितमहाशयानाम्—एतेन विद्यार्थिना जन-समूहादिषु न स्थातव्यम् । यतो जनसमूहस्थित्या वार्त्तालापादिना समयहानिः स्यात् । यत्र सम्मानं भवति तत्रैव स्थातुमिच्छति—तत्र स्थित्या च अध्ययनाय गुरुं प्रति गन्तुमिच्छा नश्येत् । स्त्रीषु च आसक्तिवशेन विद्यातः उपरामः स्यात् ।

हिन्दी—कैसा छात्र विद्या को प्राप्त करने में सक्षम होता है अथवा कौन अधिकारी हो सकते हैं ? इस विषय में आचार्य उपदेश देते हैं—जो पुरुष जनसमूह के कोलाहल से उसी प्रकार दूर रहे जैसे सर्प जनसमुदाय से भयभीत होकर दूर भाग जाता है । आदर स्थान से नरक के समान डरे और स्त्रियों से राक्षसी की तरह दूर रहे । ऐसा पुरुष अधीत विद्या को प्राप्त कर सकता है । इससे यह स्पष्ट हुआ कि विद्या चाहने वाले को जनसमूह से अलग रहना चाहिए ।

तदा कः विद्याधिकारी भवितुमर्हति—

न भोजनविलम्बी स्यात् न च नारीनिबन्धनः ।
सुदूरमपि विद्यार्थं व्रजेद् गरुडहंसवत् ॥ १०१ ॥

अन्वयः—भोजनविलम्बी न स्यात्, न च नारीनिबन्धनः स्यात् । गरुडहंस-वत् विद्यार्थं सुदूरम् अपि व्रजेत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या--भोजनविलम्बी—भोजने=अशने, विलम्बयुक्तो न भवेत्, नारीनिबन्धनः=नारीपरतन्त्रश्च न स्यात्, यथा=येन प्रकारेण, गरुडहंसवत्=गरुडहंसौ सुदूरमपि मानसरोवरादि स्वेष्टस्थानं गच्छतः, तथैव=तेनैव प्रकारेण, विद्यार्थम्=विद्यां ग्रहीतुं, सुदूरम् अपि=दूरदेशमपि, गन्तुम्=यातुम्, उत्सहेत। एतेन प्रतिबन्धकान् अविगणय्य यः विद्योत्साही स अधिकारीति सुनिश्चितम्।

हिन्दी--तब विद्या प्राप्त करने का कौन अधिकारी हो सकता है, इस विषय में आचार्य उपदेश देते हैं—जो भोजन के समय में समय का अतिक्रमण न करे, समुचित समय पर भोजन करे, स्त्री में आसक्त न हो, निरन्तर उसके सम्पर्क में न रहे और जिस प्रकार गरुड तथा हंस अपनी इच्छानुसार सुदूर मानसरोवर आदि जाते हैं उसी प्रकार विद्या अध्ययन करने वाले को दूर से दूर विदेश तक जाना चाहिए। इससे यह सुनिश्चित होता है कि इन प्रतिबन्धकों को नहीं गिनते हुए जो विद्या ग्रहण करने का उत्साही होता है, वही वास्तव में विद्या ग्रहण करने का अधिकारी होता है।

विद्याग्रहणे महत्कष्टम्, विद्यार्थिनां सुखस्याभावः—

सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम्।
सुखिनस्तु कुतो विद्या विद्यार्थिनि कुतः सुखम्॥ १०२॥

अन्वयः—सुखार्थी चेत् विद्यां त्यजेत्, विद्यार्थी चेत् सुखं त्यजेत्, सुखिनः तु विद्या कुतः, विद्यार्थिनि सुखं कुतः (कुत्रापि नहि)।

व्याख्या—सुखार्थी—सुखस्य अर्थी=प्रयोजकः, चेत्=यदि, (तदा) विद्याम्=विद्याधिग्रहणम्, त्यजेत्=त्यागं कुर्यात्, यतः=यस्मात् कारणात्, सुखिनो नरस्य विद्या कुतः लभ्येत? विद्यायाः=वेदादिविद्यायाः, अर्थी=प्रयोजकश्चेत्, सुखं=सुखसाधनं सुखोपभोगं, त्यजेत्=मुञ्चेत्। यतः कष्टेनैव विद्या समायाति। विद्यार्थिनि=छात्रे, विद्याऽध्येतरि, सुखम्=सुखसाधनं कुतो लभ्येत? इति मनसि निधाय यः विद्यार्थी सुखाभिलाषां त्यक्त्वा विद्याग्रहणपरः कष्टं सहेत स एव अधिकारी इति सूचितम्।

हिन्दी--विद्या प्राप्ति करने में अत्यधिक कष्ट होता है, विद्यार्थियों के लिए सुख कहाँ? इस विषय को स्पष्ट करते हुए आचार्य उपदेश देते हैं—सुख चाहने वाले को विद्या पढ़ना छोड़ देना चाहिए और यदि सचमुच में वह

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

विद्यार्थी है तो उसे ऐश-आराम छोड़ देना चाहिए। सुख चाहने वाले को विद्या कैसे आयेगी और विद्यार्थी को सुख कैसे प्राप्त होगा ? यह मानकर जो विद्यार्थी सुख की अभिलाषा को छोड़कर विद्या ग्रहण में तत्पर होता है, कष्ट को सहता है, वही विद्या प्राप्त करने का अधिकारी होता है।

विद्या जिह्वाग्रे कदा आगच्छति—

गुणिता शतशो विद्या सहस्रावर्त्तिता पुनः।
आगमिष्यति जिह्वाग्रे स्थलान् निम्नमिवोदकम् ॥ १०३ ॥

अन्वयः—(यथा) उदकं स्थलात् निम्नम् (शीघ्रम् आगच्छति), (तथा) विद्या (पूर्वम्) शतशः गुणिता पुनः सहस्रावर्त्तिता (सती) जिह्वाग्रे आगमिष्यति।

व्याख्या—यथा=येन प्रकारेण, उदकम्=जलम्, समस्तभूप्रदेशात् स्थलात्, निम्नम्=नीचप्रदेशं प्रति, शीघ्रम्=शीघ्रमेव, वेगेन, आगच्छति=प्राप्नोति, तथा=तेनैव प्रकारेण, विद्या=वेदादि शास्त्रम्, पूर्वम्=प्राक्, शतशः=शतवारम्, यथा स्यात्तथा, गुणिता=पुनः पुनः पठिता, घोषिता पुनः=एतदनन्तरम्, पश्चात् सहस्रावर्त्तिता=सहस्रवारं पुनः पुनः पठिता सती, जिह्वाग्रे=जिह्वायाः अग्रभागे, आगमिष्यति। एतदावृत्तेर्माहात्म्यं विद्यते। काऽपि विद्या परिश्रमेणैवायाति। राज्ञः नैषधस्य भीमस्य विद्या रसनाग्रनर्त्तकी आसीत्। कण्ठस्थीकृता विद्यैव कार्यकाले समुत्पन्ने फलति।

हिन्दी—विद्या जीभ के अग्रभाग में कब विराजती है, इस विषय में आचार्य कहते हैं--जिस प्रकार जल समान स्तर के भूप्रदेश से नीचे की ओर वेग से प्रवाहित होता है (गिर जाता है), उसी प्रकार एक सौ बार आवृत्ति करने पर तथा उसे एक हजार बार आवृत्ति करने से विद्या जीभ के अग्रभाग में लपलपाने लगती है अर्थात् पठित विद्या कण्ठस्थ हो जाती है और चिरकाल तक स्थिर रहती है।

विद्या कदा दार्ढ्यम् धारयति—

शतेन गुणिताऽऽयाति सहस्रेण च तिष्ठति।
शतानां च सहस्रेण प्रेत्य चेह च तिष्ठति ॥ १०४ ॥

अन्वयः—शतेन गुणिता (विद्या) आयाति, सहस्रेण च तिष्ठति। परञ्च शतानां सहस्रेण प्रेत्य च इह च तिष्ठति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—शतेन = शतवारं पठनेन, गुणिता = गुणत्वं प्राप्ता, घोषिता, (विद्या = वेदादिविद्या) आयाति = समायाति, साधकसाहाय्येन स्वीक्रियते। ततः = तदनन्तरं, सहस्रेण = सहस्रसंख्यवारम् आवर्त्तिता सती, तिष्ठति = कण्ठस्था तिष्ठति, बहुकालं यावत् धृता भवति, सहस्रवारम् आवृत्त्या विद्या पच्यते सा चिरस्थायिनी भवति। परं च = तत्रापि पुनः, शतानां = शत-संख्यकानाम्, सहस्रेण = लक्षाऽऽवर्त्तनेन (१०० × १००० = १०००००), लक्ष-वाराऽऽवृत्त्या तु विद्या, प्रेत्य = इतः प्रयाणानन्तरम् अन्यस्मिन् जन्मनि, च = अपि, इह च = अस्मिन्नपि जन्मनि, यावज्जीवमित्यर्थः, विद्या, तिष्ठति = कण्ठे विराजते।

हिन्दी—विद्या कितना अभ्यास करने से सुदृढ़ हो जाती है, इस विषय में आचार्य कहते हैं—एक सौ बार विद्या पढ़ने से अर्थात् आवृत्ति देने से गुणत्व को प्राप्त होती है अर्थात् उसका अवगम होता है और एक हजार बार आवृत्ति देने से विद्या सुस्थिर रहती है। एक लाख बार आवृत्ति करने से विद्या मरणोपरान्त तथा जीवन काल में सुस्थिर रहती है। 'पूर्वजन्मार्जिता विद्या अग्रे अग्रे धावति' = पूर्वजन्मार्जित विद्या अगले जन्म में भी आगे-आगे दौड़ती है।

विद्याऽध्ययनेऽभ्यास एव परं बलम्, अभ्यासात् किन्न साध्यते—

जलमभ्यासयोगेन शैलानां कुरुते क्षयम्।
कर्कशानां मृदुस्पर्शं किमभ्यासान्न साध्यते ॥ १०५ ॥

अन्वयः—मृदुस्पर्शं जलं कर्कशानां शैलानाम् अभ्यासयोगेन क्षयं कुरुते। (इति दृष्ट्वा) अभ्यासात् किं न साध्यते (अपि तु सर्वमपि साध्यते)।

व्याख्या—मृदुस्पर्शम्=कोमलस्पर्शनशीलं (शीतस्पर्शवत्य आपः), जलम् = पानीयम्, कीलालम्, कर्कशानाम् = स्वभावादेव कठोराणाम्, शैलानां = पर्वतानाम्, अभ्यासयोगेन = निरन्तरप्रवहमानेन, क्षयम् = घर्षणेन चिक्कणं, कुरुते = करोति। (इति = एतद्, दृष्ट्वा=अवलोक्य) इति निश्चीयते यत्—अभ्यासात् = प्रतिदिनमभ्यसनात्, किम् = संसारे किमस्ति यन्न, साध्यते = कार्य-सिद्धिर्न भूयात्। अपि तु सर्वमेव अभ्यासेन साध्यं जानीयात्। एतेन यावन्न विद्याधिगमस्तावत् अभ्यसन्नेव तिष्ठेत् न उपरमेत् इति आचार्यस्योपदेशः।

हिन्दी—विद्या के अध्ययन में अभ्यास ही परमोपकारक होता है, अभ्यास

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

से क्या नहीं संभव है, इसी बात का उपदेश आचार्य देते हैं—जल अत्यन्त कोमल होता है किन्तु कठोर से भी कठोर स्वभावतः कठोर पहाड़ों को अभ्यास के बल से जल के निरन्तर प्रवाह से घिसा-चिपटा बना देता है। यह देखकर सुनिश्चित होता है कि निरन्तर अभ्यास से क्या नहीं संभव है? अतः विद्या अध्येता को सर्वदा अभ्यासशील होना चाहिए।

विद्याधिगमे उद्यम एव कारणं न तु बलवत्ता—

यथा पिपीलिकाभिश्च क्रियते पांसुसञ्चयम्।
न चात्र बलसामर्थ्यमुद्यमस्तत्र कारणम्॥ १०६॥

अन्वयः—पिपीलिकाभिः पांसुसञ्चयं यथा क्रियते, अत्र बलसामर्थ्यं न च अस्ति (किन्तु) तत्र उद्यमः एव कारणम् अस्ति।

व्याख्या—पिपीलिकाभिः=चींटीप्रभृतिभिर्जीवजन्तुभिः (उद्यमेन साहसेन च) कर्तृभिः, पांसुसञ्चयम्—पांसूनां=धूलीनां, सञ्चयम्=उन्नतं संग्रहं, मृत्तिकास्तूपमिव, वल्मीकमित्यर्थः, क्रियते। अत्र=धूलिसञ्चयने, बलस्य=शक्तेः सामर्थ्यम्, न च=न तु अस्ति। किन्तु, तत्र=एतादृशे स्थाने, उद्यमः=उद्योगः एव, कारणम्=निदानमस्ति। एतेन शनैः शनैः किञ्चित् किञ्चित् अपि अधीता विद्या कालेन महती सञ्चिता भवतीत्युपदेशात् अभ्यासे उद्योग एव विधेयः, न तु तत्र बलवत्ता अपेक्षिता इति सूचितः।

हिन्दी—विद्या की प्राप्ति में उद्यम (उद्योग) ही कारण होता है, उसमें बलवत्ता की अपेक्षा नहीं होती है। दृष्टान्त के द्वारा इसे पुष्ट करते हैं—जैसे चींटियों (जीव-जन्तुओं) के द्वारा धूलि का संचय करके ढूह जैसा बना दिया जाता है, यहाँ इस कार्य में कोई बलसामर्थ्य की अपेक्षा नहीं होती, यहाँ तो उद्यम ही कारण हो सकता है। अल्पप्राण नन्हीं-सी चींटी का क्या बलसामर्थ्य होगा किन्तु उसका उद्यम ही सफलता का द्योतक है।

दानाऽऽध्ययनकर्मसु अवन्ध्यं दिवसं कुर्यात्—

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु सञ्चयम्।
अवन्ध्यं दिवसं कुर्याद् दानाध्ययनकर्मसु॥ १०७॥

अन्वयः—अञ्जनस्य क्षयं, वल्मीकस्य तु सञ्चयं दृष्ट्वा दानाध्ययनकर्मसु अवन्ध्यं दिवसं कुर्यात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्याख्या—अञ्जनस्य क्षयं=नेत्राभ्यां किञ्चित् किञ्चित् ह्रासेन यथा सर्वस्य अञ्जनस्य क्षयः, तथा विद्याया अपि क्षणं स्वाध्यायराहित्येन ह्रासः स्यात्; 'क्षणशः कणशश्चैव विद्यामर्थंश्च चिन्तयेत्। क्षणत्यागे कुतो विद्या क्षणत्यागे कुतो धनम्' ॥ वल्मीकस्य सञ्चयम्=कणशः पांसुसञ्चयेन, यथा वल्मीकस्य सञ्चयः भवति, एवं विद्याया अपि प्रतिदिनं स्वाध्यायेन वृद्धिः स्यात्। एतौ व्यतिरेकेण अन्वयेन च दर्शितौ दृष्टान्तौ। दृष्ट्वा=अवलोक्य, शनैः शनैः सर्वं भवितुमर्हति—इति विज्ञाय, दानाऽध्ययनकर्मसु=दानाऽध्ययनसन्ध्योपासनाद्युपलक्षितनित्यक्रियासु, दिवसम्=एकमपि दिनम्, अवन्ध्यम्=सफलं कुर्यात्। दानादि नित्यक्रियां विना सकृदपि दिनं व्यर्थं न गमयेत्। तेन 'अहरहः स्वाध्यायोऽध्येतव्यः'।

हिन्दी—दान-अध्ययन आदि कार्यों में दिन सफल करना चाहिए, इस विषय में आचार्य दृष्टान्त द्वारा उपदेश देते हैं कि—आँखों से अंजन का कुछ-कुछ ही ह्रास होने पर सब अंजन क्रमशः धुल जाता है और चींटियों द्वारा कुछ-कुछ ही धूलि संचय करने पर वल्मीक बन जाता है, उसी प्रकार दान एवं अध्ययन आदि कर्मों में दिन को सफल बनाना चाहिए। एक भी दिन व्यर्थ न जाय। इस प्रकार समय का मूल्य अध्ययन में अत्यधिक है।

छात्रैः अल्पीयसी निद्रा विधेया—

हयानामिव जात्यानामर्धरात्रार्धशायिनाम्।
न हि विद्यार्थिनां निद्रा चिरं नेत्रेषु तिष्ठति ॥ १०८ ॥

अन्वयः—(यथा) अर्धरात्रार्धशायिनां जात्यानां हयानाम् एव नेत्रेषु चिरं निद्रा न तिष्ठति, तथा विद्यार्थिनां नेत्रेषु निद्रा चिरं न तिष्ठति।

व्याख्या—(यथा=येन प्रकारेण) अर्धरात्रार्धशायिनाम्—अर्धरात्रस्य=मध्यरात्रस्य, अपि अर्धं शेरते तच्छीलास्तेषां जात्यानाम्=उत्तमजातीयानाम्, हयानां=घोटकानाम्, नेत्रेषु=नयनेषु, चिरम्=बहुकालं, (निद्रा) न तिष्ठति, तथा=तेनैव प्रकारेण, विद्यार्थिनाम्=विद्याभिलाषिणां छात्राणां, नेत्रेषु=नयनेषु, निद्रा=स्वापः, चिरं=चिरकालं, न तिष्ठति=न जायते। अर्थात् विद्याभिलाषिभिश्छात्रैरधिकं न शयनीयम्। अत एवोक्तम्—'श्वानविद्या तथैव च'।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हिन्दी—छात्रों को स्वल्प निद्रा करनी चाहिए, इस विषय में आचार्य कहते हैं—जैसे अर्धरात्रि में भी आधी रात सोने वाले उत्तम जाति के घोड़ों की तरह, जिस प्रकार उनके नेत्रों में बहुत देर तक निद्रा नहीं रहती है उसी प्रकार विद्या चाहने वाले छात्रों को भी बहुत कम सोना चाहिए। अर्थात् विद्या चाहने वाले छात्रों को अधिक नहीं सोना चाहिए, जिससे अभ्यास में हानि न हो।

किञ्च छात्राणामल्पाहारित्वमप्यपेक्षते—

अन्नव्यञ्जनयोर्भागौ तृतीयमुदकस्य च।
वायोः सञ्चरणार्थाय चतुर्थमुपकल्पयेत् ॥ १०९ ॥

अन्वयः—(क्षुधः) (द्वौ भागौ) अन्नव्यञ्जनयोः भागौ, तृतीयम् उदकस्य च चतुर्थं (भागम्) वायोः सञ्चरणार्थाय उपकल्पयेत्।

व्याख्या—क्षुधः = बुभुक्षायाः, अन्नव्यञ्जनयोर्भागौ—अन्नस्य = शालि-गोधूमाद्यन्नस्य, द्वौ भागौ = भागद्वयम्, यावता भोजनेन तृप्तिर्भवति तस्य द्वौ भागौ अन्नादिभिः पूरयितव्यौ, उपकल्पयेत् = विधानं कुर्यात्। तृतीयं = तुरीयं भागमेकम्, उदकस्य = जलस्य, एवं भागत्रयस्य पूर्त्तिर्जाता। अवशिष्टं चतुर्थभागं, वायोः = पवनस्य, समीरणस्य, सञ्चरणार्थम् = सञ्चरणप्रयोजनात्मकम्, उपकल्पयेत् = उपयुक्तरीत्या व्यवस्थां कुर्यात्।

अत्रायमाशयः—यावता अन्नेन जलेन च स्वस्य तृप्तिर्यदा सम्भाव्येत तदा तदर्धं भोक्तव्यं तत्रापि अर्धं व्यञ्जनस्य कर्त्तव्यम्, येन आहारबाहुल्यात् अभ्यासो न नश्येत्।

हिन्दी—छात्रों के अध्ययन क्रम में अल्पाहारी होना परमावश्यक है। इस विषय में आचार्य उपदेश देते हैं कि—क्षुधा (भूख जितनी रहे) के भोजन का दो भाग जिसमें अन्न और व्यञ्जन का योग हो, भोजन करे। तीसरे भाग की पूर्त्ति जल से करे और चौथा भाग हवा के संचरण के लिए खाली छोड़ दे। अर्थात् जितने अन्न से अपनी तृप्ति होना संभव हो उसका आधा भाग अन्न और आधा भाग व्यञ्जन से, शेष तृतीय भाग जल से और चौथा भाग वायु-संचरण हेतु छोड़ दे। जिससे आहार की अधिकता से अभ्यास में त्रुटि न हो।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरुशुश्रूषैव विद्याधिगमे परमोत्कृष्टं साधनम्—

यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ ११० ॥

अन्वयः—नरः खनित्रेण खनन् (भुवम्) वारि अधिगच्छति, तथा शुश्रूषुः गुरुगतां विद्याम् अधिगच्छति ।

व्याख्या—नरः = मनुष्यः, यथा = येन प्रकारेण, खनित्रेण=कुद्दालेन अथवा 'खन्ती'नामकेन लौहसाधनेन, खननास्त्रेण, खनन् = खननकार्यङ्कुर्वन्, भुवम् = पृथ्वीमिति, तदनन्तरं, वारि = जलम्, अधिगच्छति = प्राप्नोति, तथा = तेनैव प्रकारेण, शुश्रूषुः = सेवां कर्त्तुं समुत्सुकः शिष्यः, गुरुगतां—गुरौ = आचार्ये, गतां=विद्यमानाम्, विद्याम् = वेत्ति अनया विद्या ताम्, अधिगच्छति=प्राप्नोति ।

अत्रायमाशयः—जलोपलब्धेः पूर्वंपर्यन्तं यथा नरः भूमिं खनन्नेव आस्ते, तत्रैव आ विद्याधिगमात् गुरोः शुश्रूषा तत्परेण छात्रेण भाव्यम् । इत्याचार्यस्योपदेशः ।

हिन्दी—गुरुशुश्रूषा (सेवा) ही विद्या-प्राप्ति में परम उत्कृष्ट साधन होता है, इस विषय में आचार्य उपदेश देते हैं—मनुष्य जिस प्रकार कुदाल अथवा खन्ती से पृथ्वी को खुनते-खुनते जल प्राप्त कर लेता है, उसी प्रकार गुरु-सेवा में तत्पर शिष्य अपनी विद्या को अनायास ही प्राप्त कर लेता है। जल की प्राप्ति तक मनुष्य भूमि को खनता रहता है उसी प्रकार विद्याप्राप्ति के लिए गुरु-सेवा अनिवार्य है । यह उपदेश है ।

गुरुसेवयैव प्राप्ता विद्या फलवती भवति—

शुश्रूषारहिता विद्या अपि मेधागुणैर्युता ।
वन्ध्येव युवती तस्य न विद्या फलिनी भवेत् ॥ १११ ॥

अन्वयः—शुश्रूषारहिता मेधागुणैः युता अपि विद्या तस्य यथा वन्ध्या युवती (स्त्री) भवेत्, एवं विद्या फलिनी न भवेत् ।

व्याख्या—शुश्रूषारहिता—शुश्रूषया=सेवया रहिता, तथा च मेधागुणैः = बुद्धिवैशद्येनापि मण्डिता, विद्या = अधीता विद्या, तस्य = गुरुशुश्रूषया प्राप्तविद्यस्य छात्रस्य, यथा = येन प्रकारेण, वन्ध्या = पुत्रोत्पादने अक्षमा, युवती = यौवनं प्राप्ता स्त्री, पुत्रोत्पादने असमर्था भवति तद्वत् गुरु-शुश्रूषारहिता विद्या,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

फलिनी = दृष्टाऽदृष्टफलवती न भवेत्। एतेन गुरु-शुश्रूषा अवश्यं विधेयेति। अत एवोक्तं यत्—'गुरुशुश्रूषया विद्येति'।

हिन्दी—गुरुसेवा से प्राप्त विद्या ही फलवती होती है, अतः विद्याप्राप्ति में तथा उससे सफलता प्राप्त करने में गुरु-सेवा ही सर्वाधिक आवश्यक है, यह आचार्य उपदेश देते हैं—गुरु-सेवा से रहित चाहे वह कितना भी बुद्धि-सम्पन्न हो, ऐसी विद्या जिस प्रकार वन्ध्या (पुत्रादि उत्पन्न करने में अक्षमा) युवती स्त्री होती है, ऐसी ही गुरुशुश्रूषा से रहित प्राप्त विद्या फलवती नहीं होती है। इससे गुरुशुश्रूषा अवश्य करनी चाहिए।

विद्याप्राप्तेर्नानाविधा उपायाः—

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थं नोपलभ्यते ॥ ११२ ॥

अन्वयः—गुरुशुश्रूषया विद्या (लभ्यते) वा पुष्कलेन धनेन (लभ्यते) अथवा विद्यया विद्या (लभ्यते), चतुर्थं न उपलभ्यते।

व्याख्या—गुरुशुश्रूषया—गुरोः = उपाध्यायस्य, शुश्रूषा तया = गुरुसेवया इत्यर्थः, विद्या = वेदादिविद्या, लभ्यते = प्राप्यते, इति प्रथमः पक्षः, वा=अथवा, पुष्कलेन = प्रभूतेन, धनेन = द्रव्येण (विद्या लभ्यते), इति द्वितीयः कल्पः, गुरवे प्रभूतानि धनानि निवेद्य तस्माद् विद्यां गृह्णीयात्। अथवा = प्रकारान्तरेण, विद्यया = वेदादिज्ञानेन, विद्या लभ्यते, अर्थात् स्वीयां विद्यां तस्मै विद्यार्थिने शिक्षां प्रदाय तस्मात् तदीयां भिन्नविद्यां, गृह्णीयात् = ग्रहणं कुर्यात्, एष तृतीयः पक्षः। चतुर्थं = एतत्त्रयातिरिक्तं भिन्नं साधनम्, विद्याप्राप्तौ न उपलभ्यते। एतेन दृष्टव्यवहारसिद्धयै अपि उपायान्यतमम् अवश्यं स्वीकर्त्तव्यम्।

हिन्दी—विद्याप्राप्ति के लिए अनेक प्रकार के उपाय निर्दिष्ट हैं, इनकी संख्या तीन प्रकार की ही सीमित कर दिये गये हैं। आचार्य कहते हैं—विद्या प्राप्त करने का प्रथम उपाय है गुरु-सेवा। गुरु की सेवा से छात्र को गुरु में अन्तःस्थित ज्ञान भी प्राप्त हो जाता है। द्वितीय पक्ष है—गुरु को प्रभूत धन देकर उन्हें प्रसन्न कर विद्या प्राप्त करना और तृतीय पक्ष है—गुरु की विद्या ग्रहण कर उन्हें बदले में अपनी विद्या देना, इसे ही 'विद्यया विद्या' भी कहते हैं। इन तीन पक्षों के अलावा चतुर्थ उपाय कोई भी नहीं है। प्राप्ति नहीं

CC-0. Nepal Sanskrit Academy. Kathmandu Collection.

होती है। अतः उपर्युक्त इन तीन उपायों से छात्र को विद्या ग्रहण करनी चाहिए।

अधुना गुरोः कियत्सामर्थ्यमित्याह—

बह्वीर्जिह्वा यथा गृह्णात्यह्ना वह्निस्तथैव च।
ब्रह्मरूपं विजानीयाद् गुरुमेवात्मनः सदा॥ ११३॥

अन्वयः—यथा वह्निः बह्वीः जिह्वाः अह्ना गृह्णाति, तथैव च आत्मनः गुरुम् एव सदा ब्रह्मरूपं विजानीयात्।

व्याख्या—यथा=येन प्रकारेण, वह्निः=अग्निः, बह्वीः=प्रभूताः, अग्रेसराः, जिह्वाः=रसनाः, अह्ना=शीघ्रमेव, गृह्णाति=ग्रहणं करोति, तथैव=तेनैव प्रकारेण, च=पुनः, आत्मनः=स्वकीयस्य, गुरुम् एव=उपाध्यायमेव; सदा=सर्वदा, ब्रह्मरूपम्=ब्रह्मस्वरूपम्, विजानीयात्=ज्ञेयम्। अत्र दीक्षितानां विमर्शः—'अर्थात् रुष्टो गुरुः यथा अग्निः शीघ्रमेव स्वकीयविभूतिरूपाः सर्वा ज्वालाः आत्मसात् करोति तथैव सर्वाः अध्यापिताः विद्याः आशु आत्मसात् करोति। प्रसन्नः पुनः गुरुः यथा ब्रह्म सङ्कल्पमात्रेण सकलं जगत् निर्मिमीते तथा इच्छामात्रेणैव किन्न कुर्यात्, अपि तु क्षणेनैव सकलविद्याप्रदानसमर्थः स्यात्।

हिन्दी—और अब जब कि गुरु का इतना महत्त्व है कि वह सेवा मात्र से शिष्य को समस्त विद्याएँ अर्पण कर देते हैं तो फिर उनका महत्त्व इससे भी अधिक बढ़ जाता है और आचार्य कहते हैं—जिस प्रकार अग्नि अपनी लपलपाती जिह्वा को (लौ या ज्वाला को) कभी तेजी से समेट भी लेती है, उसी प्रकार गुरु भी रुष्ट होने पर अपने द्वारा दी हुई समस्त विद्या वापस ले लेते हैं (जैसा कि ऐसा स्वयं याज्ञवल्क्यजी के साथ हुआ था)। ऐसे महिमामय गुरु को ब्रह्मस्वरूप जानना चाहिए। कहा भी गया है कि—'गुरुर्ब्रह्मा गुरुर्देवो महेश्वरः। गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः'॥ यहाँ दीक्षितजी का विमर्श है कि अप्रसन्न गुरु जिस प्रकार अग्नि शीघ्र ही अपने विभूतिरूप समस्त ज्वालाएँ आत्मसात् कर लेते हैं उसी प्रकार सभी अध्यापित विद्याएँ शीघ्र ही वापस ले लेते हैं और गुरु के प्रसन्न रहने पर गुरु जिस प्रकार ब्रह्म संकल्प मात्र से सम्पूर्ण संसार की सृष्टि करता है, उसी प्रकार गुरु भी इच्छा मात्र से शिष्य के लिए सब कुछ कर सकता है।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथं गुरुर्ब्रह्ममयो भवति—

यत्किञ्चिद्वाङ्मयं लोके सर्वमत्र प्रतिष्ठितम् ।
करोति तत्प्रदानं यत् तस्माद् ब्रह्ममयो गुरुः ॥ ११४ ॥

अन्वयः—लोके यत् किञ्चित् वाङ्मयं (तिष्ठति) (तत्) सर्वम् अत्र प्रतिष्ठितं (वर्तते), यत् तत् प्रदानं करोति, तस्माद् गुरुः ब्रह्ममयः (इति बुधैः स्मृतः) ।

व्याख्या—लोके = संसारे, यत् किञ्चिद् = दृश्यमानं, पठ्यमानं, श्रूयमाणं वा, वाङ्मयम् = वाणीविलासम्, वेदादिशास्त्रम् (तिष्ठति = विद्यते), तत्सर्वम् = तदखिलम्, अत्र = वेदे, प्रतिष्ठितम् = स्थितं (वर्तते = विद्यते), यत् = यस्मात्कारणात्, तस्य = वेदस्य, प्रदानम् = वितरणम्, अध्यापनम्, करोति, तस्मात् = तस्मात् कारणात्, गुरुः = आचार्यः, ब्रह्ममयः = ब्रह्मस्वरूपो भवति, इति, बुधैः = विद्वद्भिर्वेदपण्डितैः, स्मृतः = प्रतिपादितः । अर्थात् ब्रह्म = वेदः, तत्प्रदाता गुरुरपि ब्रह्मैव सर्वज्ञानमयत्वात् ।

हिन्दी—विद्यादाता गुरु का महत्त्व ब्रह्मस्वरूप माना गया है, इस विषय में आचार्य कहते हैं—संसार में जो कुछ भी वाङ्मय स्थित है, वह चाहे दृश्यमान हो, पढ़े जाने योग्य हो अथवा सुने जाते हो वे सभी प्रकार के ज्ञान वेद में प्रतिष्ठित हैं और उस वेद का गुरु अध्यापन करता है, अतः गुरु ब्रह्मस्वरूप होता है। क्योंकि वेद ब्रह्म है और उसके अध्यापक सर्वज्ञानमय होने से ब्रह्मस्वरूप हैं। ऐसा विद्वानों ने बार-बार कहा है।

अयोग्यगुरुकरणे दोषमाह—

विधिनाऽप्यविधिज्ञानमविधानान्न लभ्यते ।
अविधानपरो नित्यं प्रायश्चित्तीयते नरः ॥ ११५ ॥

अन्वयः—नरः अविधानपरः नित्यं प्रायश्चित्तीयते । (यतः) विधिना अपि अविधानात् अविधिज्ञानम् (निष्फलत्वम्) ।

व्याख्या—नरः = मनुष्यः, छात्रश्च, अविधानपरः = अयोग्यगुरुकरणात् विधि-विधानरहितः, नित्यम् = सर्वदा, प्रायश्चित्तीयते = प्रायश्चित्तस्य अर्हतां प्राप्नोति, अनुतापार्हो भवति । यतः = यस्मात् कारणात्, विधिना = वेदस्वरूपेण ब्रह्मणा, अपि, अविधानात् = वैधानिकानुष्ठानराहित्यात्, अविधिज्ञानम् = निष्फलत्वम् । न विधिज्ञानेऽपीति व्यतिरेकः फलराहित्यमेव विवक्षितम् । न

CC-0. Nepal Sanskrit University. Kathmandu. Digitized by eGangotri

लभ्यते किम् अपि तु लभ्यते एवेति भावः। अर्थात् सर्वज्ञेनापि अविधानात् फलं न प्राप्यते यदि तदा अविधानपरस्य नरस्य तु किमु वक्तव्यम्। अतो अयोग्यगुरुर्न करणीयः। इत्याचार्यस्योपदेशः शिष्यं जनं प्रति।

हिन्दी—अयोग्य गुरु के करने में दोष माना गया है, आचार्य उपदेश देते हैं—मनुष्य अथवा छात्र अयोग्य गुरु के चयन से विधान रहित होने के कारण हमेशा प्रायश्चित्त का अधिकारी हो जाता है, क्योंकि सकल विद्या के सर्वज्ञ ब्रह्मा भी यदि अविधानपूर्वक अनुष्ठान करें तो उन्हें फल नहीं मिलेगा, उनका सारा परिश्रम व्यर्थ जायेगा। कहने का आशय यह है कि सर्वज्ञ ब्रह्माजी के द्वारा भी अविधानपूर्वक किया गया धार्मिक अनुष्ठान निष्फल ही होता है, फिर अविधान से कार्य करने वाले मनुष्य के विषय में क्या पूछना है। अतः अयोग्य गुरु कभी नहीं करना चाहिए, योग्य गुरु से ही विद्या प्राप्त करें।

सुयोग्यगुरोरपि युक्तियुक्तं वचो ग्राह्यम्—

युक्तियुक्तं वचो ग्राह्यं न ग्राह्यङ्गुरुगौरवात्।
सर्वशास्त्ररहस्यं तद् याज्ञवल्क्येन भाषितम्॥ ११६॥

इति श्रीयोगिवर(योगीन्द्र)याज्ञवल्क्यमहर्षिप्रोक्ता
याज्ञवल्क्यशिक्षा सम्पूर्णा।

अन्वयः—गुरोः अपि युक्तियुक्तं (यद्) वचः (तद्) ग्राह्यम्, (केवलम्) गुरुगौरवात् (तु) न ग्राह्यम् (कुतः), यत् सर्वशास्त्ररहस्यं तद् याज्ञवल्क्येन (महर्षिणा) भाषितम् (न तु रचितम्)।

व्याख्या—गुरोः अपि=उपाध्यायस्य शिक्षकस्यापि, युक्तियुक्तं=युक्त्या युक्तं, युक्तिसम्पोषितम्, यद्वचः=यद्वचनं, तद् ग्राह्यम्=तदेव गृहीतव्यम्, नान्यत् किञ्चित्। किञ्च—गुरुगौरवात्=गुरोः गौरवस्तस्मात्, अयं मे गुरुः केवलमिति कारणादेव गौरवभारात्, न ग्राह्यम्=न स्वीकरणीयम् (कुतः—यतः पूर्वमविधानपरस्य नरस्य प्रायश्चित्तीयता उक्ता)।

यत्—सर्वशास्त्ररहस्यं=सर्वेषां शास्त्राणां रहस्यं=गूढविषयं, याज्ञवल्क्येन =एतन्नामकेन महर्षिणा योगीन्द्रेण, भाषितम्=भाषणेनोपदिष्टम्, न तु विरचितमिति। एतेन अङ्गानामपि वेदवद् अनादित्वं सूचितम्।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हिन्दी—सुयोग्य गुरु का भी युक्तियुक्त वचन ही ग्रहण करना चाहिए;

केवल ये हमारे गुरु हैं—इस गौरव से युक्तिविहीन वचन नहीं ग्रहण करना चाहिए। क्योंकि पूर्व श्लोक में कहा गया है कि—अविधानपूर्वक किया गया धार्मिक अनुष्ठान निष्फल ही होता है तथा करने वाला मनुष्य प्रायश्चित्त का भागी होता है। यहाँ जो कुछ भी शास्त्रों का रहस्य कहा गया है, उसे महर्षि योगीन्द्र याज्ञवल्क्य ने भाषित किया है (रचा नहीं है)। इसलिए वेद जिस प्रकार अनादि अपौरुषेय हैं उसी प्रकार वेद के अंग भी अनादि हैं।

शिक्षाया याज्ञवल्क्यस्य शान्तिव्याख्येयमर्पिता।
पादयोर्विश्वनाथस्य तेन तुष्यतु भारती॥

इति महर्षि-योगीन्द्र-याज्ञवल्क्यप्रोक्तायां शिक्षायां वर्णप्रकरणे
क्षोपाह्व-डॉ०नरेशशास्त्रिकृतायां संस्कृत-हिन्दी-
'शान्ति'व्याख्यायां प्रकीर्णकाधिकारः सम्पूर्णः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पद्यानामकारादिक्रमेणानुक्रमणीका

पृष्ठाङ्कः

अ

अक्षरं भजते काचित् ६५
अङ्गुष्ठस्योत्तरं पर्व ४७
अङ्गुष्ठाकुञ्चनं लघौ ५८
अञ्जनस्य क्षयं दृष्ट्वा १२६, १७६
अथात उत्तरो यः स्यात् १२२
अथातस्त्रैस्वर्यं १
अथावयमादित्यादा १२२
अनन्तरं मकारस्य १३८
अनुस्वारस्तु यो दीर्घात् ११४
अनुस्वारस्योपरिष्टाद् ११३
अनुस्वारो द्विमात्रः स्यात् ११३
अन्तस्थयमसंयोगे १५४
अन्नव्यञ्जनयोर्भागौ १२६, १७८
अपञ्चमैश्चैकपदे १६५
अभ्यासार्थं द्रुतां वृत्तिम् ४४
अर्धमात्रा स्वरं किञ्चित् ९४
अवग्रहात्परो यस्तु ७२
अवग्रहे तु कालः स्यात् १३
अवग्रहे पदच्छेदे ९९, १६८
अष्टौ स्वरान् प्रवक्ष्यामि ६८
अहेरिव गणाद्भीतः १२५, १७२

आ

आकाशस्था यथा विद्युत् ८७
आगमं कुरु यत्नेन ४०

पृष्ठाङ्कः

आचार्याः समभिच्छन्ति १०५, १४७
आदित्यो मुनिभिः प्रोक्तः ८५
आद्या मात्रा तु कण्ठस्य ९५, १६६
आम्रपालाशबिल्वानाम् ३३
आवर्त्तते पदं यच्च १४८

इ

इ-उवर्णौ यदोदात्ता ७०
इकारो यत्र दृश्येत ७१

उ

उच्चस्थानगते हस्ते ७९
उच्चादुच्चतरं नास्ति ५४
उच्चानुदात्तयोर्योगे ७७
उच्चौ निषादगान्धारौ ८
उत्तानं सोन्नतं किञ्चित् ४६
उत्थाने तु तथा तारा ६४
उदात्तं तु ध्रुवः प्रान्ते ५०
उदात्तं नानुवर्त्तेत १०१
उदात्तपूर्वः स्वरितः ७२
उदात्तश्चानुदात्तश्च ३
उदात्ताक्षरयोर्मध्ये ७३
उदात्तादनुदात्ते तु ५३
उदात्तान्निहितः स्वारः ७५, १६९
उदात्तान्निहितः स्वार्यः ७७
उपध्मानीयसहिता ११६
उपसर्गपरो यस्तु १२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृष्ठाङ्कः

उपांशुत्व(स्व)रितं चैव १२५, १७०

ऊ

ऊर्ध्वक्षेपाच्च योष्मा स्यात् ५७

ऋ

ऋक्संहितां त्रिरभ्यस्य ३०
ऋचो यजूंषि सामानि ३७
ऋचोऽर्धे तु द्विमात्रः स्यात् १४

लृ

लकारस्य तु दीर्घत्वम् ९७

ए

एओ आभ्यामुदात्ताभ्याम् ७०
एकपदे नीचपूर्वः ६९
एकमात्रो भवेद्ध्रस्वः १६
एतत्सर्वं समाख्यातं १८
एतल्लक्षणमाख्यातम् ९४

ऐ

ऐन्द्री तु मध्यमा वृत्तिः ४५

ओ

ओकारस्तु प्लुतो ज्ञेयः ९६
ओभावमागता योष्मा ११६
ओभावश्च विवृत्तिश्च ११५

क

ककारान्ते टकारान्ते ५६
ककारान्ते पदे पूर्वे १०७
करिणी कुर्विणी चैव ९१
करिणी रहयोर्योगे ९१
कालिन्दीसंहिता ज्ञेया ३२
कुक्कुटः कामलुब्धो यः १३०
कूर्मोऽङ्गानीव संहृत्य ९१

पृष्ठाङ्कः

कोकिलः पञ्चमं ब्रूते १०

ख

खदिरश्च कदम्बश्च ३५

ग

गान्धर्ववेदे ये प्रोक्ताः ७
गीती शीघ्री शिरःकम्पी १४५
गुणिता शतशो विद्या १२५, १७४
गुरुशुश्रूषया विद्या १२६, १८०
गुरोरनुमतिं कुर्यात् १९

ङ

(ङकारान्ते पदे पूर्वे) १०९

च

चतुर्थश्च तृतीयेन १६७
चुलुनींका स्फुटो दण्डी ४१

ज

जलमभ्यासयोगेन १२६, १७५
जात्ये च स्वरिते चैव ६२
ज्ञातव्यश्च तथैवार्थो ३९
ज्वालापिण्डान् सनासिक्यान् १५५

ट

टकारान्ते पदे पूर्वे १०६

त

तकारान्ते पदे पूर्वे १०६, १०९
तर्जन्यङ्गुष्ठयोः स्पर्शः ५९
तेनास्यकरणे सौक्ष्म्यम् ३५
तैरोव्यञ्जनसंज्ञश्च ६६
त्रिफलां लवणाक्तां वै ३६
त्रिविधा तु भवेदूष्मा ६४
त्वदर्थवाचिनो वौ वौ १२४

Nepal Sanskrit Academy Kathmandu Collection

	पृष्ठाङ्कः
द	
दर्दुरोदरदेशौ तु	१३३
दुर्बलस्य यथा राष्ट्रम्	१०१
द्वयोस्तु स्वरयोर्मध्ये	८८
द्विमात्रिको मात्रिको वाऽपि	१३७
द्वौ वरुणौ वस्वरितौ	१०४
न	
न करालो न लम्बोष्ठो	२७
नकारान्ते पदे पूर्वे	११०, १११
न कुर्वीत पदं दीर्घम्	४२
न चास्य मुष्टिबन्धी स्यात्	४०
न भोजनविलम्बी स्यात्	१२५, १७२
न स्त उत्पद्यते रङ्गः	१३९
नाऽभ्याहन्याच्च निर्हन्यात्	२४
निमेषो मात्राकालः स्यात्	११
नीचे सोमं विजानीयात्	५
नैतत्स्वरितपूर्वाङ्गे	९७
नैतन्माध्यन्दिनीयानाम्	१०९
प	
पकारान्ते पदे पूर्वे	१०८
पक्षौ वितत्य खे गृध्रो	१३५
पञ्चमं तु विवेशाधः	९६
पञ्चमाः शषसैर्युक्ताः	१६६
पञ्चमादुत्तरो यो वः	१२०
पञ्च रङ्गाः प्रवर्त्तन्ते	१४२
पञ्चविद्यां न गृह्णन्ति	१२५, १७१
पदकाले यः स्वरितः	७६, १६९
पराङ्गस्य तु यत्पूर्वम्	९८
पादादौ च पदादौ च	११७
पादाद्यं च पदाद्यं च	११७
पिपीलिकाऽऽद्यन्तदीर्घा	८९
पिपीलिका पाकवती	८९
प्रकृतिर्यस्य कल्याणी	२८
प्रचयो यत्र दृश्येत	५५
प्रणवं तु प्लुतं कुर्यात्	१७
प्रणवं प्राक् प्रयुञ्जीत	२१
प्रथमा यत्र दृश्यन्ते	१०६
प्रथमाश्च तथाऽन्तस्थाः	८५
प्रथमाश्च तृतीयाः स्युः	१६९
प्रथमे न ठकारेण	१५०
प्रथमे न णकारेण	१५१
प्रथमे न षकारेण	१४९, १६७
प्रथमे नैव रङ्गेण	१५१
ब	
बह्वीजिह्वा यथा गृह्णा०	१८१
भ	
भारद्वाजकमाख्यातम्	८४
म	
मकारान्ते पदे पूर्वे	१११
मणिवद् व्यञ्जनान्याहुः	१०२
मधुरं च न चाऽव्यक्तम्	१४३
मनुष्यतीर्थाच्चं कुर्यात्	४८
मात्रिकं वा द्विमात्रं वा	७८
माधुर्यमक्षरव्यक्तिः	१४६
माध्यन्दिनविरोधी स्यात्	७५
मानसे चाणवं विद्यात्	१२
मासे भाद्रपदे मेघाः	१२९
मुष्ट्याकृतिमकारे स्यात्	५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पृष्ठाङ्कः

मेघदुन्दुभिनिर्घोषो १२८

य

यत् किञ्चिद् वाङ्मयं लोके १८२
यथा कामातुरा नारी १३४
यथा खनन् खनित्रेण १२६, १७९
यथा धनुष्याविततेः ४४
यथा पिपीलिकाभिश्च १२६, १७६
यथा पुत्रवती स्नेहात् १३१
यथा बालस्य सर्पस्य ६६
यथा भारभराक्रान्ता १३३
यथा महाह्रदं प्राप्य ३३
यथा वाणी तथा पाणी ४२
यथा व्याघ्री हरेत् पुत्रान् १४३
यथा सुमत्तनागेन्द्रः १४४
यथा सौराष्ट्रिका नारी १३६
यदेव लक्षणं यस्य १२४
यद्योभावप्रसन्धानम् ११५
यमान् विद्यादयः पिण्डान् १५३
यरलवाः शषसहाः १३८
या तु हंसपदा नाम ९१
यादृशी रत्नवर्णाभा १४०, १६७
युक्तियुक्तं वचो ग्राह्यम् १८३

र

रङ्गे चैव समुत्पन्ने १३६
रलाभ्यां पर ऊष्माणः ९३
रुक्क्मेति प्रथमो ज्ञेयः १६५

ल

लाक्षारक्तं यथा तोयम् १४०, १६७
लीढाऽतिलीढविद्युच्च ११९
लुप्ते नकारे यत्स्वारम् १४१, १६७

व

वकारस्त्रिविधः प्रोक्तो ११९
वडवा च हयं दृष्ट्वा १३२
वत्सानुसारिणी चादौ ८९
वर्गाणां पञ्चमा वैश्याः ८३
वर्णे तु मात्रिके पूर्वे ११२
विद्यादुदात्तं गायत्रं ६
विधिनाऽप्यविधिज्ञानम् १८२
विभाषया यकारश्च १२२
विवृत्ति प्रत्ययामूष्माम् ६७
विवृत्तौ चावसाने च १५
विसर्गान्तः स्वरो ह्रस्वः ६४
विस्वरं विरसं चैव २८
वैश्यं तु स्वरितं विद्यात् ६

श

शङ्कितं भीतमुद्घृष्टम् २८
शतेन गुणिताऽऽयाति १२५, १७४
शाखायां वानरा यद्वत् १२९
शिखी वदति त्रिमात्रं १७
शुक्लामुच्चं विजानीयात् ४
शुक्लवर्णानि नामानि ८४
शुश्रूषारहिता विद्या १२६, १७९
शृङ्गवद् बालवत्सस्य ६३

ष

षडङ्गुलं तु जात्यस्य ५१
षड्जो वेदे शिखण्डी स्यात् ९

स

संयोगे तु परे स्वायम् ९८

CC-0. Nepal Sanskrit Academy Kathmandu Collection

	पृष्ठाङ्कः
संहिता नयते सूर्यम्	३२
संहितासारबहुलः	३०
सन्धिजौ च पदान्तीया	११९
सर्वं तु सौम्यमाख्यातम्	८४
सममुच्चारयेद् वर्णान्	२५
सर्वे कण्टकिनः पुण्याः	३५
सुखार्थी चेत् त्यजेद् विद्याम्	१२५, १७३
सुप्रसन्नमना भूत्वा	२१
सूर्यरश्मिप्रतीकाशाद्	११
स्वर उच्चः स्वरो नीचः	१०१
स्वरभक्ति प्रयुञ्जानः	९३
स्वरवर्णान् प्रयुञ्जानः	४१
स्वरसन्धिविधानेन	१००, १६९
स्वरास्तु ब्राह्मणा ज्ञेयाः	८३
स्वरितं यद् भवेत् किञ्चित्	६०
स्वरितादनुदात्ता ये	५५
स्वरिते त्र्यङ्गुलि विद्यात्	४९
स्वरिते यत्र निक्षिप्ते	६१
स्वरे च स्वरिते चैव	७३
ह	
हकारं पञ्चमैर्युक्तम्	१२६
हकाररेफसंयुक्तः	१२१
हयानामिव जात्यानाम्	१२६, १७७
हरिणी दर्शनमिति	९२
हरिवरुणवरेण्याः	१०६
हस्तभ्रष्टः स्वरभ्रष्टः	२६
हस्तहीनं तु योऽधीते	३७, ३८
हस्तौ सुसंयतौ धार्यौ	१९
हीयते वर्धते वापि	१४९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथम प्रकाशित नवीन विस्तृत हिन्दी टीका सहित

वैयाकरणसिद्धान्तकौमुदी

'श्रीधरमुखोल्लासिनी' विस्तृत हिन्दी व्याख्या
(प्रत्येक सूत्रों में पदप्रदर्शन, समास, अनुवृत्तिक्रम, सूत्रार्थ, भाष्य-मनोरमा-शेखर के अनुसार विस्तृत एवं सुगम व्याख्या, प्रयोगसिद्धि, सभी धातुओं के प्रत्येक लकारों के रूप, क्लिष्ट रूपों की सिद्धि एवं धातुपाठ सहित धातुप्रकरण का विशिष्ट विवेचन)

व्याख्याकार : श्रीगोविन्दाचार्य

प्रथम भाग (प्रारम्भ से अव्ययान्त प्रकरण)
द्वितीय भाग (स्त्रीप्रत्यय, कारक एवं समास प्रकरण)
तृतीय भाग (सम्पूर्ण तद्धित प्रकरण)
चतुर्थ भाग (दशगणी-भ्वादि से चुरादि प्रकरण)
पंचम भाग (णिच्प्रकरण से लकारार्थ प्रकरण)
षष्ठ भाग (उणादि सहित कृदन्त प्रकरण)
सप्तम भाग (स्वरवैदिकी एवं लिङ्गानुशासन प्रकरण)

लघुसिद्धान्तकौमुदी

श्रीधरमुखोल्लासिनी-हिन्दी-व्याख्यासमन्विता (पदच्छेद, समास, अनुवृत्तिक्रम, सूत्रार्थ, भावार्थो का स्फोरण,विस्तृत हिन्दीव्याख्या, प्रयोगसिद्धि के साथ उदाहरण एवं अभ्यासार्थ प्रश्नावली सहित)

व्याख्याकारः श्रीगोविन्दाचार्य

बृहद् धातु-शब्दरूपसंग्रहः

वैयाकरणसिद्धान्तकौमुदी पर आधारित शब्द एवं धातु रूपों का बृहत्संग्रह

लेखक : डॉ. रामकिशोर शर्मा

रूपचन्द्रिका

(शब्द एवं धातुरूपों का सङ्कलन)

डॉ. ब्रह्मानन्द त्रिपाठी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चौखम्बा सुरभारती प्रकाशन-वाराणसी